IASWR

MICROFILM PROJECT MBB

MBB-1971-77
1. Film strip number

25
2. Source

Mantrārthāvalokinī
3. Title

4. Additional titles, shortened forms of title, etc.

N.S. + 880 = A.D.
5. Year in which MS was copied (Nepali Samvat and Christian Era)

6. Name of Scribe

Nepālī paper
7. Material (Palm leaf, etc.)

Devanāgarī
8. Script

12 cms. x 18 cm.
9. Size

18
10. Lines to a page

240
11. Number of leaves in complete work

12. Missing leaves

13. Author and Date of composition (if given)

14
14. Number of Chapters

This is a very valuable standard commentary on the Namasangiti (Cf.
15. Remarks
MBB-1971-117). (See also MBB-1971-152, a different commentary on the
Nāmasāṅgīti.

November 9, 1971
Date photographed

ॐ नमो मञ्जुघोष स्वामिने

आर्यमञ्जुश्रियं नत्वा ज्ञानेन दुःखक्षयकारिणां॥
तथास्मिन्नामसंगीतिगम्भीरोदारधर्मिणीम्॥
१॥ योगस्यार्थे क्रियातंत्रं तथा पारमितानयः॥ सत्त्वाभिधर्मपिटकं विलोक्यान्यनियन्धनं॥ २॥ ज्ञातिकं चेतिबन्धं च स्तोत्रकारमनंतथा॥ विज्ञानवादमखिलं तथा मध्यमकं चयत्॥ ३॥ लौकिकश्च तथा शास्त्रं गुह्यमंत्रमार्गतं॥ उपदेशश्च संस्मृत्य प्रार्थितेनमयाधुना॥ ४॥ व्याख्यानं क्रियते तस्य गम्भीरोदारवर्त्तरं॥ सत्त्वानां मंदबुद्धीनां करुणार्द्रेणचेतसा॥ ५॥ इदानीमस्याः नाम संगीतेः शरीरव्यवस्थापनमभिधीयते॥ तद्यथा॥ अथेश्वरणा.१ ज्ञातिबचनं २ सकुलावलोकनं ३ मायाजालाभिसम्बोधिक्रमः ४ आदर्शनज्ञानं ५ वोधिचित्तं श्रीवज्रसत्त्वद्वारेण सुविशुद्धधर्मधा

नुज्ञानं समवलोचनस्वभावेन ६ प्रत्यवेक्षणा
ज्ञानं अमिताभस्वभावेन ७ समताज्ञानं रत्न
सम्भवरूपेण ८ कृत्यानुष्ठानज्ञानं अमोघ
सिद्धिस्वभावेन ९ तथागतमुखेनज्ञान
मिति १० अनुसंसा मंत्रविन्यासः १९ उपसं
हारश्चेति शरीरार्थश्चानुद्देशः ॥ ॥
अथवज्रधर इत्यादावारभ्य यावत्स्वका
यस्थितोऽयतः ॥ इतिषोडशभिर्गाथाभिरधि
ष्ठानं ॥ १ ॥ अथशाक्यमुनिर्भगवानित्या
द्यारभ्य यावन्नत्साऽभगवानितिषड्भिर्गाथा
भिःप्रतिवचनं ॥ २ ॥ अथशाक्यमुनिर्भग
वान् सकलमित्यारभ्य यावदुष्णीषकलंम
हदितिद्वाभ्यां गाथाभ्यां रश्मिकुलावलोकनं
॥ ३ ॥ इमाश्चरामंत्रेत्याद्यारभ्य यावत्अल
पचनायतेनमः ॥ इतितिसृभिर्गाथाभिर्मि
थाजालाभिसम्बोधिक्रमस्यचितं ॥ ४ ॥ न
मथेत्याद्यारभ्य यावत्महायाननयोत्तमः ॥

इतिचतुर्दशभिर्गाथाभि र्वज्रधातुमहा म
ण्डलाकारेण बोधिचित्तवज्रस्याभिधानं॥
५ ॥महावैरोचनोद्देशेनारभ्य यावत्
वज्रांकुशीमहापाशो पादेन पञ्चविंशति
गाथाभिः सुविभक्तधर्मधातुस्वभावेन स्तु
तिः॥ ६ ॥ वज्रभैरवभीकर इत्याद्यारभ्य
यावत्घोषाघोषवतांवरः॥ इतिपादेन
सार्द्धदशभिर्गाथाभि रदर्शनज्ञानस्वभावे
नस्तुति॥ ७ ॥ तथताभूतनैरात्मा इत्या
द्यारभ्य यावत्ज्ञानार्चिःप्रभास्वरः॥
इतिश्चत्वारिंशद्भिर्गाथाभिःप्रत्यवेक्षणा
ज्ञानस्वभावेनस्तुतिः॥ ८॥ इदमर्थःसाधकः
पर इत्याद्यारभ्य यावद्वज्रकेतुर्महास्तुति
रितिचतुर्विंशतिभिर्गाथाभिः समंताज्ञा
नस्वभावेनस्तुतिः॥ ९ ॥ सर्वेसमुद्भवो
द्भव इत्याद्यारभ्य यावन्मञ्जुश्रीः श्रीम

ताम्बर इति पञ्चदशभिर्गाथाभिः स्तुत्वानुद्धा
नज्ञानधारेणास्तुति ॥ १० ॥ नमस्तेवरदव
ज्राथेत्याद्यारभ्य यावत् ज्ञानकायनमोस्तुते
इति पञ्चभिर्गाथाभिः पञ्चतथागतमुखे
न पञ्चज्ञानस्तुतिः ॥ ११ ॥ इयमसो वज्र
पाणेइत्याद्यारभ्य यावद्धर्मराज इत्यनेन
स्तुतिः ॥ १२ ॥ ॐ सर्वधर्मेत्याद्यारभ्य या
वद्धर्मधातुज्ञानगर्भाः ॥ इति मंत्रोद्धारेण
स्तुतिः ॥ १३ ॥ अथवज्रधरेत्याद्यारभ्य या
वत्सर्वसंकल्पदेशितः इत्युपसंहारेणास्तुतिः
॥ १४ ॥ तदेकत्रिंशदुत्तरशतगाथाभि
रर्धार्धशतेनानुसंसाग्रन्थेनच भगवतः सर्व
तथागतज्ञानकायस्य ॥ मञ्जुश्रीज्ञानसत्व
स्य नामसंगीतेः पिण्डार्थः ॥ सर्वत्रैवग्र
र्थसंशयेन सर्वेषां सम्बुद्धाभिधेयप्रयोज
नप्रयोजनावसायपूर्विकाप्रवृत्तिरिति

सम्बन्धादिन्यस्यानामसंगीतेर्वाच्यानि ॥ तथा हि. यदि सम्बन्धाभिधेयादिकमस्यानकथ्येत तदोन्मत्तवाक्यवदसम्बन्धत्वमानर्थक्यंच संभावयन्तः ॥ प्रेक्षापूर्वकारिणोनप्रवर्त्तन्ते श्रोतुमिति ॥ सम्बन्धाभिधेयमस्याश्यवक्तव्यं ॥ श्रद्धावत्तस्तु भगवद्वचनप्रामाण्यंप्रवर्त्तनेवनतान्प्रत्यभिधेयादिकमभिधातव्यं ॥ तेषांश्रद्धामात्रप्रवृत्तत्वात् ॥ तच्चेदं ज्ञानमभिधेयं ॥ तथाचवक्ष्यति ॥ अनुसंसायांयुगाद्यधर्मनावतारणार्थे नामसंधारणाप्रकाशनतयेति ॥ अभिधानं नामसंगीतिरिति गानंगीति सम्यग्गीतिः संगीतिनाम्नोसंगीति नामसंगीतिरिति ॥ नामानि योगकियाचर्यातंत्रप्रवचनसूत्राभिनयलौकिकलोकोत्तराणि ॥ सर्वस्थावरजङ्गमानिच गोन्मास्थित्यात्परमार्थतः संवृत्यानुना-

मभाजनिर्देशसर्वमाभवाग्रपरिक्षेदभिन्नि
वात ॥ अनयोरभिधानाभिधेयलक्षणो
पायोपेयलक्षणो वा सम्बन्धः ॥ प्रयो
जनञ्च मंत्रमुखचर्यो चारिणां बोधिसत्वा
नां अधिमुक्ति तत्वमनस्कारभ्यां सर्व ध
र्मप्रतिवेधिकया परमया अनाविलया
प्रज्ञाविधया अद्वया साक्षात्कर्वता
महायानप्रतिलाभभूतानां ततश्चभाव
नाप्रकर्षपर्यन्तजनैष्ठिकं तथागतपद
प्रयोजन प्रयोजनमित्यादियोजनीयं ॥
पदार्थस्त्वधुना व्याख्यायते ॥ ॥

ॐनमः श्रीवज्रनाथाय ॥

अथ वज्रधरः श्रीमान् दुर्दान्त द
मकः परः ॥ त्रिलोकविजयी वीरो
दुष्टराट् जलिशेश्वरः ॥ १ ॥
अथेति वेज्रधर मधिकृत्यो ह ॥ तस्मा

ध्येयकत्वेनप्रस्तुतत्वात् ॥ आर्य्यमाया
जालमोडशसाहस्रिकान्महायोगतन्त्रतः
पातिसमाधिजालपटलात्भगवच्छाक्य
मुनिभाषितात् भगवतो मञ्जुश्रीज्ञानसत्व
स्य परमार्थनामसंगीतिर्यानामध्येषणा
र्थं ॥ भगवान्वज्रधरो मञ्जुश्रियसत्वा
नुग्रहार्थं पुनरप्यथेत्याह ॥ अथशब्द आ
नन्तर्ये ॥ अथवज्रधरो भट्टारकोतरकुप्रमु
खैः सार्द्धं नाथं कृत्वा भगवन्तं तथागतं प्र
णम्य कृताञ्जलिपुटो भूत्वा अग्रतःस्थितः
॥ इदमाहेतिसम्बन्धः ॥ वज्रं धारयतीतिव
ज्रधरः ॥ अनेन पदेन गांभिर्य सन्निधी
यते ॥ श्रियो देवतासा विद्यते यस्या
सौ श्रीमान् ॥ अनेनचौदार्य सूचितं
॥ ततश्च किमुक्तं भवति ॥ प्रज्ञोपायात्म
को भगवान् वज्रधर इति ॥ अतए

वोर्क्कं श्रीसम्बरे ॥ सर्वाकाशावकाशोऽयं व
ज्रसत्वस्तथागतः इति ॥ दुःखेन धर्मनइ
ति ॥ दुर्दान्ता ईश्वरादय स्तेषां दमकःशा
शकः वज्रधर विनेयकत्वा त्रेषामीश्वरा
दीनां उत्कृष्टत्वात्परो वज्रधरः ॥ भूलोक भु
वलोक स्वर्गलोकः इति ॥ त्रयोलोकानां
विजेतं श्रीसम स्येति त्रिलोकविजयो । अ
नस्य वीरो भगवान् वज्रधरः परैरनभि
भवनीयत्वात् ॥ श्रीतत्व संग्रहे । पञ्चयु
ग्यानि पञ्चजे ॥ तथाहि । यथोयथाहिवि
नयं यांतिसत्वाः स्वभावतः ॥ तथातथैव
सत्वार्थं कर्यात्रागादिभिः भुक्तिः ॥ सर्वस
त्वहिताथाय उद्यतोशाश्वतः ॥ मारयन्स
र्वसत्वांस्तु नसपापेनलिप्यते ॥ सर्वस
त्वहिताथाय उद्यतोकायप्रयोगतः ॥ हरंत
परविन्नानि नसपापेनलिप्यते ॥ रागतुल्यं

मुखं नास्ति तज्जिनेभ्यः समाददत ॥ सत्वा
र्थान्परराशिं सेवयेत्पुरुषमाप्नुयात् ॥
सर्वसत्वहितार्थाय बुद्धशासनहेतवः ॥
सर्वकर्मणिकुर्वन्ति बहुपुरुषमवाप्नुयादिति ॥ तेषां पक्षानां गुह्यानांराज गुह्यराट् ॥
गुह्येश्वरराजत इति गुह्यराट् । कुलिशोवज्रं
वज्रस्यस्वभावः कुलिशेश्वरो भगवान्व
ज्रधरः ॥ अग्रतोस्थितोभूत्वा कृताञ्जलिपु
टइदं वक्ष्यमाणमाहेति । क्रियापदंस
र्वत्र योजनीयं ॥ १ ॥

विकच पुराडरीकाक्षः प्रोत्फुल्लवक्त्र
कमलाननः ॥ प्रोत्त्रासयन्वज्रवर
स्वकरेणमहुर्मुहुः ॥ २ ॥

विकचेति विकचानि पुराडरीकं श्वेतपद्मं
विकचं विकसितं अक्षिचक्षुः ॥ ततश्चा
यंविग्रहः ॥ विकचवत्पुराडरीकंचेति वि

ऊर्ध्वपुण्डरीकं । विकचपुण्डरीकमिव वा क्षिणी लोचने यस्य स तथोक्तः । ऊर्ध्वकेशो ऊर्ध्वं प्रोन्नतं कमलं पद्माननं ऊर्ध्वो ऊर्ध्व कमलवदाननं यस्यासौ तथोक्तः । व ज्रस्यमध्यं सकरेणागृह्य त्वा मुहुर्मुहुः पु नः पुनः प्रक्षिप्तं वज्रं प्रतीच्छन् प्रोत्त्रास यन्निदमाहेति सम्बन्धः ॥ २ ॥

भृकुटीतरुप्रमुखैरनन्तैर्वज्रपा णिभिः ॥ उद्दामदमकैर्वीरैर्वीर बीभत्सरूपिभिः ॥ ३ ॥

श्रीवज्रपाणिभिरेकतंत्रे ॥ श्रीवज्रधरानुच रा भृकुटीतरुप्रमुखाः पञ्चशतानि क्रोध गणानां पठ्यन्ते. तैः सार्द्धं भगवान् वज्रध रः । संवर्द्धं प्रणम्येदमाहेति योज्यं ॥ ते च क्रोधगणाः परमार्थतोऽनन्ताः ॥ अतः आह ॥ अनन्तैर्वज्रपाणिभिरिति । तेपि

ऊर्ध्वोन्नदमका वज्रधरवत् ॥ अतएवाह ॥ भ
तस्ववीरा लेलेलेरभिभवनीयत्वात् । अतेआ
ह वीरेरिति । किंरसा वीररसाःकिंरूपिनः वी
भत्सरूपिणाः अतएववीरवीभत्सरूपिभि
रिति ॥ ३ ॥

उच्चालयद्भिः स्वकरैः प्रस्फुरद्
वज्रकोटिभिः॥ प्रज्ञोपायमहाकरुणा
जगदर्थकरैः परैः॥ ४ ॥

उच्चालयद्भिरिति. उर्ध्वमुत्क्षिप्यद्भिः के सु
दर्शनैः स्वकरैः ॥ प्रस्फुलवज्रकोटिभिरिति
प्रस्फुलन्तां वज्राणां कोटय अग्रभागाः ये
षांते प्रस्फुल्लवज्रकोटयः । तैः किमात्मका
प्रज्ञोपायमहाकरुणायो जगतामर्थकर्तृ
शीलं येषांते प्रज्ञोपायमहाकरुणाजगदर्थ
कराः । तत्रसर्वधर्माणां प्रविचयो प्रज्ञोपाययो
रशेषलौकिकलोकोत्तरसमाधिदर्शनमुखेन
यथाभव्यतया सकलसत्वकारणी । करुणा

क्रान्ति करुणा । कमिति सुखस्यारव्या । कारुणि
काहि परदुःख दुःखी सन्नात्मनः सुखमाव
णोतीति महाकरुणा । महतिचासौ करुणा म
हाकरुणा । अन्नालम्बनात्मिका । जगच्च ज
गच्च जगच्च जगन्नि त्रै धातुकानि तेषामर्थः
प्रयोजनं । अतआह । प्रज्ञोपाय महाकरुणा
जगदर्थकरैः परैरिति ॥ ४ ॥

हृष्टनुशाशयैर्मुदितैः क्लेशविग्रह
रूपिभिः ॥ बुद्धकृत्यकरैर्नार्थैः सा
र्धं प्रणतविग्रहैः ॥ ५ ॥

अतएव ते कीदृशाः परा उत्कृष्टास्ते अतआ
ह । परैरिति । किंस्वभावा हृष्टनुशाशय
स्वभावाः ततः हृष्टकायैः नुशोचित्रैः, आश
य अभिप्रायः । तत्रश्चायमर्थः । हृष्टनुशा
या येषांते हृष्टनुशायाः । अतआह । हृष्टनु
शाशयैरिति । अतएव मुदिता हर्षिताः सर्वस
त्वार्थकरणात् । अतएवाह । मुदितैरिति ।

विग्रहस्यरूपं विग्रहरूपं । क्रोधानां विग्रहरूपं क्रो
धविग्रहरूपं ॥ किंतद्रूपं महाभैरवा ट्टहासा
नेकशीर्षकरचरणाविकृतनयनोर्द्धकेशपिङ्ग
लभ्रुभङ्गकपालमालालंकृतसर्पाभरणाद्या
घचर्मनिवासनादिकं न विद्यते. येषांते क्रो
धविग्रहरूपिनः अतआह। क्रोधविग्रहरू
पिभिरिति । उद्धानां कृत्यानि उद्धकृत्यानि कृ
त्यानि कर्त्तव्यानि. अतआह। उद्धकृत्यकरे
रिति । अतएवनाथ शास्तारं उद्धकृत्यकरणा
त् । अतोनाथेरिति । प्रणतोविग्रहे येषांतेप्र
णतविग्रहाः अतस्तैः प्रणतविग्रहैः सार्द्धं भ
गवान् वज्रधर इदं वक्ष्माणआह॥ ५ ॥

प्रणम्यनाथं सत्वेदं भगवन्तंतथा
गतं॥ कृताञ्जलिःपुरोभूत्वा इदमा
हस्थितोग्रतः॥ ६ ॥

किंकृत्वा प्रणम्य कं नाथं अनाथानां लोका

नां अनुशासनात् नाथः स्वामिः नाथं पुनरपि
किंविशिष्टमित्याह । सम्यक्संबुद्धमिति सम्यक्संबु
द्ध-श्रावक मध्ये बुद्धं श्रेयोपि नाथं विशिनष्टि
भगवन्तमिति ॥ भगसम्पन्नत्वात् भगवान् ।
चतुर्णां भंगात्वा । तथाचाह । क्लेशकर्मतथा
जन्म क्लेशज्ञेयादृतिस्तथा ॥ येचक्लेशपाक्षिका
भग्ना तेनेहभगवांस्मृताः ॥ इत्यनेनैश्वर्यक्लेशवि
धिनाक्लेशादिकं भग्नवानिति भगवान् ।
ऐश्वर्यादिगुणायोगात्वा । तथाचाह । ऐ
श्वर्यस्यसमग्रस्य रूपस्ययशसः श्रियः ॥ ज्ञा
नस्याथप्रयत्नस्य षण्णांभगमितिस्मृतः ॥
इतिपुनरपि किंभूतं नाथमित्याह । त
थागतमिति । तथतां शून्यतांगत स्तथा
गतः । अथवा यथाते तथागताः गतागत
निष्पत्ति तथागच्छंतीति तथागतः । ते
तथागतं प्रणम्येति पूर्वेणासम्बन्धः ॥ अ

ग्रतस्थिनाभूत्वा कृताञ्जलिपुटः सन्भगवन्
वज्रधर इदमाह॥ ६ ॥

महिताय ममार्थाय अनुकम्पा
यमेविभो॥ मायाजालाभिसंबो
धे यथालाभीभवाम्यहम्॥ ७॥

महितायेत्यादि: महँ हितं हि मापतिपथ्य
मागामि परिणामत्वात्. ममार्थाय मत्त्रयो
जनाय मेमम हविभो अनुकम्याय अनु
ग्रहाय। यथायेनप्रकारेण अहंलाभीभवा
मि कस्येत्याह। मायाजालाभिसंबोधीनि. मा
यजालाभिसंबोधिनामक्रम स्यायथाहं ला
भी भवामि तथाभगवान्प्रकाशयन्निति। व
ख्यमानेन क्रियापदेन सम्बन्धः॥ ७ ॥

अज्ञानपङ्कमग्नानां क्लेशव्याकुल
चेतसाम्॥ हिताय सर्वसत्वाना म
नुत्तर फलाप्तये॥ ८ ॥

अज्ञानपङ्कमग्नानां सर्वसत्वानां हिताय च

तंचं ज्ञानमविद्यासेवसंगस्थानत्वादुत्तरत्वात्
च। पंक इव पंक तस्मिं मग्नायेसत्वा स्तेषां
हिताय उत्तरपि किं विशिष्टा स्ते सत्वा इत्या
ह। क्लेशव्याकुलचेतसाम्। क्लेशा रागादयः
मंद्। तथाचाह। अभिधर्मे। मानदृग्विचि
कित्साच रागप्रतिघ मूढ्यः। इति तेःक्लें
शै र्व्याकुलानि चेतांसि. येषांसत्वानां क्लेश
व्याकुलचेतसाम्। अतस्तेषामुत्तरफ
लप्राप्तये प्रकाशयन्निति सम्बन्धः।
अनुत्तरफलं बुद्धत्वं तस्यप्राप्तिः प्रतिर्भ
भः॥ तदर्थं तत्प्राप्तय इति॥ ८॥

प्रकाशयतु संबुद्ध भगवान्शास्ता
जगद्गुरु॥ महासमयतत्वज्ञ इ
न्द्रियाशयविस्तरः॥ ९॥

प्रकाशयतु भगवान् इत्यादि। संबुद्ध इति
शास्त्रत द्वारेण जगदनुसाशनाच्छास्ते त्य
क्षोभ्यद्वारेण। जगतांगुरु जगत्गुरु रिति

रत्नसम्भवकारेण। समयोभगवान् श्रीवज्रस
त्वः। महाश्चासौ समयश्च महासमयः। त
स्यतत्वं महासमयतत्वं तज्जानातीति महा
समयतत्वज्ञ इति। अमिताभकारेण। इन्द्रि
याणि मदुमध्याधिमात्राणि तेषामाशयाभि
प्रायं वेत्तीति इन्द्रियाशयविदित्यमोघसि
द्धिकारेण॥ एवंपञ्चतथागतात्मको भगवा
न् परमोत्कृष्टः प्रकाशयतीति॥ ९॥

भगवन् ज्ञानकायस्य महोष्णीष
स्य गीयते:॥ मञ्जुश्रीज्ञानसत्वस्य
ज्ञानमूर्त्तेः स्वयंभुवः॥ १०॥

अथभगवान् ज्ञानसत्वस्येत्यादि। हेभगव
न् मञ्जुश्रीज्ञानसत्वस्य संभावनीया नामसं
गीतिं वाहं धारयिष्यामीति वक्ष्यमाणेन
क्रियापदेन सम्बन्धः॥ किंविशिष्टस्य ज्ञा
नकायस्येति। ज्ञानमेवकायो ज्ञानकायस्य

स्येत्यादर्शज्ञानकारेण । महोष्णीषस्येति महा
श्रासौ उष्णीषश्च महोष्णीषः स्येति । महोष्णीषनस्य महो
ष्णीषस्येति समताज्ञानकारेण महोष्णीषत्वं
सर्वतथागताभिषेकात्मकत्वात् गीः पते
रिति । गिरां शब्दानां पतिः स्वामि गीष्पतिः
तस्य गीष्पतेः प्रत्यवेक्षणाज्ञानकारेण ज्ञान
मूर्तिरिति । ज्ञानमेवमूर्त्तेः ज्ञानमूर्तिः न
स्वज्ञानमूर्तेरिति । कृत्यानुष्ठानज्ञानकारेण
स्वयंभवरिति । स्वयंभवतीति स्वयम्भूः ॥
भावनाबलात् भवतीत्यर्थः तथाचोक्तं श्री
परमाद्ये । ---- ज्ञानस्य स्वयमे
वाविर्भावात्स्वयंभूरिति अतस्तस्य स्वयंभव इ
ति । सदिशुद्धज्ञानकारेण किमुक्तं भव
ति । पञ्चज्ञानात्मको भगवान् मंजुश्रीज्ञा
नसत्वः ॥ मञ्जुकोमलाश्रीर्यस्यासौ मञ्जु
श्रीज्ञानसत्व इति । सर्वतथागतहृदय

विहारित्वात् · मंजुश्रीश्चासौज्ञानसत्वश्च म
ञ्जुश्रीज्ञानसत्वः ॥ नायंदशभूमीश्वरो बोधि
सत्वः किंतर्हिप्रज्ञापारमिता सै
व मंजुश्रीज्ञानसत्वः । अतएवाह दिङ्ना
गपादः । प्रज्ञापारमिताज्ञान मद्वयेस्व तथा
गतमिति · तस्यमञ्जुश्रीज्ञानसत्वस्य प्रज्ञ
ज्ञानात्मकस्यसंबन्धनीया नामसंगीतिं तां
चाहं धारयामीति · किंविशिष्टमित्याह ॥
१० ॥

गम्भीरार्थमुदारार्थं महार्थम
समां शिवां ॥ आदिमध्यान्तक
ल्याणीं नामसंगीतिमुत्तमां ॥ ११ ॥

गंभीरार्थमित्यादि · गंभीरश्चासावर्थश्च
गंभीरार्थः अत्यन्तार्थः । सयस्यामस्ति सा
गंभीरार्था अतस्तां धारयामीति उदारा
र्थमिति । महानर्थो यस्यासा महार्थ · म

हार्थत्वं पुनर्निरवशेषस्य सत्व थतः स
र्वासापरिपूरणात्वात् असमामिति. नविद्य
ते समायस्यासा इति असमा। असमत्वं कृतः
धर्मधातुस्वभावत्वात्। शिवामिति सर्वप्र
शोपसमत्वादादिमध्यान्तकल्याणीमिति.
चिन्ताभावनाकालेऽहर्षप्रीतिप्रश
विलाभात. त्रिकाल्याणीनि. नोद्धार्याणि.
नामसंगीतिसूत्रमामिति गम्भीरार्थः॥ ११॥
पुनरपि किंविशिष्टमित्याह॥

यातीतेभीविताश्चैव भीविष्यन्ते
ऽनागताः॥ प्रत्युत्पन्नाश्चसम्बुद्धा
यांभाषन्ते पुनः पुनः॥ १२॥

यातीतेत्यादि. अतीते बुद्धैर्यो भाषि
ता अनागताश्च ये सम्यक्सम्बुद्धाहि य
स्मा यांभाविष्यन्ते पुनः प्रत्युत्पन्नाश्च
बुद्धा भगवन्तो भाषन्ते यानामसंगीति

पुनरपीति ॥ १२ ॥

मायाजाले महातंत्रे यास्मिंस्तं
प्रगीयते ॥ महावज्रधरैर्हृष्टैः
सुगतैर्मंत्रधारिभिः ॥ १३ ॥

मायाजालेत्यादि. अस्मिन्मायाजाले महा
तंत्रे. अमेयैर्मंत्रधारिभिः हृष्टैर्यासंप्र
गीयते ॥ १३ ॥

अहंचैनां धारयिष्यामि यानिर्याणा
दृढाशयः ॥ यथाभवाम्यहंगा
थ सर्वसत्त्वदुःखक्षयं ॥ १४ ॥

अहमित्यादि. नामहं चैनां धारयिष्यामि.
आनिर्याणात्. निर्वाणं यावत्. किंभूत दृढा
शयः दृढ अविचल आशयोऽभिप्रायो य
स्यासौ दृढाशय इति. अनेनेतदुक्तं भ
वति. अक्षयनिर्वाणे यथागते यो भावि
ता नामसंगीति. अतोस्य धर्मपर्यायस्या

काशनत्वंसंदर्शयति. तथाचोक्तं । उपा
दावातथागतानामनुत्पादावास्थितैवैषा ध
र्माणां धर्मतेतिप्रदर्शितंभवति । तथाभवा
म्यहमित्यादि हेनाथ यथासर्वसंकुद्धगुह्य
धृक् भवाम्यहम् । तथाप्रकाशयन्तिति पू
र्वेणसम्बन्धः॥ धृगित्ययंभृज्ञपाठः॥ १४॥

प्रकाशयिष्येसत्वानां यथाशय
विशेषतः॥ अशेषक्लेशनाशाय
अशेषाज्ञानहानये॥ १५ ॥

यथाच नामहमधिगम्य सर्वसत्वानां य
थाशयविशेषात् प्रकाशयिष्ये । किमर्थ
मित्याह । अशेषक्लेशनाशाय. अशेषाज्ञा
नहानयेति । तत्र अशेषक्लेशा इति क्ले
शोपक्लेशागृह्यन्त तेषां नाशाय. अशे
षाऽज्ञानहानय इति । अशेषेषु प्रकार्थे
स्वज्ञानं अशेषाज्ञानहानि स्वदर्थप्रकाश

यिष्ये ॥ १५ ॥

एवमध्येष्यगुह्येंद्रो वज्रपाणि
स्तथागतं ॥ कृताञ्जलिपुटो भू
त्वाप्रह्वकायस्थितोऽग्रतः ॥१६॥
अध्येषणाज्ञानगाथा षोडशः ॥ १ ॥

एवमित्यादिः एवमनेनप्रकारेण
भगवान् गुह्येंद्रो वज्रपाणि स्तथागत
मध्येष्य. तत्रगुह्या यक्षा अडकवतीनि
वासिन स्तेषामिंद्रोराजा अतएव गुह्ये
न्द्र इत्युच्यते। कृताञ्जलिपुटो भूत्वाप्र
ह्वकायः प्रणतकायोऽग्रतस्थित इति
संस्कार पूर्विका प्रार्थना अध्येषणा सं
स्कारेत्रप्रणामादि ॥ १६ ॥

आर्य नामसंगीति टीकायां नाम सं
गार्थावलोकिन्यां अध्येषणा यां प्रथ
मोधिकारः ॥ ॥गाथा षोडशः ॥१६॥

अथैषणानन्तरं प्रतिवचनमाह ॥ ॥

अथशाक्यमुनिर्भगवान् सकुले
मंत्रकुलमहत्॥ मंत्रविद्याधरं कु
लं चतुर्लोकैकशरण्यं॥ १ ॥

अथेत्यादि। शाक्यकुलानां मुनिः कायवा
क्चित्त मौनेनयोगान्मुनिः। भगवान्सं बुद्ध
इत्यर्थः द्विपदोत्तम इति द्विपदा दे
वमनुष्या तेषामुत्तमः श्रेष्ठ इत्यर्थः। स्व
जिह्वां निर्णाम्याप संछाद्य स्वमुखादिभिः
। स्वमुखे आयतामिति दीर्घा स्फीना मिति
बहुलतरां शुभामिति· दक्षिणावर्त्तशंख
निभां सर्वधर्मोत्पाद्याश्च ॥ १ ॥

स्मित्वा संदर्श्य लोकाना मपायत्र
यशोधनं त्रिलोकाभासकरणं
चतुर्मारारिमासनं॥ २ ॥

किं कृत्वास्मित्वेत्यादि। लोकानां सत्वा

नां अपायत्रयशोधनं. नरकतिर्यक्प्रेत
संशोधनं स्मितं संदर्शयित्वा वज्रपाणिं प्र
त्याभाषतेतिसम्बन्धः॥ तथागतानां धर्मदे
शनाय स्त्रिलिङ्गानि. तद्यथा। स्मितं. व्य
वलोकितं. रश्मिसंचोदनञ्च। क्वचिदेकं
क्वचिदेकं. क्वचित् त्रीणि वा युगपन्नवानि
॥ तद्यथा। श्रीमायाजालतंत्रेऽर्द्धं पठ्यते
स्मितं व्यवलोकितञ्च। क्वचित्त्रीणि य
था पञ्चविंशतिसाहस्र्यां प्रज्ञापारमिता
यां. मैत्रेयव्यवलोकनं. स्मितमुखेन.
रश्मिस्फरणंचेति। क्वचिदेकं यथा।
अत्रैव नामसंगीतौ स्मितं संदर्शयतीति
कानामिति। तद्यस्मितं. चतुर्विधं अङ्ग
प्रत्यंग स्फरणेन रोमकूप स्फरणेन प्रभा
निप्रभा विस्फरणेन. जिह्वेन्द्रिय रश्मिस्फ
रणेनच॥ तदत्र जिह्वाप्रातिहार्यं देशना

याः ॥ पूर्वोक्तिङ्गैर्लोकाभास्कराणामित्यादि
ना दर्शयति भर्भवस्वेति त्रयाणां लोकाना
माभास्कराणां प्रकाशनकराणां स्मितं दर्शयि
त्वा वज्रपाणिं प्रत्यभाषतेति सम्बन्धः ॥ पु
नरपि किंविशिष्टं स्मितमित्याह चतुर्मो
खिशाशनमिति चत्वारो माराः स्कंद क्षेत्र
मृत्युदेवपुत्राः ॥ २ ॥

त्रिलोकमापूरयन्त्या प्रल्हादमधु
रयागिरा ॥ प्रत्यभाषतगणेन्द्रं व
ज्रपाणिं महाबलम् ॥ ३ ॥

त्रयवारा यस्तेषां शाशनमनुशाशनं निग्र
हः स्मितं दर्शयति । त्रिलोकमापूरयंत्या व
ज्रपाणिं गिरा वाचा प्रत्यभाषत कि भूत
या मधुरया माधुर्य्यश्रुतिः सुखेत्वा प्रल्हे
ति प्रलस्वरोपेतत्वात् प्रलस्वर इति । प्रल
स्वरो महतो महागणस्याधिवचनं यथो

ङ्गाख्यं । पुराणं - - - इति · अनेकसा
हस्रंपर्वतं सहस्रशब्देन त्रिसाहस्रमहासा
हस्रलोकधातु रवगंतव्यः ॥ अनेकसाहस्र
मयीपर्वतेत्यर्थः । तथाचोक्तं । लोकधातुत्रि
साहस्रमहासाहस्रशब्देन स्फरतीति · यथा
भ्यन्तराः भ्रूणवन्ति तथा बाह्या । तत्राभ्य
न्तरा यस्मिं त्रिसाहस्रेमहासाहस्रे स्थिता
बाह्याइति लोकधातुरिति · तेन महत्त्वाद्बुल
स्वरः ॥ तत्रप्रभगवान् शाक्यमुनिः । त
स्यप्रभणाः इयंप्रभावाक् तयाप्रभास्क
येवगिरा त्रैलोक्यमापूर्य यन्मा व्याहरेत्या
वज्रपाणिं प्रत्यभाषतः । तथाचोक्तं ॥ स
र्वाषि वाणी भवभूदनस्य · नानाभिधानै
: प्रतिदेशभिन्नैः ॥ यथायथासत्त्वप्रबोधहे
तु · भवत्य - - - स्त्वसितावि भक्तः । इति
॥ ३ ॥

साधुवज्रधर श्रीमन्साधुते वज्रपा
णय॥ यत्संजगद्धितार्थाय महाक
रुणायान्वितः॥ ४ ॥

साधुवज्रधरेत्यादि। ते तव वज्रपाणेः सधु
श्रीमान्। हे वज्रधर यत् यस्मात् त्वं मञ्जुश्री ना
मकायस्य संबन्धनीया नामसंगीति स्तामी
त्यं श्रोतुं समुद्यतः। तत्तस्मात् हे गुह्यकाधि
पते तत्रासाधु देशयामीति सम्बन्धः॥ किं
मर्थं त्वमाह परः। जगद्धितार्थायेति।
जगदनुग्रहाय महाकरुणायान्वितः सन्॥ ४॥

किं विशिष्टां नामसंगीतिं श्रोतुमुद्यत इति
। पवित्रामिति मंगल्यां। अघनाशिनीमिति
पापनाशिनीं। भूयस्त्वमेकाग्रमना अने
नैतदुक्तं भवति। साधो सुष्ठ्विदं सुचि
घटवत् किंनहि साधु भूयः भगवतैव
मुक्तेसति वज्रधरः प्राह भगवान् शाक्य

४ तत्साधु देशयाम्येष अतिगुह्यकाधिप॥
५ भूयस्त्वमेकाग्रमना तत्साधु भाषयो विधिं॥ प्रतिबन्धनज्ञानगाथा
पत्रांक ३६

मुनि एवमस्त्विति । ३ । यथोक्तेनैवक्रमेणा
हं शृणुयामिति ॥ ५ ॥ ६ ॥
आर्य्यनामसंगीतिर्नाम मंत्रार्थावि
लोकिन्यांप्रतिवचनाधिकारो द्वितीयः॥ २॥
गाथा ८॥
इदानींप्रतिवचनानन्तरं मंत्रकुलावलो
कनमधिकृत्याह॥
अथशाक्यमुनिर्भगवान्सकलमं
त्रकुलंमहत्॥ मंत्रविद्याधरंकुलं
व्यवलोक्यकुलंत्रयं॥ ७ ॥
अथशाक्यमुनिर्भगवान्सकल मंत्रकुलं म
हदिति ग्रहणाक्यवाक्यमेतत् सामान्यता
पात्रत्व व्यवलोक्य गिरांपते मंजुश्री हीन
सत्त्वस्य समन्वनीयानुत्पाद धर्मिणी गाथा
मिमां भाषते स्मेति । वक्ष्यमाणक्रियापदेन
सम्बन्धार्थः मंत्रविद्याधरकुलमिति विद्

यां धारयतीति विद्याधरः। मंत्रात्मकश्चासौ विद्याधरश्चेति मंत्रविद्याधरः। धारणात्मकः तस्यकलं मंत्रविद्याधरकलं कर्मकलमित्यर्थः॥ कलत्रयमिति कायवाक्चित्त स्वभावत्वाद्वैलोचनकलं॥ ९॥

लोकालोकोत्तरंकलं लोकालोक कलंमहत्॥ महामुद्राकलं चाग्र्यं महामुद्रा कलंमहत्॥ २॥ यह आगे वाले श्लोक का अर्थ है॥

लोकालोकोत्तरकलमिति. लोकयदर्शनिलोकत इतिलोकः तस्यकलं लोकालोकोत्तरकलं. पद्मकलमित्यर्थः लोकालोककलं महदिति. लोकानां आलोको लोकालोकः अक्षोभ्यः आदर्शज्ञानात्मकत्वात्. तस्यकलं लोकालोककलं चक्रकलमिति. महामुद्राकलंचाग्रमिति. वोधिचित्तवज्रकलं मतएवाग्रो वैरोचनादीनां. वोधिचित्त

स्वभावत्वात् तस्यकूलं महत्समुद्रजलमिति
महोर्णीम कूलं महदिति सर्वतथागतानां
वैधातुक धर्मराजाभिषेकप्रदानात्महोर्णी
कूलं महत् रत्नकूलमित्यर्थः॥ २ ॥

आर्यनामसंगीतिटीकार्या नामसंवार्थ
वलोकिन्यां वर्णकूलावलोकनाधिकार तृ
तीयः॥ गाथा ६॥ २ ॥

अथनाश्री मायाजालाभिसंबोधि क्रम श्री
गुरुपरंपरयानुच्चने सचश्री मायाजाल
बोऽशासाहस्यांनः पातां नत्रादौनावत् मं
त्रमुक्तचर्योचारी ऽमांभगवतो मंजुश्रीज्ञान
सत्वस्य सर्वतथागतज्ञानकायस्य ज्ञानम्
र्नि रहय परमार्थनामसंगीतिं नामधृग्
मणिः। साक्षात्कर्तुकामो वोधि सत्वो ऽ
हंवो वक्षेऽम सर्वसत्वधातु परित्राणान्
यो महाबोधि हृत प्रणिधानचित्तः प्रजो

पायात्मकश्चतुर्भिः संग्रहवस्तुभिः सत्वान्संगृ
ह्य अनुत्तरायां सम्यक्संबोधौ चित्तमुत्पादय
न्नयथाचाह ॥ ॥ समन्वाहरन्नमो स
र्वबुद्ध बोधिसत्वा अहममुकनामा इमांवेला
मुपादाय यावद्बोधिमण्डनिषीदात् ॥
उत्पादयामिपरमं बोधिचित्तमनुत्तरं ॥ य
थाह्येयधिकानाथा सम्बोधौकृतनिश्चयः
॥ त्रिविधां शीलशिक्षांच कुशलं धर्मसंग्रहम्
॥ सत्वार्थंचक्रियाशीलं प्रतिगृह्णाम्यहंदृढं
ढं ॥ वज्रं धर्मश्च सङ्घश्च त्रिरत्नाग्रमनुत्तरं ॥
अद्यप्रेणगृहीष्यामि सम्वरंबुद्धयोगजं ॥
वज्रघण्टाञ्चमुद्रांचप्रतिगृह्णामितत्वतः ॥आ
चार्यश्चगृहीष्यामि महावज्रकुलोद्भवे ॥चतु
र्शनंप्रदास्यामि बुद्धत्वानुदिनेदिने ॥ महा
रत्नकुलेयोगे समयेचमनोरमे ॥ सद्धर्मप्र
तिगृह्णामि वाद्यंगद्यं त्रियात्मकं ॥ महाप

गजलेभद्रे महाबोधिसमुद्भवे॥ सम्वरं सर्वसं
वरं प्रतिगृह्णामितत्वतः॥ पूजाकर्मयथाश
क्त्या महाकर्मजलोच्चये॥ उत्पादयामिपरमं
बोधिचित्तमनुत्तरं॥ गृहीतंसम्वरं कृत्वा स
र्वसत्वार्थकारणात्॥ अतीर्णांतारयिष्यामि
अमुक्तांमोचयाम्यहम्॥ अनाश्वसांश्वाश
यिष्यामि सर्वसत्वांस्थापयिष्यामिनिर्वृता
विति॥ संवरग्रहणपूर्वकं बोधिचित्तोत्पाद्य
पश्चात्कारमिसम्बोधिंभावयेदनेनक्रमेण॥
प्रथमं तावदादर्शज्ञानंप्रतिविम्बयोगेनभा
वयेत्॥ तथापरिशुद्धादर्शनिमराउले नद्दे
शकालसंनिहिताः॥ पदार्थजानयःप्रतिभा
सन्ते तथासुविशुद्धधर्मधातुनिष्यन्दमहा
बोधिचित्तेदेशयोनिभेदभिन्नान्। सत्वधा
तून्वईपत्। तत्रतान्सुनिर्मलेआदर्शन
ज्ञानेदृष्ट्वा। तऽपरिसत्वालम्बनांकरुणा

मुत्पादयेत् ॥ अहो बतामीसत्वा अनाथा अ
शरणा अपरायणा दुःखिताः संसारार्णवनि
मग्ना तेषां सत्वानामर्थाय यथाहमात्मानं स
र्वैरासर्वं सर्वथा सर्वदुःखेभ्यो मोचयामि
॥ तथा सर्वसत्वानपीत्यादर्शनज्ञानसर्व
सत्वान् संहृत्यापश्यन् ॥ ततः समताज्ञानम
धिगच्छेत् ॥ सर्वधर्मनैरात्म्ये समतायोगेन
यथासर्वधर्मा शून्या अनात्मानस्तथाहम
पिशून्यानात्मेति विभाव्य सर्वधर्मनैरात्म्यं
प्रविशेत् ॥ यथाआत्मानंप्रजानाति सर्व
सत्वा यथासर्वसत्व तथाप्रजानाति सर्वध
र्मानित्यादि ॥ ततः सर्वधर्मनैरात्म्यस्व
भावाधिगमात् धर्मोद्वेगाच्चनां करुणां
समताज्ञानेनोत्पादयेत् ततश्चाकारो
मुख सर्वधर्माणामाद्यनुत्पन्नत्वादिति म
न्त्रमुच्चार्य मंत्रा सत्वार्थं भावयेत् । मंत्री

निखिलेन समासतः विभाव्य धर्मनैरात्म्य
मनालम्बनया सह · एवंप्रत्यवेक्षणाऽमिता
भस्वभावं ॥ अविशुद्धधर्मधातु शून्यता ज्ञा
नं भावयत ॥ तत्र सर्वसत्त्वार्थक्रियावि
रहितो योगी पूर्वप्रणिधानाहितचित्त स
मज्ञानबला दुत्थापितः ॥ अनालम्बनया
महाकरुणाया कृत्वा ऽनुत्तरज्ञानं साक्षात्
कर्यात् । निर्विकल्पकज्ञानपरिलब्धश्च
लौकिकज्ञानत्वात् · तस्यैतावत्सकलसत्त्वा
र्थपरिसमाप्तेः ॥ तच्चप्रस्थानलक्षणं बोधि
चित्तं संजनि परमार्थस्वभावं प्रकृतिवैद्य
वदानिकं चित्तमिति वेदितव्यम् ॥ ततो यो
गिनश्चित्तं मायोपमाकार माकाशदेशस्थं
प्रकृतिप्रभास्वरं तारकाकारं विचिंत्य तदु
त्पन्नं क्रोधज्वालाकारं नीलवर्णमनेकर
श्मिशतसहस्रं परिवृतं समन्तभद्रं पर

आनन्दमात्मानं दहनहूँकारं विचिन्तयेत् ॥
तस्माद्हूँकारादनेकाकाररश्मयो विनिः भृ
ता स्तेभ्यश्च रश्मिमुखेभ्यः सर्वतथागता स्तै
श्च सर्वतथागतैः सर्वबुद्धक्षेत्राणि गत्वाऽ
शेषावशेषेषु सर्वलोकधातुषु सर्वसत्वधा
तून्संशोध्य बोधिचित्तोत्पादादिकृत्वा या
वत्सर्वबुद्धिकर्विना च संदर्श्य पुनराग
त्य तस्मिंहूँकारे प्रविशन्तं चिन्तयेत् ॥ त
त्परिणतं नीलादिषड्वर्णाभिरत्यादि
षड्बुद्धक्षेत्रव्यापितं ज्वालामालिनं स
र्वमारादिदुर्दर्षं वज्रमुखं पञ्चभ्रुचिकंरा
नवज्रं भावयेत् ॥ तस्यवज्रवरटकान्तर्ग
तं अर्कं अँकारे विचिंत्य तत्परिवृतंच
ज्वलत्प्रभं त्रिसाहस्रमहासाहस्रलोक
धातुप्रमाणाश्चैत्यं विभाव्य तस्यगर्भेहीं
कारेणाधर्मोदया तदुपरि अकारेणावि

श्रवजं तेनच वज्रमयी अक्ष वर्णभूमीम
धिष्ठेत् ॥ ततो ॐकारेण वज्र माणिक्यशि
खरकूटागारं विचिन्तयेत् ॥ तश्चकिंवि
शिष्टमित्याह ॥ चतुरस्रंचतुर्द्वारं चतु
स्तोरणाभूषितं । ध्वजापताकादि
स्रग्चामरविभूषितं ॥ कोणेषु चैवस
र्वेषु द्वारनिर्यूहसौधेषु । खचितंवज्र र
त्नैस्तु अर्द्धचंद्रेणासंयुतं ॥ हारार्द्धहार र
चितं विचित्ररूपशोभितं । रत्नोभिश्च
वर्णैश्च संस्थिवैद्वाधमण्डलं ॥ तस्य
चक्रप्रतीकाशं प्रविशेत्स्वत्तरं ततः ।
वज्रधात्वभिधानाख्यं द्वितीयं विन्यसेत्त
तः ॥ वज्रमालापरिक्षिप्त मष्टस्तम्भो प
शोभितं । रत्नोभिः पञ्चभिश्चैव हारा
र्द्धादिविभूषितं ॥ मण्डलस्यतु बाह्यस्य
यऽर्क्षं सर्वरक्षणं । सर्वनस्यापि येन

कर्यान्त्समासेन विशेषतः ॥ एकमेवन कु
र्यादे तोरणाद्वारसंधिस्थ । अतश्चतस्र
द्वाराणि। तोरणानि नकल्पयेदिति ॥ आ
सनैक्यसेत्पश्चा द्देवतानां यथाक्रमात्।
तत्रमध्येन्यसेच्चैव प्रधानस्येतु आसनं ॥
पूर्वादिदिक्षु सर्वासु अक्षोभ्यादीनांच वि
स्तरं। स्वबीजपरिनिष्पन्नं कल्पयेत्रच्चयो.
गवित्॥ तत्रासनंविकल्पेन मध्येसिंहा
सनंवरं। पूर्वेगजासनंज्ञेयं दक्षिणेतुरगा
सनं॥ पश्चिमेमयुरासनं उत्तरेगरुडा
सनमिति ॥ सत्त्ववज्त्राद्धारभ्य यावद्वज्रा
वेशपर्य्यन्त मकारपरिनिष्पन्नानि वि
चिन्तयेत् ॥ ततश्चप्रधानासने आकारे
ण परिनिष्पन्न महावैरोचन । यदेवचि
त्तं प्रकृत्याह्यकाश आकारविरहात. धर्म
धातुस्वभावं . तदेवचनुर्म खं शून्यता(

दि चतुर्विमोक्षमुखं धर्मधातोरालम्बन
त्वेन सर्वसमाधिप्रसूतिहेतुत्वात् ॥ शुक्ल
वर्णं धर्मधातुस्वभावत्वात् जटामुकुटोपे
तं निराभरणं च ज्ञानचित्तत्वाद्वोधंगीस
ऽयुतं । प्रज्ञोपायात्मकत्वात् नमेवं भूतं
महावैरोचनमात्मानमधिमुंच्य ॥ चतुर्वि
ज्ञासनयोगेन तद्धृदये चन्द्रमण्डलं तदु
परि धीःकारेण परिनिष्पन्नं आदिबुद्ध
भगवन्तं पञ्चमुखं पञ्चशीर्षमिति । प
ञ्चचीरं तदेववन्धनात् । पञ्चचीरकशो
णवरं शुक्लवर्णोपेतं · पूर्वे नीलं · दक्षिणेपी
तं · पश्चिमे रक्तं · उत्तरे हरितं मूर्ध्नि प
रमाश्चमुखवदवस्थितं · मुखं श्वेत ज्ञा
नजटामाराभरणं वर्णोपेतं । सभृंगारवि
चित्र वस्त्रपरिधानमष्टभुजं शतसहस्र
प्रज्ञापारमितां चतुर्भि विभज्य चतुर्भिः

करैः हृदिसंधार्यमानं अपरैश्चतुर्भिः क
रैः प्रज्ञारवङ्गप्रहरणाभिनयेन धार्यमानंच
तुर्थ्यासनव्यवस्थितं भावयेत् ॥ इमांश्चा
दर्शनयागतभूमिमुपलक्षितां गाथागि
रांपते र्भावतेस्मेति सम्बन्धः ॥ ॥

इमांश्चरामंचराजानं संयुक्तामद्वयो
दया ॥ अनुत्पादधर्मिणीगाथा
भावतेस्म गिरांपते ॥ १ ॥

किंभूतां वरामन्त्रराजानं संयुक्तामितिव
क्षमाणा मरामंत्रोपेतां किमात्मिकां ॥ अ
द्वयो द्वयस्यामिति · द्वयं ग्राह्य ग्राहकं च ता
न्नविद्यतेत यस्य तदद्वयं । उदेत्यस्मादि
त्युदयं · अद्वयस्योदयः अद्वयो द्वयः स
विद्यते यस्यां गाथायां सा ऽद्वयोदय
गाथां · भावतेस्म ॥ १ ॥

पुनरपि किंविशिष्टामनुत्पादधर्मिणी

गाथामित्याह ॥

अआइईउऊ एऐ ओऔ अं

अः स्थितो हृदि ॥ ज्ञानमूर्त्तिरहं ब्रो

ब्रो ब्रह्मणां अक्षवर्त्तिनां ॥ २ ॥

धर्मधातुस्वभाव शून्यतास्वभावमित्यर्थः

॥ श्रीवज्रमराडालंकारेतंत्रे द्वादशतथाग

तभूमयः पठ्यन्ते ॥ समन्तप्रभामराडल

भूमिं सूर्य्यमराडलवच्चसा । अमृतप्रभा

द्वितीयातु चंद्रवत्सुप्रभास्वरां ॥ गगनप्र

भातृतीयातु गगनभूमिप्रतिष्ठिता । वज्रप्र

भानुयाभूमि चतुर्थी सामनोरमा ॥ तस्या

आसययोगेन वज्रेतिपरिकल्प्यते । पञ्च

मी रत्नप्रभानाम अभिषेकेप्रतिष्ठिता ॥

षष्ठी पद्मप्रभानाम पद्मवत्सुविराजते ।

प्रभावशुद्ध धर्मत्वा त्तिर्मलानि व्यारिग्रह

। सप्तमी कर्मप्रभानाम शुद्ध धर्मकरीस्मृ

ना। अष्टमी अनुपमानाम उपमानञ्च न वि
द्यते ॥ नवमी निरुपमानाम सर्वोपमाप्रति
बोधकः। दशमी प्रज्ञाप्रभानाम बुद्ध भूमी
रुच्यते॥ एकादशी सर्वज्ञप्रभानाम भूमिप्र
भास्वरः। द्वादशी प्रत्यात्मवेद्यानु योगीज्ञान
प्रभूरिकेति॥ एताद्वादशतथागतभूमयो
अकारादि द्वादशाक्षरैः परिनिष्पन्नावेदि
तव्याः॥ बुद्धानां अधिवचनमिति अ
तीतानागतानां बुद्धानां हृदये स्थितो ह
मिति। सर्वतथागतहृदये विहारित्वात्॥
ज्ञानमूर्त्तिरिति ज्ञानकायस्वभावत्वात्बु
द्ध इति॥ २ ॥

ॐ वज्रतीक्ष्णदुःखछेद प्रज्ञाज्ञा
नमूर्त्तये ज्ञानकाय वागीश्वर अस्त्र
पत्रनायनेनमः॥ ३ ॥

यथास्थितपदा द्बोधादिदानीं नमा

दिव्यहृदये प्रज्ञाचक्रं चिंतयेत् ॥ किं विशिष्टमित्याह · प्रतीत्य समुत्पादार्थसूचिकं · तथाचाह ॥ आरैः संधार्यते नाभिर्नाभौचारप्रतिष्ठितौ । प्रतीत्योत्पादयोगाच्च चक्रमेतत्प्रवर्त्तत इति ॥ अकारेण परिनिष्पन्नं सर्वरोगोपेतमारषट्कं चतुर्मेखलासंयुक्तं · सुविभक्तनाभिमध्ये अकारं विचिंत्य भगवतो ज्ञानसत्वस्य मूलमंत्रादयो मंत्राश्चतस्रः षु मेखलासु · सितवर्णा एवंभावनायां तत्रमेखलायां ॐ सर्वधर्मास्वभावविशुद्धवज्रओआ अंअः ॥ तस्यैवद्वितीयमेखलायां द्वादशानंतथागतभूमि अभिधायकां द्वादशस्वरां विचिन्तयेत् ॥ ततः प्रथम मनि परिणये · यथावत्मंत्रबद्ध विन्यास क्रम वर्णक्रमेणाकर्षान्त । तद्यथा प्रथमे ·

ॐ वज्रतीक्ष्णायनमः ॥ द्वितीये ॥ ॐ दुःखछे
दायनमः ॥ तृतीये ॥ ॐ प्रज्ञाज्ञानमूर्त्तयेनमः ॥
चतुर्थे ॥ ॐ ज्ञानकायायतेनमः ॥ पंचमे ॥ ॐ
वागीश्वरायतेनमः ॥ षष्ठे ॥ ॐ अरपचनाय
तेनमः ॥ चक्रवहिर्मन्त्रं भगवतः सर्वतथा
गतज्ञानकायस्यनाभौमंत्रंन्यसेत् ॥ अआः स
र्वतथागतहृदय हरहर ॐ क्रूँ ह्रीँ भगवन्ज्ञा
नमूर्त्ते वागीश्वर महावाचसर्वधर्मगगनामलो
सपरिशुद्धधर्मधातुज्ञानगर्भआः ॥ वहिर्द्वि
तीयायां मेखलायां ककारादिहकारपर्यंतं
निवेशयेत् ॥ इत्ययंचक्रस्य मंत्रविन्यासः ॥
तस्य मध्यवर्तिनं मकारं भगवन्तं षण्मुखं
ज्ञानसत्वं शारदशशांकप्रभमिन्द्रनीलाभ
सच्छवीं ज्वालाकेसराललक्षायाप्रभामण्ड
लंसर्वतथागतमयाभरणा समाधिसमाप
न्नं विचित्रपद्मासनोपविष्टं उभयकराश

क्रनीलोत्पलहृदयस्थितप्रज्ञापारमिताप्रस्तकव
यसान्नसोपितमात्मानंविचिन्यहृदयेचन्द्रम
एडलंविभाव्य ॥ तदुपरिप्रज्ञापारमितास्वभा
वं सर्वज्ञज्ञानोदयाकारं सर्वश्रावकप्रत्येकबुद्धा
नांमूर्त्तिभूतं ॥ सर्वमहाबोधिसत्वानां पुण्यज्ञानसं
भूतं परमार्थाक्षरं सर्वाक्षराणांकाराणांभूतम
कारविन्यसेत्तत श्चक्रसिनानि यानि मंत्राक्षरा
णि यथोक्तमंत्रोपेतानि भक्षान्यज्ञानशैलाधिव
र्मनक्षत्राणि गभस्तिमालान्तविचिंत्य । तेश्वर
श्मिभिःस्वशरीरमुद्यानंविभावयेत् ॥ उद्या
नाच्च तेरश्मयश्चतुर्मुखेभ्योनिर्गत्य सहलो
कधातुमवभास्य तनःपञ्चभ्यश्चक्रेभ्यः पञ्च
र्णोविनिस्रत्य सर्वाकाशधातुसमवसरणा
नि नानाबुद्धक्षेत्राणिगत्वा तेषुबुद्धक्षेत्रे
ष्वशेषानवशेषसत्वधातोरर्थं कृत्वा सर्व
तथागतबुद्धबोधिसत्वपर्षदमवभाष्य

तेषां वक्त्रेणाविशन्तं दृष्ट्वा प्रदक्षिणीकृत्य
तत्त्वज्ञानमाकृष्य धर्मनैरात्म्यसमतास्व
वक्त्रे प्रविश्य स्वहृत्पद्मस्थित मंत्राक्षरेण सह
कीभूया वस्थितं विचिन्तयेत् ॥ एवमनवरत
भावनाभिरतो मंत्रमुखचर्याचारी बोधिसत्व
भगवतोमञ्जुश्रीज्ञानसत्वस्य रूपमालम्ब्य
स्थिति ॥ ज्ञानकायेन तद्रूपमनुविचिन्तयेदि
ति ॥ चंद्रमण्डलरूपेणा तद्रूपमनुध्यायीत्रि
ति ॥ अकाररूपेणा एवंविधाकारेणा भावये
त् ॥ तमेवनिर्वाणरूपकायेन नचिरादेवबि
नयवशमुपादायक्षपति ॥ गगनतलगतां
श्चसर्वबुद्धबोधिसत्वान्निर्म्माणरूपकाय
सङ्गमनाक्षपति इति ॥ तत्रश्चभावना
वशादिहैवजन्मनि बुद्धत्वं वज्रधरत्वं प्राप्नो
ति ॥ इत्यनेनक्रमेणा मायाजालोभिसं
बोधिक्रमः सूचितः ॥ ॥ इतिभि

दानींकुलभेदेनचापराणि षट्प्रज्ञाचक्राणिपि
उच्यन्ते ॥ तत्रपूर्ववत् । सर्वमादियोगंकृत्वा
भगवन्तंमहावैरोचनं स्वमराउलमध्ये व्यवस्थि
तः । अवक्रूयतत्स्थानेअमितासंरक्तवर्णहीः
कारोद्भवंसमाधिस्थंविचिन्यतहृदये आदित्य
कुंतथैवध्यात्वातद्धृदिचाष्टारंचक्रंचतुर्भिःखा
दनंमूलमंत्रादिपरिवेष्टितंविचिन्तयेत् ॥ त
तश्चारेखास्वरान्वीजानि ॥ ॐ वज्रतीक्ष्ण
यनमः ॥ इतिविन्यसेत् ॥ चक्रनाभिमध्ये व
ज्रतीक्ष्णं रक्तवर्णं वालाभरणान्वितं पञ्चची
रकशेखरं । विचित्रवस्त्रसंवीतं हीकारपरिण
तं वामहस्तेपद्मधरं दक्षिणेप्रज्ञाखड्गधरंवि
चिंत्य ॥ तद्धृदिपूर्ववच्चन्द्रमराउलोपरिहीका
रंविभाव्य ॥ पूर्वोक्तस्फरणासंहरणक्रमे
णाकृत्वाभावयेदिति ॥ पुनस्तथैवाक्षोभ्य
मराउलंतस्यमध्येनीलवर्णहूँकारजनितंभू

स्यर्शमुद्रामुकं ध्यात्वा ॥ तद्धृदयेचादिवृद्धं तथे
वचाष्टारचक्रंविभाव्य पूर्ववन्मंत्रविन्यासंकृत्वा
ॐ ङः वज्रहृदयाय नमः ॥ इतिअष्टौबीजानिचा
रेषुनिवेश्य मध्येभगवंतं वज्रखड्गंकारेणू
तं नीलावर्णकुमाररूपं सर्वालंकारभूषि
तं पश्चचीरंचीनपटंपरिधानवामेनवज्रं द
क्षिणेनखड्गधरंविभाव्य ॥ तद्धृदिचंडमहा
रोषणंहूँकारं ध्यात्वा तथैवस्फुरणादिकंकृ
र्यादिति ॥ पुनरुक्तथैवमध्येवैरोचनसित व
र्णंविघ्नेशमुद्राभृतं आः परिवारसहितंवित्वि
न्य तद्धृदयेआदिवृद्धं तथैवदशारचक्रं
मंत्रैर्विदर्भितंकृत्वा ॥ ॐ प्रज्ञाज्ञानमूर्तये
नमः ॥ इतिबीजाक्षराणिदशसुचारेषुनि
वेश्य चक्रमध्ये भगवंतं प्रज्ञाज्ञानं शुक्लव
र्णं पञ्चचीरंकुमाराभरणोपेतं विचित्रा
म्बरधरं वामेनचक्रधरं दक्षिणेनप्रज्ञाख

ऊर्ध्वं आकारपरिणतं विभाव्य तद्धृदि चंद्रं
तदुपरि आकारं ध्यात्वा तथैव स्फुरणादिकं कुर्या
दिति ॥ तथैवामोघसिद्धिमरुद्गणं हरितवर्णं
भयमुद्रान्वितं अकारबीजोद्भवं ध्यात्वा । तद्धृ
दये आदिऊर्ध्वं तथैवविचिन्त्य चक्रमध्ये पूर्ववं
मंत्रादिविन्यासं कृत्वा ततश्चारयेत्सुधीः ॥
ॐ ज्ञानकायायनमः । इतिविन्यस्य चक्रमध्ये
भगवन्तं ज्ञानकायं हरितवर्णं कुमाराभरणोप
शोभितं ऊर्ध्वं अकारपरिनिष्पन्नं वामेन
विभ्रद्वज्रं धरं दक्षिणेनखड्गधरं विचिंत्य ॥ तद्धृ
दिचंद्रं तदुपरि आकारं ध्यात्वा तथैवस्फुरणासुह
रणांकृत्वा भावयेदिति ॥ ॥ पुनरपि तथैव
रत्नसंभवं पीतवर्णं वरदमुद्रोपेतं मीनासनसंभू
तं मरुद्गणमध्ये ध्यात्वा तद्धृदये आदिऊर्ध्वं चक्र
मध्ये मूलमंत्रादिसंयुक्तं तदक्षरेषु ॥ ॐ वागी
श्वरायनमः ॥ इतिबीजानिविन्यस्य चक्रनाभौवा
गीश्वरं पीतवर्णं सर्वाभरणोपेतं पंचचीरकं
विचित्रवस्त्रपरिधानं ॐकारबीजजातवामे

नरत्नधरं दक्षिणोन्नतभुजाचतुष्टयं ध्यात्वा तत्तद्दि
चंद्रमराडलोपरि ॐ कारं विभाव्य तथैव स्फुरणा
दिकं कुर्यादिति ॥ ॥ तथैव वोधिचित्तवज्रध्वे
तवर्णं शृंगाररसोपेतं पञ्चकुलमुकुटं वज्रगर्भा
दिव्यं सर्वालंकारविभूषितं वज्रैश्वरपाठधारिणीअ
कारेणापरिणतं तथैवमेराडलमध्ये विचिंत्य त
द्धृदये भगवन्तमादिबुद्धं तथैवविभाव्य तद्धृदि
चक्रनवारं मूलमंत्रादिरेखेदितं ॥ ॐ अरपचना
यतेनमः ॥ इतिनवबीजाक्षरराशिचारेणविन्यस
चक्रनाभौ भगवन्तमरपचनंश्यामवर्णं बालाभर
णभूषितं पंचचीरं विचित्राम्बरपरिधानं अ
कारपरिनिष्पन्नं पुलकरवज्रपाणिं विचिंत्य तद्
दये चंद्रोपरि अकारं ध्यात्वा पूर्ववत्स्फुरणा ले
हरणीनिलयं हृदीभावादिकं कृत्वा कर्मादि
ति ॥ सर्वत्रयोजनीयं अयमपिकुलभेदेनश्रीमा
यात्रालाभिसंबोधिक्रमश्रीकालीदितत्व ॥ ॥
अतस्त्वयंनामसंगीतोसत्रचक्राणिभवन्ति ॥
तानिचगुरूपदेशाद्वेदितव्यानि ॥ एतावान्मा

याजालाभिसंबोधिक्रमः ॥ ॥ इतिनामर्स
तिटीकार्यानामर्मत्रार्थावलोकिन्यां माया जाला
भिर्संबोधिक्रमस्याधिकारश्चतुर्थः ॥ ॥

गाथा श्लिस्त्रः ॥ ३ ॥

नयथाभगवान्वज्रः सम्वज्रोऽकारसं
भवः ॥ अकारः सर्ववर्णाग्रो महार्थ
परमाक्षरः ॥ १ ॥

अथेदानिं वज्रधातुमहामण्डलमारेणा बोधिचि
त्तवज्रस्य स्फरणादिकमित्याह ॥ नयथाभगवा
नित्यादि ॥ भगवान्वज्रः संवज्रः इति गतार्थः ॥
अकारसंभवइति । अकारात्जातः भगवतोजा
नसत्वस्य परिशुद्धज्ञानकायस्वभावत्वात् तस्य
हृत्पद्मराजोपरि यो सावकारस्तस्येदा
नीं विशेषमाह ॥ सर्ववर्णाग्रइति । अग्रभो
ग्रः सर्ववर्णानां सर्वाक्षराणां अग्रः श्रेष्ठस्त
त्प्रधानात् महार्थइति । महाश्चासावर्थश्च म
हार्थः सकलजगद्धितार्थानर्हत्वात् । परमा
क्षरइति । अपरपर्यायेनरक्षतीत्यक्षरः ॥

भूतकोटिरूपेणाविचारितत्वात् । परमश्वासावर्थ
श्चेति परमाक्षर इत्यनेनक्रमेणाज्ञानसत्वाश्र
---प्रणिधानमुक्तं । तदेवैकैकं तच्चयोगीनां
स्वचित्तादयः सकलमराडलयदेवतास्वभावः स
मस्तविपक्षैतयाचशून्यताविमोक्षमुखलक्षणं
।एवंनिमित्तंमिथ्याप्रणिधिविपर्यासोभिसंस्का
रप्रतिपक्षभावेनक्रमादनिमित्ताप्रणिहितानभि
संस्कारप्रतिपक्षभावेनक्रमादनिमित्ताप्रणिहि
तानभिसंस्कारविमोक्षमुखात्मकानुक्रमेणा
सत्वबज्रादिकुलमातृस्वभावमधिकृत्याह ॥
१ ॥

महाप्राणोत्पन्नुत्पादो वागुदाहारवर्जि
तः॥ सर्वाभिलाषहेत्वग्रः सर्ववाक्सु
प्रभास्वरः॥ २ ॥

महाप्राणोत्पन्नुत्पाद इति । सत्वचक्रीस्वभावेन । त
त्रमहाप्राणो हि स्यानुत्पादस्वभावस्यस्वधर्मधा
तुस्वभावत्वादादर्शज्ञानहेतुत्वाच्च । वागुदाहारवर्जि
तः इति । रत्नचक्रीमुखेन वाचामुदाहारो वागुदा

हार सेन वर्जितो रहितः। समेताज्ञानेन वाग्व्यवहार
भावात्॥ सर्वाभिलाषहेत्वग्र इति। धर्मस्वीकारे
ण अभिलषनं अभिलाषः सर्वेषां धर्माणां स्कन्धा
दीनामभिलाषः सर्वाभिलाषः तस्य हेतुकारणा
त्मदेक्षणज्ञानं अनत्ववाग्रः प्रधानमित्यर्थः॥
सर्ववाक्सुप्रभास्वर इति॥ कर्मस्वीकरूपे
ण सर्वश्चासौवाक्तश्च सर्ववाक्। यथादेव
रूपेभिरित्यादि॥ अनत्वक्सुप्रभास्वर इति
॥ यथाभव्यतयासर्वसत्वसंतानेषुप्रतिभासा
दयात्॥ अनेकसुखधर्मदेशनायाश्च कृत्या
नुष्ठानज्ञानस्य भावत्यात्। अनत्वेनाश्वनस्रो
वज्रादिपारमिता अआओअंअः। इतिश्वनु
भिरित्यरैः परिनिष्पन्नत्वादिति॥ ततश्चय
देवावनं धर्मधातुस्वभाव प्रकृसा ग्रात्मया
हकाग्राकार विस्फारनदेवागनुकमलाभाव
प्रभास्वरत्यात्। ज्ञानाभरोदय निमित्तादा
च्चादर्शज्ञानात्मकं धर्मलक्षणा कृपाग्रात्मतया

सज्ञानान्तरभेदान्अपरामृष्टोद्भासमताज्ञानं ॥ सर्वज्ञ
यविपर्यासात्सत्यवेक्षणाज्ञानं ॥ समस्तलोकहितहे
तुत्वात्कृत्यानुष्ठानज्ञानात्मका अतस्त्वयथाक्रमं
सास्वताद्यपिपतिस्वभावं ॥ २ ॥

महामहमहारागः सर्वसत्वरतिंकरः ॥ म
हामहमहाद्वेषः सर्वक्लेशमहारतिः ॥ ३ ॥

अतस्वाह ॥ महामहमहारागमित्यादि । अत्रचा
दावमित ॥ तस्योपादानरागस्यप्रधान्यख्यापनार्थः
।अतस्वाह ॥ रागोद्वेषश्चमोहेति ॥ सर्वतथागतं
सर्वाकाशव्यापिपूजनसंदर्शनंकालु महामह ई
त्युच्यते ॥ महच्छब्देनपूजाभिधीयते । महान्मंको
महारागः ॥ महामहश्चासौ महारागश्च महामह
महारागः ॥ महारागइति ।सत्वपाचनमोचनल
क्षणः ।सभगवान्श्रीवज्रसत्वःमहारागोहिभू
गवान् वज्रसत्वस्तथागत इतिवचनात् ॥ सव
सत्वरतिंकर इति । रागचरितानां सर्वसत्वा
नां रतिंप्रीतिं महासुखात्मिकां करोतीति सव

सत्वरनिंकरः॥ अयमभिनाभस्वभावः॥ देवच
रितानधिकृत्याह। महामहमहादेव इति। महा
महेति गतार्थः। महादेवोऽक्षोभ्यः सर्वक्लेश
महारिपुरित्यर्थः
॥ मोहचरितानधिकृत्याह॥ महामहमहामो
ह इति॥ महामहेति पूर्ववत्। महामोहो वैरोच्च
नः॥ धियामोहः धीमोहः मूढश्चासौ धीमोह
श्चेति मूढधी मोहः तस्येस्वदेनो विनाशकः॥
क्रोधचरितानधिकृत्याह॥ ३ ॥

महामहमहामोहो मूढधी मोहस्व द
नः॥ महामहमहाक्रोधो महाक्रोधरिप
र्महान्॥ ४ ॥

महामहमहाक्रोध इति॥ नथैवमहामहेति म
हाक्रोध इत्यनेनाभिसंधिः। महाक्रोधरिपुर्महान्
ति। सत्वासत्वविशेषणात्। महाक्रोधः सर्वम
हारिपुरिति॥ ४ ॥

महामहमहालोभः सर्वलोभनिषूदनः

महाकामोमहासौख्यो महामोहो महा
रतिः॥ ५ ॥

लोभचरितानधिकृत्याह ॥ महामहु महालोभ इ
ति ॥ महामहेतिपूर्ववत् । महालोभोरत्नसम्भवः।
सर्वसुखेन सर्वसमाधिहेतुत्वात् । सर्वलोभनिषू द
नः इति । सर्वलौकिकलोकोत्तरशोधनार्थत्वात् ॥
शून्यतादिचतुर्विमोक्षमुखानां धर्मधात्वायतनमु
खेन सर्वसमाधिहेतुत्वात् । तदेवचाध्यात्मविषयसि
प्रतिकूलतयाध्यात्मशून्यताकारे । वाह्योपलम्भो
पगमाद्बहिर्द्धाशून्यतास्वभावं तदाश्रयशरीरमु
पलम्भस्वभावतयाऽध्यात्मबहिर्द्धाशून्यतात्मकं
॥भाजनलोकाध्यवसायरहितवेनमहाशून्यताल
क्षणं ॥ ततस्वादर्शज्ञानाश्रय वज्रसत्वादिचतु
ष्कयात्मकमित्यतआह ॥ महा कामो महासौख्यो
महामोहो महारति । तत्रमहाकाम इति । वज्रसू
त्वः काम्यत इतिकामः अभिलक्षणीय इत्यर्थः।
महासौख्य इति वज्रराजः । महामोह इति वज्रराग

महारतिरिति वज्रसाधुः ॥ अतस्त्वचक्षुरूपादिवा
सना परावृत्तिस्वभावादर्शज्ञाननिष्पन्नेरयात्मात्म
पलम्भाधिष्ठानत्वात् । यथास्त्वंविपर्यासेविपक्ष
तया बोधिचित्तोदयाकर्षोजरागेनसाधुभावहेतुत्वा
त्तेषां यथाक्रमं ॥ एवंतदेवशून्यताज्ञानेप्यनिन
त्वात् । शून्यताशून्यतापरमार्थनिमित्तापरमार्थ
परमार्थशून्यतासंस्कृतशून्यसंभारनिमित्तापरि
ग्रहात् संस्कृतशून्यताअसंस्कृतेपि बोधिसं
भारनिमित्तानुग्रहात्असंस्कृतशून्यता॥ ५ ॥

महारूपोमहाकायो महावर्णोमहाव
पुः॥ महानामामहोदारो महाविपुला
मण्डलः॥ ६ ॥

अतआह। महारूपोमहाकायो महावर्णोमहाव
पुः। महानामामहोदारो महाविपुलामण्डलः॥ इ
ति। तत्रमहारूपो महाकाय इति वज्ररत्नरूप
इति। रूपविनाप्यत इत्यर्थः। महद्रूपंयस्यासौ
सो महारूपः। महत्वं चिन्तामणिरूपतया सर्व

तथागतानांचैवतुकधर्मराज्याभिषेकात्मकत्वात् ॥
अतश्चमहाकायः । अमेयबुद्धक्षेत्रावभासणा
त्वात् । महावर्णोमहावर्णइति । वज्रसूर्यः । म
हांश्चासौवर्णश्चमहावर्णः अथवर्णोपेतत्वात् ।
महत्पर्यस्यमहावर्णः । अविशुद्धधर्मश्रुतचि
न्ताभावनानयज्ञानप्रभाभराउलत्वात् । महा
नामहोदार इति । वज्रकेतुः । महानामोयस्यो
सौ महानामा महाकीर्तिरित्यर्थः । अनीदानग
मितायाःप्रकर्षगमनात् । ततश्चमहोदार इ
ति । महाश्चासावुदारश्चमहोदारः ॥ सर्वदद
त्वात् । महाविपुलमराउल इति । वज्रहासः ॥ म
डिभूषार्थो । मराउयतीति मराउः मराउलाति
गृह्णातीतिमराउलं । विपुलंविस्तीर्णं सकललोक
धातुव्यापकत्वात् । महाविपुलमराउलं सारंयस्य
स महाविपुलमराउलः । त्रैलोक्यभास्करत्वात् ॥
ततश्चसमताज्ञानपरिकररत्नादिचतुष्टयात्मक
क्लिष्टमनः परावृत्यात्मनि समताज्ञानः । ग्राहका

दिभ- नयथोक्तनिमित्ताभावात्। यथार्वविपक्ष
प्रहाणाद्वारेणाच। अभिवेकतेजोभिर्दीक्षादानपूर्व
मितानियोजनप्रामोद्यनिष्प्रतिकारणात्वाच्च ते
षांवज्ररत्नादीनांक्रमः॥ तदेवाभक्तिकसत्वार्थप्र
णिधानाभिनिवेशात्॥ अत्यंतशून्यताअनवरायो
मयासंसारोनपरित्यक्त इति॥ प्रणिधानानवय
वात अनवराग्रशून्यता। निरुपधिशेषोगपिनि
र्वाणधातौमयाऽशेषेनावकारणीयं। इत्यभि
निवेशादनवकारशून्यता। प्रकृतिलक्षणावागा
त्र शोधनीयमितिप्रार्थनाविरहात् प्रकृतिशू
न्यता॥ ६॥

महाप्रज्ञासुधधरो महाक्लेशांकशोयरणी॥
महायशामहाकीर्त्तिर्महाज्योतिर्महाद्युतिः॥
॥ ७॥

अतएवाह। महाप्रज्ञायुधधरो महाक्लेशांकशोय
रणी॥ महायशामहाकीर्त्तिर्महाज्योतिर्म हाद्युति
रिति॥ तत्रमहाप्रज्ञायुधधर इति। वज्रधर्मप्रज्ञाप्रत्य
वेक्षणाज्ञानं तदेवायुधं शस्त्रंधारयतीति महत्

प्रज्ञायुधधरः । तत्स्वभावत्वात् । महांश्चासौ प्रज्ञायुधधरः महाप्रज्ञायुधधरः । महाक्लेशांकुशोग्रणी इति । वज्रतीक्ष्णः । क्लेशरागादयः ॥ तेषामङ्कुशोभूतत्वात् क्लेशांकुशः अंकुशइवांकुशः क्लेशविशिताग्रत्वात् महांश्चासौ क्लेशांकुशश्च महाक्लेशांकुशः अतएवाग्रणी श्रेष्ठ इत्यर्थः ॥ महायशा महाकीर्तिरिति । वज्रकेतुः । सत्वधातोर्यशोयभूतानां सर्वमण्डलानां तत्रनिर्दिष्टानांच कर्तृस्वभावत्वात् । महद्यशोयस्यसमहायशाः । अतएवअशोधानवशोमलोकधातुर्व्यापी कीर्त्तिर्यस्यसमहाकीर्तिरिति । महाज्योतिर्महाद्युतिरिति । वज्रभानुः । महतीत्रैधातुकप्रसर्पिणीज्योतिर्दीप्तिर्यस्यासौ महाज्योतिः ॥ ततश्चवाग्दोषाणांकृतमप्यविलंबितानां परिहारेणातूष्णीभावस्वभावेनज्ञापकात्सर्वसत्वसंतानेस्ववभासकत्वान्महाद्युतिरिति ॥ ततश्चविकल्पमनः परावृत्तिलक्षणोप्रत्यवेक्षणाज्ञाने यथोक्तविपर्यासविवेकेन समस्तधर्मतत्वप्रत्यवे

क्षणात् ॥ तन्मुखेनव स्वभावशुद्ध धर्मता प्रज्ञाना
नां वैवर्त्तिकसत्त्वाभि सम्यक्त्वार्थ परिज्ञानहेतुत्वा
च्च अतस्तेषां धर्माधीनां अयंक्रमा तदवलक्ष
णां व्यञ्जनात्मनिरूपकाय: अनभिसंस्कारात् ला
क्षणाभून्यता । बलवैशारद्यादि स्वभाव धर्मकाया
भिसंस्कारात् । सर्वधर्मशून्यता । पुंगलधर्मसमा
रोपणात् अभावशून्यता यथोक्तशून्यतालक्षण
स्यवादनभिसंस्काराच्च अभावस्वभावशून्यता ॥

७ ॥

महामायाधरोविद्वान् महामायार्थसाध
कः ॥ महामायारतिरतो महामायेन्द्र
जालिकः ॥ ८ ॥

अतआह । महामायाधरो विद्वान् महामायार्थ
साधकः । महामायारतिरतो महामायेन्द्रजालि
क इति ॥ तत्रमहामायाधरो विद्वानिति । वज्र
विश्वः । सर्वतथागतचित्तविद्यापुञ्जोदारीनर्मोणं
तद्धारयतीति मायाधरः ॥ महांश्चासौ मायाधर
श्चेति महामायाधरः अतएव विद्वान् पण्डितः

नेनभूजाकर्मणा उरुपसंभारोपार्जनात्। महामा
यार्थसाधकइति। वज्ररक्षः। मायार्थइतिनिर्मा
णार्थः। कश्चीदसत्वं साधयति प्रोत्साहयइति
मायार्थसाधकः। महांश्चासौमायार्थसाधकश्चे
ति महामायार्थसाधकः। महामायारतिरतइति
वज्रयक्षः। मायायारतिर्मायारतिः। मायार
तौ रतः शक्तः मायारतिरतः। महांश्चासौमा
यारतिरतश्च महामायारतिरतः॥ महामायेन्द्र
जालिकइति। वज्रमुष्टिः। मायेन्द्रजालनिर्मा
णसमूहे कायवाक्चित्त वज्राणां एकीभावतइतीति
इन्द्रजालिकः। महांश्चासाविन्द्रजालिकश्च मह
मायेन्द्रजालिकः। एकभावोऽत्रद्रष्टव्यः। सङ्क्रम
पाठाद्वा। ततश्च कृत्यानुष्ठानज्ञानज्ञाताशयकर्मा
दिचतुष्टयात्मकं चतुर्विधज्ञानपरावृत्त्यात्मनि
कृत्यानुष्ठानज्ञानेसति। उक्तविपर्यासमुखेन
समस्तसुगतभूमिसंस्कारेण विघ्नोपसमका
र्यादि भूम्यताज्ञानकारणात्। अतएवचैषां वज्र
विश्वादीनां कर्मेति। एवंनान्यर्थादीन्यक्षा

निकोशीघ्रप्रतिपक्षतयाएवंदानशील क्षान्ति वीर्य
पारमितात्मकमिति ॥ ८ ॥

महादानपतिःश्रेष्ठो महाशीलधरोग्रणी
महाक्षान्तिधरोधीरो महावीर्य्यपराक्रमः ॥ ९ ॥

अतःआह । महादानपतिःश्रेष्ठ महाशीलधरोग्रणी।
महाक्षान्तिधरो धीरो महावीर्य्यपराक्रम इति ॥ तत्र
महादानपतिःश्रेष्ठ इति वज्रलास्या । पूजानुग्रहका
म्यया दीयत इतिदानं तस्यदानस्यपतिः दानपतिः
।महांश्चासौदानपतिश्च महादानपतिः ॥ आमिषा
भयधर्माभिषेकात्मकचतुर्दानोत्सर्जनतया श्रेष्ठः ॥
सर्वलोकोत्कृष्टत्वात् । महाशीलधरोग्रणी इति।
वज्रमाला । कायवाङ्मनोनां समाधानाच्छीलं ॥
शीलसमाधाविति धात्वर्थात् दशाकुशलविरमण
रूपंशीलंमोक्षस्वभावंच । तद्धारयतीति शील
धरः । महांश्चासौ शीलधरश्चेति महाशीलधरः ।
अतएवाग्रेणी उरस्सर इत्यर्थः ॥ महाक्षान्ति
धरोधीर इति । वज्रगीता · क्षमणं क्षान्तिमसी
ति क्षान्ता धारयतीति क्षान्तिधरः । महांश्चासौ

क्षान्तिधर श्रेति महाक्षान्तिधरः ॥ ततश्च धीरः महत्स्वपि दुःखेषु धैर्यावलम्बित्वात् । महावीर्य्यपराक्रम इति । वज्रनृत्या । वीर्य्यकुशलेत्युत्साहः । पाठ्यनुत्साहस्यकुशीदत्वात् । कौशीद्यमेवनवीर्य्यं तस्य पराक्रमः । सर्वलौकिकलोकोत्तरकुशलमूलानांपरिपूरणात् । अतश्च गुरुपूजाचतुष्टयात्मकौ । यथाक्रममादर्शज्ञानस्त्रियौ स्वविमोक्षसुखादिष्वकृत्रिमेन । नाभोगादिभिर्निर्विशेषोत्पादकत्वात् । तदेवदोष्प्रज्ञाविक्षेपात्मन्य व्यग्रणिधिविपक्षाभिभूतिरहितत्वेनाह ॥ ९ ॥

महाध्यानसमाधिस्थो महाप्रज्ञाशरीरधृक् ।
महाबलोमहोपायः प्रणिधिर्ज्ञानसागरः ॥ १० ॥

महाध्यानसमाधिस्थो महाप्रज्ञाशरीरधृक । महाबलो महोपायः प्रणिधिर्ज्ञानसागर इति । तत्रास्थो गाधैर्य्यं ध्यानप्रज्ञयोर्व्यत्ययासेऽदृश्य । ततश्चायमर्थः ॥ महाप्रज्ञाशरीरधृक इति । वज्रधूपा । महतीप्रज्ञा महाप्रज्ञा सएवशरीरं धारयतीति महाप्रज्ञाशरीरधृक ॥ महाध्यानसमाधिस्थ इति । वज्रधुपा । समाधिश्चित्तस्यैकाग्रतालक्षणो । तस्मिंस्तिष्ठतीति

त्ति समाधिरुः। महच्च ध्यानं महाध्यानं। महत्त्वं च तुर्यात्मकत्वात्। तेन च तुर्येण तु समाधिरुं। प्रणिधिरिति। प्रणिधीयत इति प्रणिधिः। बोधिसत्त्वानां प्रणिधानवशादुत्पत्तेः। महोपाय इति वज्रगन्धात्। महांश्वासावुपायश्च महोपायः॥ तत एवोपायबलेनावशेषस्य सत्त्वधातोर्यथाशयाभिप्रायपरिपूरणात्। अतएव प्रज्ञाध्यानप्रणिधिउपायपारमितालक्षणात्मा। वाग्भूजा च तुर्यात्मकमिति। संभोगिकमार्गप्रीतिहेतुभावेन वज्रज्ञानयोर्धर्मधात्ववतारस्वभावत्वात्॥ तयोर्वज्रज्ञानयोः प्रविभागः। तत्र वज्रः श्रेष्ठादिपञ्चबलंच। ज्ञानंदर्शनमार्गे भावनामार्गेच्च। तत्र दर्शनमार्गबोध्यंगेषु। भावनामार्गआर्य्याष्टाङ्गेषु॥ तत्र श्रद्धावीर्यस्मृतिसमाधिरुपनयाकारपालचतुष्टयात्मकं। मत्याभिसंप्रत्ययप्रहृत्तिवैरत्यसंतुष्टिकारणत्वात्। तदेवप्रज्ञापरिशुद्धिमात्रापेक्षया। यथोक्तशून्यताप्रभेदसुखेन मैत्र्यादिबोडशसमाध्यात्मकमिति॥ १० ॥

महामैत्रीमयोमेयो महाकारुणिकोऽग्रधीः।
महाप्रज्ञोमहाधीमान्महोपायो महाकृतिः॥ ११॥

अतआह। महामैत्रीमयोमेयो महाकारुणिकोग्र धीः। महाप्रज्ञोमहाधीमान्महोपायो महाकृतिरिति॥ तत्रमहामैत्रीमयोमेयइति। मैत्र्यमित्रस्यास्तीति मंत्रं पश्चाज्जीवर्त्तं ततःसर्वसत्त्वेषु मैत्रीमयः। मैत्रीस्वभावः। महांश्चासौ मैत्रीमयश्चेति महामैत्रीमयः॥ अतएवामेयः। सर्वसत्त्वधातावेकउत्पत्तेरेकत्वात्॥ महाकारुणिकोग्रधीरिति। मंजुश्रीमहाकरुणाअनालम्बिकात्मकासाध्यस्यास्तीति महाकारुणिकः॥ अग्रधीरितिस्वविषयेऽग्रधर्मधातुज्ञानं। ततश्चेतऊर्ध्वं भवति। उदारंगम्भीर्यात्मकोसौभगवानिति। महाप्रज्ञोमहाधीमानिति। गंधहस्ती। महान्तिप्रज्ञाधर्मप्रविचयलक्षणात्मिकासाध्यस्यास्तीति सप्रज्ञः। महांश्चासौप्रज्ञश्चमहाप्रज्ञः। अतएवमहाधीमानुक्तः। महोपायोमहाकृतिः इति ज्ञानकेतुः॥ महानुपायोयस्यासौमहोपायः॥ ततश्चमहाकृतिः महामतिरुक्तः। सर्वसत्त्वाशयानुशयज्ञतयासद्धर्मप्रकाशनात्वात्॥ ११॥

महाऋद्धिबलोपेतो महावेगो महाजवः ॥
महर्द्धिको महेशाख्यो महाबलपराक्रमः॥ १२ ॥

महाऋद्धिबलोपेतो महावेगो महाजवः। महर्द्धिको महेशाख्यो महाबलपराक्रम इति। तत्र महाऋद्धिबलोपेत इति। भद्रपालः। ऋद्धिर्बलं ऋद्धिबलं तेनोपेतः। महावेगो महाजव इति। सागरमतिः। महान्वेगो गतिर्यस्यासौ महावेगः। सर्वतथागतबोधिस्थानहेतुतया अनेकलोकधातुसंक्रमणात्। अतस्त्वं महाजव इत्युच्यते। महर्द्धिको महेशाख्य इति। अक्षयमतिः। लौकिकश्रावकप्रत्येकबुद्धानां ऊनपज्ञानसंभारोपेतत्वात्। महर्द्धिकः। सर्वतथागतज्ञानसम्भारपरिपूरणतयाहेतोर्महेशाख्य इति॥ महाबलपराक्रम इति। प्रतिभानकूटः। महान्तिचतानि बलानि चेति दशतथागतबलानि स्थानास्थानज्ञानादीनि वक्ष्यमाणानि। तेषु पराक्रमो वीर्यालम्बी यस्यस महाबलपराक्रमः॥ १२ ॥

महाभवाब्धिसंभेत्ता महावज्रधरो घनः॥
महाक्रूरो महारौद्रो महाभयभयंकरः॥१३॥

महाभवाब्धिसंभेत्ता महावज्रधरोधनः। महाक्रूरो महा
रौद्रो महाभयभयंकर इति ॥ तत्र महाभवाब्धिसंभे
त्तेति ॥ महास्थानप्राप्तः। भैरवश्रीपादानस्कंधाः। त
स्याब्धिः अज्ञानशैलात्मान्। तस्य सम्यगविपरीतज्ञा
नलाभात्। भंजनशीलः संभेत्ता। महाश्चासौ भवाब्धि
संभेत्तीति महाभवाब्धिसंभेत्ता। महावज्रधरोधन इति
सर्वोपायैर्नहः। महावज्रसमनभङ्गज्ञानं तद्धारयतीति
महावज्रधरः ॥ निर्विघ्नत्वान्मूर्जितत्वाच्च घनः। महाक्रू
रो महारौद्र इति। सर्वशोकतमोनिर्घातनमतिः। म
हाश्चासौ क्रूरश्च। नर्यज्ञानांसत्वानां महाक्रोधसं
दर्शनात् महारौद्र इति। सतोऽप्य सौभगवान्
मंजुश्रीसत्त्वविनेयवशाद्रौद्रानपि दर्शयतीति
महाभयभयंकर इति। जालिनीप्रभः॥ महाभ
यो भैरवरूपधारी गह्वरस्तस्यापि भयंकरेतीति
महाभयभयंकरः ॥ ९३ ॥

महाविद्योत्तमोनाथो महामंत्रोत्तमोगुरुः॥
महायानत्रयारूढो महायानत्रयोत्तमः॥९४॥
वज्रधातुर्महामंडलगाधाचतुर्दृशः॥ ॥

महाविद्योन्नमोनाथो महामंत्रोन्नमोरुः। महायानन्नया
रूढ महायाननयोन्नम इति॥ तत्रमहाविद्योन्नमोनाथ
इति चंडप्रभः। महत्यश्चतादिद्याश्च महाविद्या.श्चन
स्तोधारिणः यथार्थमुद्गात्मिकाः। तासोमुन्नमअ
ग्रस्वनाथः।सर्वापायेभ्यः सर्वसत्वानामशेषका
यवाङ्मनः समुदाय संशोधनात्। महामंत्रोन्नमोरु
रुः। इति अमृतप्रभः। महांश्चासोमंत्रश्चमहामं
त्रः महामुद्रात्मकः।तस्योन्नमश्रेष्ठ इत्यर्थः॥ अतेए
वमुरुः। सर्वसत्वानांयथाशयानुशयज्ञानाभिसम
यापदेशात् महायाननयारूढ इति।गगनगञ्जः।
महायानं वक्षेमाणंतस्यनयामार्गस्तस्मिन्नारूढस्थि
त इत्यर्थः॥ महायाननयोन्नम इति. सर्वरणीवरण
विष्कम्भि। संसारनिर्वाणयोरनभिलाष्यधर्मता
धिगमान्निर्विकल्पकज्ञानं। महायाननयोन्नमोमिति
।अथवात्रिधानुन्नयेण संभारोमायुगोचराधारस्व
भावो महायानस्यसंगृहीत इति।यद्येवंकथमे
स्यमहत्वं। सर्वलोकहितार्थब्रह्मचर्यस्तेनम
हान्न स्तेषामिदंयानं निष्पन्नयानिवारणीयवा

तस्मात्तत्सत्त्वानां यानं महायानं ॥ अथवा सत्त्वविधेन
हत्वात् । आलम्बनप्रतिपत्तिज्ञानवीर्यकौशल्यसमुद्ग
मकर्मसुजतत्वात्महायानं ॥ महच्चतद्यानं विज्ञेय म
हायानं । अन्यत्रयानतद्भावादिति ॥ तदेतत्समासेन
त्रिविधंमहायानं ॥ हेतुगोचरस्वभावपरिदीपनार्थ
वेदितव्यमिति ॥ तदेवमुपायमात्रापेक्षितया वाशी
मलौकिकलोकोत्तरसमाधिस्वभावत्वात् । भगव
तोज्ञानकायस्य सर्वतथागतज्ञानकायस्य ॥ तद्यथा
भगवान्बुद्धः संबुद्धोकारसम्भवः । इत्येवमादिभि
र्नामसंवाक्षरपदैर्ग्रहणाकर्षणविशि
ष्टैः । क्रियापदैरहितेविशेषज्ञानसत्त्वः सर्वतथा
गतहृदयविहारी मञ्जुश्रीः श्रीमूतास्वर इतिद्रष्ट
व्यः । तेचमण्डलेयोवज्रसत्त्वादयो महामुद्रायोगे
स्वकस्वकग्रहरणोपेतावितिस्तृताचसकललोक
धातुसत्त्वानां ॐ शुद्धकृत्यंकृत्वा पुनरागत्यनामसंज्ञा
क्षराणि स्वकुलवर्णोपरंजितानि यथार्थक्रमतो
वज्रधातुमहामण्डलस्यप्राग्विमलचन्द्रमण्डलेषु
व्यवस्थितानि विचिन्य तस्यकनाभिस्थितस्य सर्व

तथागतज्ञानकायस्य मञ्जुश्रीज्ञानसत्त्वस्यप्राप्ति
र्द्दिष्टरूपमात्मनोऽधिमुच्यतस्येव भगवतोज्ञानसू
त्रैरहयपरमार्थानामसंगीतिनामधृज्ञानार्णवं य
कश्चिल्कुलपुत्रोवाकुलदुहितावा मंत्रमेवंचयथो
क्तबोधिसत्त्वः त्रिःकृत्वाकण्ठेगतामावर्त्तयिष्यति
॥पुस्तकगतांवापठमानः प्रवर्त्तयिष्यतिभुवि
मोनिभूत्वातूष्णीभावेनयथाकश्चिन्न शृणोतिना
नामसंत्राक्षरपदानि यथावर्त्तयन्नचिरादेवातुर्गी
सांचरिपठितानि ॥ गुणगणानन्यांश्च प्राप्स्यति
परमार्थानामसंगीतिस्थारकः पुरुषपुंगलः सु
संभृतपुण्यज्ञानसंभारः क्षिप्रतरं सर्वबुद्धगुणान्
समुदानीयानुत्तरांसम्यक्संबोधिमभिसंबोत्स्यते
॥अनन्यकल्पानपरिमाणाधर्मसर्वसत्त्वानामनुत्तरं
धर्मदेशकोदशदिक्सङ्क्रमंडेवुभिर्धर्मराजाभवति ॥
अस्यचवज्रधातुमहामण्डलस्यनामसंत्राक्षरपदानां
एकत्रिंशदक्षराणांषडशीतिनामानिभवन्ति। तानि
च मण्डलेयदेवतानांप्रविभक्तयोजनीयानितत्र
चत्वारिज्ञानसत्त्वचक्रमण्डलेषुअकारस्यबीजा

सत्वकुलादीनां पञ्चयानतादीनां स्वकादशावज्रधारे
भ्यः यावत्सर्वतीवरणादि कर्मभ्यो त्येतत्सर्वज्ञे। शे
षाणि नाम मंत्राक्षरपदानि विशेषेण विशेष्यभावे
न यथाक्रमतोयोज्येति ॥ गाथा चतुर्दश नाम मंत्रा
क्षराणि एकाशीति रेकतोपि इत्याम्नायः॥१४॥
ओर्य्य नामसंगीतिधिकार्थी नाममंत्रार्थावलोकिन्यां
वोधिचित्तवज्रस्य कुलधातु महामण्डलाधिकारः पञ्च
मः॥ ॥गाथा चतुर्दशः॥ ॥ ॥

महावैरोचनोष्णीषो महाशीतिमुहामनिः ॥
महामंत्रनयोष्णीषो महामंत्रनयोत्तमः॥ १ ॥

अथवा द्वितीयं महावैरोचनचक्रमुच्यते ॥ तत्रथ
मजुश्रीज्ञानसत्वस्य सर्वतथागतज्ञानकायस्य व
ज्रधातु महामण्डलदेवताविन्यासक्रमेण महात्म
मुक्त्वा अन्यच्चदानीं सविशेषकुलधर्मधातुज्ञानेक्षा
यस्य वैरोचनवरेण सर्वस्वभावव्याप्तिं प्रदर्शयि
तुकामः स्वविमोक्षसुखेन मोहचरितानां विनय
नाय स्वचक्रविन्यासमाह ॥ तत्रचवैरोचनस्य च
किं नानाकरणमिति ॥ नेज्यतेतदुच्यते।

स्वाभाविकरूपकायनेस्पन्दिकाशयपरादविलक्षणाः॥ अकनिष्ठदेवराजभवने तत्रदेवनिकायेचोपपन्नानां बोधिसत्वानां संभोगप्रत्यनुभवनार्थं अभिसम्बोधिकमणावैपाकिकं कार्यनिवर्त्य पश्चिमकज्ञानप्रतिभासंलक्षणंनिस्पन्दिकं कायतत्रैव भवने महाबोधिसत्वगणापरिवृतोयःप्रदर्शनोः सोभगवानेवंरोचनयथोक्तंगुणसंपदुपेतंसकलं अकनिष्ठभवनेरम्येशुद्धावासविवर्जिते। तत्रैवशुद्धिसम्भूताः निर्मितास्त्विहबुद्धतः इति॥गाथा॥ वैरोचनस्यज्ञानमुखः। कायैकदेशेनेयावरणात्यन्तंविनिर्मुक्तः॥सर्वभावस्वभावप्रतिभाससंदर्शनसमर्थः॥ कथमसौभगवान् तत्रकपादिकसर्वभावप्रदर्शनसमर्थोभवतीति। तथाचोक्तं॥ श्रीवैरोचनाभिसम्बोधितंत्रे॥भगवन्नतथागतोऽर्हन्सम्यक्सम्बुद्धः सर्वज्ञज्ञानंप्राप्यतत्सर्वज्ञेज्ञानं सर्वसत्वेभ्योविभज्यतांस्तेनयेनाभिनिष्क्रामयेनिर्वाणायेनयेधर्मंदेशयतीतस्म॥ कांश्चित्स्पर्शेकयानेनयं। कांश्चिन्महायानेन

यं। केषांचित्स्वाभिसज्ञानेनयं। केषांचिद्देवोपपत्त
ये। केषांचिन्मनुष्योपपत्तये। यावन्महोरगयक्ष
राक्षसासुरगरुडगंधर्वकिन्नरादुपपत्तये धर्म
देशयतिस्म। तत्रकेचित्स्वावबुद्धनयिकाबुद्ध रू
पेणापश्यन्ति। केचिच्छ्रावकरूपेणा। केचित्प्रत्येक
बुद्धरूपेणा। केचिद्बोधिसत्वरूपेणा। केचिन्महेश्व
ररूपेणा। केचिद्ब्रह्मणारूपेणापश्यन्ति। केचिद्दे
श्रमणारूपेणा। यावन्महोरगमनुष्यामनुष्यरूपे
णापश्यन्ति। स्वकः स्वकैर्वचनोदाहरनयेर्विविधैर्मा
पथव्यवस्थितं। तच्चसर्वज्ञानमेकरसं। यदुतत्तथा
गतविविर्मुक्तरसं इत्यत्रआह। महावैरोचनइतिवि
रोचतेदीप्यत इतिविरोचनः विरोचनएवविरोच
नः॥स्वार्थेनाडविधानात्। महांश्चासौ वैरोचनश्चम
हावैरोचनः बुद्ध इति यथावस्थितसकलपदार्थाव
बोधात्। कायवाक्चित्तमौनेययोगान्मौनं चमच्च
न्मौनं महामौनन्तेनागतः। सततसमाहितत्वात्।
तथाचाह। सततसमाहिताहि बुद्धाभगवन्तइति व
चनात्। कायादिदेवकुल्यामोवाञ्चनदस्यासीति

महामौनि। महानश्चते मुनयश्च महामुनयो वा
सवशिष्ट वाल्मीकप्रभृतयः तद्विनयानां तथा रू
पेणाप्रतिभासनात् महामुनिरित्युच्यते। महामंत्रनयो
द्भूत इति। महामंत्र वज्र महायानं तस्मात्मंत्रनयोद्भू
तः। महांश्चासौ मंत्रनयोद्भूतः ततस्तद्विशिष्यते॥अ
तस्तव महामंत्रनयात्मक इति। महावज्रनयस्वभा
वइत्यर्थः॥ ततश्चमहाविरोचन इत्येवमादिभिश्च
भगवान्मंजुश्रीः श्रीमतामर इति वाच्या॥ ९ ॥

दशपारमिताप्राप्तो दशपारमिताशयः।
दशपारमिताभ्रुद्धि र्दशपारमितानयः॥

दशपारमिताप्राप्तो दशपारमिताशयः। दशपार
मिताभ्रुद्धि र्दशपारमितानय इति। तत्रदशपारमि
तायाप्राप्त्याशयभ्रुद्धि मार्गमुद्दिदर्शयिषन्नाह॥ दशपा
रमिताप्राप्त इति. तत्रपारमिताद्देशेति। तथाचोक्तं
मध्यान्तविभागे॥ दानं शीलं क्षमा वीर्य्यं ध्यानप्रज्ञा
सुपायनां प्रणिधानं बलं ज्ञानमेतापारमिता द
शेति। तत्रदानं त्रिविधं। धर्मदान मामिषदानं
मैत्रीदानंच॥ शीलं त्रिविधं संवरशीलं क्षण

लक्षणसंग्राहकशीलं। सत्वार्थक्रियाशीलं। क्षांति
त्रिविधं। धर्मनिक्षांतिः दुःखाधिवासनाक्षान्ति
परापकारमर्षणाक्षान्तिश्च॥ वीर्य्यं त्रिविधं। स
न्नाहवीर्य्यं। प्रयोगवीर्य्यं। निष्ठावीर्य्यंच॥ ध्या
त्रिविधं। दोषापकर्षकं। दैहारिकं। वैभूतिकंच
प्रज्ञात्रिविधं। श्रुतमयी। चिंतामयी। भावना
यीच॥ उपायस्त्रिविधं। स्वदोषाकर्षणा। क्षि
प्राभिसंबोधकं। सत्वावतारकश्च॥ प्रणिधिस्त्रि
विधः। स्वसंभारप्रावन्धिकं। सत्वार्थानुबंधि
बुद्धक्षेत्रपरिशोधनंच॥ बलंत्रिविधं। कर्म्या
वर्त्तकं। क्लेशापकर्षणं। परपरप्रवादिव्यावर्त्तक
श्च॥ ज्ञानंत्रिविधं। अविकल्पकं। विकल्पसम
तांचबोधकं। सर्वपापापरोक्ष्यंच॥ एतेषांमाद्
यः संबोधिचित्तपूर्विकासर्वसत्वेषु मैत्राशयभा
विता पारमितानामलंभते॥ तापुनः लौकिकलो
कोत्तराश्च। तत्रानिवारितात्मा शुभलाभाः लौकि
कपारमिताः। लोकोत्तराश्च। स्कन्धादिषु नात्मा
थविमोक्षप्रज्ञा तत्वधिगमप्रज्ञाश्च॥ अतए

वाह॥ मार्ग्गमकावतारे चन्द्रकीर्त्तिः॥ देयप्रविग्रा
हकदानभूलोकोत्तरादानपारमितेति दानंनिरु
च्यते। तत्रयज्ञातसंगंसल्लोकिकीपारमितेतिनि
र्दिष्टं श्रुतचिंताभावनामयज्ञानोदयक्रमेणासर्व
कारज्ञताधिगमनात्। प्रकर्षपर्य्यन्तमतीतिविग्र
हं किंपिसर्वापहारलाभअनित्यमार्गप्रसासन
नित्यतुकिं॥ तत्सुखेक्षतिबहुलमित्यलकिकर्म
विभङ्गकृतपारमितारितिभवति। तज्ञावपारमि
तादानस्यदानपारता। स्वंशीलादिस्त्रीषुयोज्यं
।तत्रश्चप्रविष्टं। भूमिकानांबोधिसत्वानांत्रिकोटि
परिशुद्धलक्षणं।यद्दानंतद्दानपारमिता।य
त्पृथग्जनानांतुदानमेवपारमिता॥त्रिकोटि
परिशुद्धिज्ञानविरहात्। तत्रश्चदानादीनांपारमि
तानांप्रज्ञापारमितेवचक्षुर्वेदितव्या।अतएव
वाह। मार्ग्गमकावतारे चन्द्रकीर्त्तिः॥ एतेनपुंसां
यथेष्टदेशसमस्तत्वगणासुखेनआक्रम्यते॥
तद्विदिहाक्षिहीनादयः। धीर्यानिगुणांजिनत्व
मिति। तेदेवभूतादशपारमिताः प्राप्ताधिगमो

भगवान्सतथोक्तः॥तत्राश्रयश्चाधारः। तासामे
वदशानांपारमितानामाधारत्वात्। तदाधे
यत्वाच्चतदेतदुक्तंभवति।अन्योन्याधारयसंब
धाप्रतीत्यसमुत्पादार्थःस्फुटतोभवति। दशपा
रमितास्थिरीकृत्यत्रिकोटिंपरिशुद्धिंवादेयपा
यरूपप्रतिग्राहकानुपलब्धिंतासांपारमितानां
मिति। दशपारमितानयइति-दशैवपारमिता
नयोमार्गउपायोयस्यासतथोक्तमिति॥ २॥

दशभूमीश्वरोनाथोदशभूमिप्रतिष्ठितः।
दशज्ञानौघभद्राक्षोदशज्ञानौघभुङ्मकः॥३॥

नाऽनयःभूमिभ्योन्या। यस्मादेतायांनुभविदान
पारमिता। अतिरिक्ततरभवतिइति। विमलायां
शीलपारमिता २ प्रभाकर्यां क्षान्तिपारमिता ३
अर्चिष्मत्यांवीर्यपारमिता ४ सुदुर्जयायांध्यान
पारमिता ५ अभिमुख्यांप्रज्ञापारमिता ६ दूरंगमा
यांउपायपारमिता ७ अचलायांप्रणिधिपार
मिता ८ साधुमत्यांबलपारमिता ९ धर्ममेघा
यांज्ञानपारमिता १० इति॥ तत्रेतरभूमयोऽ

मैनैरात्म्यमेवाधिगमाविशेषेऽपि दानपारमिताविशु
द्ध्याधिष्ठानतो विशेषवत्त्वं प्रतिलभते। औदार्यत
प्रणिधानबलादासन्नसाक्षात्करणाच्च। सर्वश्रा
वकाभिरिति। तत्रभूमिरिति ज्ञानस्थितिर्भूमिगो
चर इति॥ यावत्तत्रैवाधिगम्यविशेषात्तत्रैव
ज्ञानप्रतिष्ठायोगेन तज्ज्ञानसमाधानयोगेन च
भूमय इत्युच्यते। सर्वत्रसत्त्वधातोः सामान्य
- - त्वाच्चोधर्मधातुविनिर्मुक्ता। नकश्चिद्धर्मो
ऽस्तीति। अत्रात्मसमताप्रतिलभनैरात्म्यविशे
षात्॥ एवम - - - - - - - - - - - - - त्रा
अनआह। दशभूमि - पादा - - प्रतिष्ठित इति।
दशानांप्रमुदितादीनांभूमीनामना - श्रयजिवत्त
त्तिरित्यर्थः। सर्वस्यांभूमौदानादीनां पारमिता
वासत्वंलाभात्॥ ना - - - दशभूमिषुप्रतिष्ठि
ता प्रतिष्ठितइति। दशज्ञानानि। धर्मज्ञानं. अ
न्वयज्ञानं. परचित्तज्ञानं. संवृतिज्ञानं. दुःखज्ञा
नं. समुदयज्ञानं. निरोधज्ञानं. मार्गज्ञानं. क्षय
ज्ञानं. अनुत्पादज्ञानंचेति॥ धर्मज्ञानंकतमत्

कामप्रतिसंयुक्तेषु संस्कारेषु यदनाश्रवज्ञानं। काम
प्रतिसंयुक्तानां संस्काराणां हेतौ यदनाश्रवज्ञानं।
कामप्रतिसंयुक्तानां संस्काराणां निरोधे यदनाश्र
वज्ञानं। कामप्रतिसंयुक्तानां संस्काराणां प्रहाण
यमार्गे यदनाश्रवज्ञानं। अपिच॥ धर्मज्ञाने धर्म
ज्ञानभूमौ च यदनाश्रवज्ञानमिदमुच्यते धर्मज्ञानं
॥ --- रूपारूप्यप्रतिसंयुक्तेषु संस्कारेषु य
नाश्रवज्ञानं। रूपारूप्यप्रतिसंयुक्तानां संस्काराणां
हेतौ यदनाश्रवज्ञानं। रूपारूप्यप्रतिसंयुक्तानां संस्का
राणां निरोधे यदनाश्रवज्ञानं। रूपारूप्यप्रतिसंयु
क्तानां संस्काराणां प्रहाणाय मार्गे यदनाश्रवज्ञानं॥
अथवा दुःखज्ञाने च अन्वयज्ञाने च भूमौ यदनाश्रव
ज्ञानमिदमुच्यते अन्वयज्ञानं॥ परचित्तज्ञानं कतम
त्। यत्ज्ञानं भावनामयं भावनाफलं भावना मार्गम्
प्रतिलब्ध मदिहीना परज्ञानेन कामावचरान् रूपा
वचरान् - सत्वहितान् सं --- नान् परेभवति
परेषां चित्तचेतसिकान् धर्मान् जानाति॥ एकं वा
श्रान्यांश्च बाह्यान्। इदमुच्यते परचित्तज्ञानं॥

संवृत्तिज्ञानंकृतमत् । साश्रद्धापरिज्ञेयमितिजानाति ।समुदयप्रहीणोनपुनःप्रहातव्यनिरोधसाक्षात्कृतोनपुनःसाक्षात्कर्तव्यः । संवृत्तिज्ञानंचेति ॥ दुःखज्ञानंकृतमत् । पञ्चोपादानस्कंधान् । अनित्यतो दुःखशून्यतानात्मतमनसिकुर्वतोयदनाश्रवज्ञानमिदमुच्यते दुःखज्ञानं ॥ समुदयज्ञानंकृतमत् ॥ --- हेतुं हेतुतः समुदयतः प्रभवतः ---- मनसिकुर्वतोयदनाश्रवं ॥ निरोधं निरोधतः शान्ततः प्रणीततोनिसरणतमनसिकुर्वतोयदनाश्रवंज्ञानमिदमुच्यते निरोधज्ञानं ॥ मार्गज्ञानंकृतमत् । मार्गमार्गम्यायतः प्रतिपत्तितो --नैर्याति --- मनसिकुर्वतोयदनाश्रवज्ञानमिदमुच्यते मार्गज्ञानं ॥ क्षयज्ञानंकृतमत् । दुःखमपरिज्ञानमितिजानाति समुदयोयेप्रहीणाःनिरोधःसाक्षात् -- तोमार्गोमभावित इतिजानाति ॥ नउपायसत्वनदर्शनं विधाविधिःप्रज्ञालोकोभिसमयइदमुच्यते क्षयज्ञानं ॥ अनुत्पादज्ञानंकृतमत् ॥ दुःखंमे परिज्ञानंनपुनः मार्गोमेभावि

नेन पुनः भावयितव्य इति जानाति। तदुपायज्ञानद
र्शनं विद्या बोधिः प्रज्ञालोकाभिसमयः इदमुक्तमेव
मुत्पादज्ञान मित्यत आह॥ दशज्ञानविधुङ्गात्मा
दशज्ञानविधुङ्ग्वगिति। नैतश्चसर्वैर्दशभिर्ज्ञानै
र्विधुङ्गः आत्मास्वभावोयस्य सः दशज्ञानविधुङ्गा
त्मा भगवान् नेमांस्वदशज्ञानज्ञानानां विधुङ्गैः प्र
कृतिप्रभास्वरं धारयतीति दशज्ञानविधुङ्ग्वक
।सर्वनिमित्तापगमात्॥ तथाचोक्तं मध्यान्तविभा
गे। एकोहेतुभवः कृत्स्नैत्वकर्तृत्वबन्धने। आ
धिपत्यार्थनित्यार्थः क्लेशशुद्ध्याश्रयोपिच। यामि
त्याकृतकृत्ये आत्मदर्शनश्चहि॥ एवदशवि
धः॥ आत्मग्राहः स्कन्धादिषु प्रवर्त्तते। यदुतएका
त्वग्राहः हेत्वर्थग्राहः। भोक्तृत्वग्राहः। कर्तृत्वग्रा
हः। स्वतन्त्रत्वग्राहः। आधिपतित्वग्राहः। नित्यत्व
ग्राहः। सर्वज्ञित्वव्यवहारत्वग्राहः। योगित्वग्रा
हः। मुक्तत्वग्राहकश्चेति॥ ३॥

दशाकारो दशार्थार्थो मनींद्रो दशबलोविभुः॥
अशेषविश्वार्थकरो दशाकारो यशोमहान्

दशाकारेति ॥ आक्षिप्यते विक्षिप्यतेसमाधिरभि
श्चित्तस्कन्धादिक्षित्याकारः । दशात्मग्राहः । अतए
वोक्तं दिग्नागपादैः संग्रहः ॥ दशमश्चित्तविक्षेपैः
चित्तंविक्षेप्तुमन्यत ॥ योगंभवीतबालानां ग्राह्यं
ज्ञानसाधनमिति । तस्मादेतद्दशात्माकारा आत्म
ग्राहकस्यासौभगवान् सत्यवोक्तः । किमर्थमिति
चेत । सर्वविपक्षाकारेणाप्रतिभासणात् । प्रति
पक्षभूतादशार्थानत्वैवपठ्यते । मूललक्षणात्वंच
अविपर्यासलक्षणं । फलहेतुमयंतत्वं सूक्ष्मौदारिक
त्वंच । अविक्षिप्तअक्षुब्धविषयं संग्राहकलक्षणं ॥ को
शल्यंतत्वदशधा आत्मविपक्षत इति ॥ इत्येवंद
शविधंतत्वं । यउत मूलतत्वं लक्षणतत्वं अविपर्या
सतत्वं फलहेतुतत्वं औदारिकं सूक्ष्मतत्वं प्रति
क्षुतत्वं विक्षुब्धयोगाचारतत्वं संग्राहकतत्वं को
शलतत्वं ॥ तत्पुनर्दशविधं दशविधात्मग्राह्यप्र
तिक्षेपकलक्षणंच । प्रतिपक्षेणावेदितव्यं इत्य
तआह ॥ दशार्थानि इति ॥ तत्रैवोदशानां को श
ल्यानां तत्प्रतिपक्षोदयभूतानां अर्थतत्वं अर्थत

इत्यर्थः परमार्थस्वभावत्वादनस्तेर्वा दशानामर्थद
शकोशल्यंनत्वं आत्मदृष्टिप्रतिपक्षतोवेदितव्यमि
ति॥ तत्रैवविस्तरेणोक्तं। इहग्रन्थविस्तरभया
न्नविपचितं तत्रश्चकिमुक्तंभवति॥ सर्वविपक्षा
प्रतिपक्षस्वभावेन सएवभगवान् वेदितव्यमिति
॥ तत्राविपरीतप्रतीत्यसमुत्पादोपदेशात संक्षि
प्तेनोद्देशपुण्यज्ञानसंभारे स्वयंसमृद्धनिरुप
द्रवशास्तुः श्रावकप्रत्येकमुनिनामधिपतमो
द्रुद्धमहायानेभ्यस्त्यत्राह मुनीन्द्र इति। अत
एवोक्तं माचार्यनागार्जुनपादैः॥ नमस्तस्मै
मुनीन्द्राय प्रतीत्योत्पादवादिने इति॥ दशान
मागतवज्ञानि। स्थानं स्थानज्ञानबलं १ कर्म
विपाकज्ञानबलं २ नानाधातुज्ञानबलं ३ नानाधि
मुक्तिहीनबलं ४ इन्द्रियपरापराज्ञानबलं ५
नानासमाधिसमापत्तिज्ञानबलं ६ सर्वत्रगामि
नीप्रतिपत्तिज्ञानबलं ७ मुत्पत्तिज्ञानबलं ८
पूर्वनिवासानुस्मृतिज्ञानबलं ९ आश्रवक्षय
ज्ञानबलं चेति॥१०॥ इदंचदशज्ञानबलं भगवा

न्त्वभावस्य बलविशेषप्रभावितत्वात् ॥ अविकल्प
समनथास्थानादिप्रपञ्चादिदशमादित्यतआह ॥ द
शबलेऽत्यादि ॥ तथाचदशतथागतदशबलानिवि
धेयस्यसतथोक्तः ॥ अतएवविभूतिति ॥ महात्म
स्थिरत्वसर्वभावत्वभावात् ॥ अशेषविश्वार्थकर
ति ॥ अशेषस्यनिरवशेषस्यविश्वस्यकृत्स्नस्य
गतार्थः ॥ अशेषविश्वार्थंस्वकर्तुंयस्यासावशेष
करः ॥ भगवान् दशाकारवशीमहान् इति ॥ न
चदशाकारेवशिता ॥ तद्यथा ॥ आयुर्वशिता १ कर्म
वशिता २ परिस्कारवशिता ३ विमुक्तिवशिता ४ प्र
णिधिवशिता ५ ऋद्धिवशिता ६ उपपत्तिवशिता
७ धर्मवशिता ८ चित्तवशिता ९ ज्ञानवशितेति
१० ॥ तांदशाकारवशितालक्षणात् ॥ धर्मानवशे
वयितुं शीलंयस्यासौ दशाकारवशिता ॥ अतश्च
सर्ववशिताधर्मप्राप्तत्वादेवमहांनिरुच्यते ॥ ७ ॥

अनादिनिष्प्रपञ्चात्मा शुद्धो ज्ञानतथात्मकः ॥
भूतवादीयथावादी तथाकारी अनन्यवाक् ॥ ५ ॥

अनादिरिति ॥ नविद्यतेआदिरुत्पत्तिर्यस्यासा

वनादि ॥ उत्पादाभावाद्धि नाशोपि नास्तीत्यर्थोधिगम्य
ते ॥ अप्रतिष्ठितनिर्वाणाज्ञानलाभात् ॥ आदिनिधने
नष्ट इत्यर्थः ॥ निष्प्रपञ्चात्मेति । प्रपञ्चा स्कंधधात्वा
यतनाग्राह्यग्राहकलक्षणा धर्मास्तेषामात्मा स्वरू
पनिर्गतः प्रपंचात्मा यस्मादसौ निष्प्रपञ्चात्मा ॥ अ
नविशुद्धात्मेति । आगंतुकमलापगमात् । अनन
स्य स्वभावान्यथात्वं ॥ अनन्यतथात्मक इति ।
तत्रतथताभूतार्थेन तथतानित्यं तथेवेति कृ
त्वा । सेवात्मास्वभावो यस्य स तथात्मकः भू
तस्वभाव इत्यर्थः ॥ भूतवादी इति । तत्र भूता
नि चतुरार्य्यसत्यानि तानि वदितुं शीलं यस्यासौ
सतथवा ॥ अथवागंभीरसमुत्पादार्थो भूतार्थः ॥
अतएवोक्तं नागार्जुनपादैः ॥ नापरप्रत्ययंशांतं
किंचित्क्वचन कस्यचन । क्वचित्कस्यचित्किंचन
कुतश्चिद्भूतंभूतं दृष्टमिति सम्यग्दर्शनं इति ॥ यथा वादि तथा कारी
ति ॥ तथैव सर्वधर्माः भूतत्वात्मानो मायामरी
चि स्वप्नगंधर्वनगरोदकचंद्रोपमा इति वदति
। तथैवमनसिकरणात् यथावादी तथा कारी

रिसुच्यते ॥ अनर्थवअनर्थवागिति । सत्यवाक्स
र्वसत्त्वानां यथागात्रतया वाविपरिणामधर्मचक्र
प्रवर्त्तनत्वात् ॥ ५ ॥

अद्वयोद्वयवादीच भूतकोट्यवस्थितः ।
नैरात्म्यसिंहनिर्नादी क्रतीर्थ्यमृगभीकरः ॥६॥

अद्वय इति । अद्वयग्राह्यग्राहकस्याभावः तस्या
भावस्याभावा अद्वय इत्युच्यते ॥ सभगवान् परमा
र्थतोद्वयोपि संवृत्याद्वयवादीच । भूतकोट्यवस्थि
तः इति । अविपर्योसार्थेन भूतकोटिविपर्योसाव
स्तुत्वात् तस्यांभूतकोट्यां व्यवस्थित इति । तत्त्व
भावव्यतिरेकत्वात् ॥ नैरात्म्यसिंहनिर्नादीति ।
तत्रत्रिविधं नैरात्म्यं । अलक्षणानैरात्म्यं विलक्षण
नैरात्म्यं स्वलक्षणानैरात्म्यंच ॥ नैरात्म्यत्रितयम
वसिंहः नैरात्म्यसिंहः ॥ सर्वत्राक्लिष्टत्वात् सिंह
इवसिंहः तस्यनैरात्म्यसिंहस्यनिर्नादः यस्यासौ
त्वसौ नैरात्म्यसिंहनिर्नादीत्युच्यते ॥ क्रतीर्थ्यम
गभीकर इति ॥ निर्वाणसरस्येनरणार्थीमार्ग
तीर्थ्या ॥ क्लिष्टाचैतेतीर्थ्याश्चक्रतीर्थ्याः अतए

वमगाः नरात्मसिंहनिर्नादभीरुत्वात् भयकर्तृत्वेन यः
सभीकरः ॥ कृतीर्थमृगाणां भीकरः कृतीर्थमृगमृग
भीकरः ॥ तथाचोक्तं । भूत्वा सिंहनादेन त्रासिता सर्व
वादिनः ॥ यत्र तत्र विशत्यत्वेन तत्र तत्रैव भ्रमतीति ॥ ६ ॥

सर्वत्रगोमोघगतिस्तथागतमनोजवैः ॥
जिनोजितारिर्विजयी चक्रवर्त्तीमहाबलः ॥ ७ ॥

सर्वत्रग इति ॥ तदधिकारे - रिभवतत्वज्ञानेवत्र स
र्वत्रगोनिर्मलाकायः तस्याप्रज्ञेः अथवासर्वत्र इति
पञ्चस्वर्वत्रगाः ॥ तत्र महतीभूमेरेषामिति महाभूमिः
॥ कायेसर्वत्रचैतासिभवन्ति चेतसावत्संचेतनस्कार
वेदनासंज्ञाचेतनात्मकाः धर्म्माः ॥ तेविद्यन्ते यस्यासौस
र्वत्रग इति ॥ अमोघअवन्ध्यागतिगमनयस्यासाव
मोघगतिः ॥ तथागतमनोजव इति ॥ एकक्षणेने
वाप्रमेयलोकधात्वतिक्रमणात्तथागत इति जिना
त्यनेनकुशलाधर्म्मा इतिजिन इति ॥ जितारिरिति
अरयःक्लेशाजिताह्यनेनेति जितारिः ॥ विजयीति विज
योयस्यास्तीतिविजयी चक्रवर्त्ती चक्रवर्त्तिनः चक्रा
दुपलक्षणे ॥ अभिधर्म्मे तियोच्चसमुत्पत्तिः कदाचि

चक्रिणः किंशुगपदुत्पन्नाः किंयायिनइत्यनआह ॥
वसुवर्धः ॥ चक्रवर्तीसमुत्पत्तिनाधोसीतिसहस्र
कात् । सुवर्णरुप्यताश्चाय चक्रिणास्तेधरुमाते
॥ एकोद्विचतुःप्रायावलासहवर्तन । उत्पादन
स्वयंयानकलाहास्तुजितोबधाइति ॥ नदाकारणप्र
तिभासनाचक्रवर्ती ॥ अथवाश्रीसवोऽ ॥ चक्रव
र्त्तिरूपत्वात् चक्रवर्त्तिनि अतएवमहावल इति । म
हान्तिच तानि वलानि चतुरङ्गानि तानिविद्यन्ते य
स्यस महावल इत्युच्यते ॥ ७ ॥

गणामुख्यो गणाचार्य्यो गणेशो गणपतिर्वरी
महानुभावोधीरोऽनघनेयो महानयः ॥ ८ ॥

गणामुख्यत्यादि ॥ तत्रगणा मुख्य इति गणा श्रावक
गणा स्तेषांमुख्यः गणामुख्यः प्रधान इत्यर्थः ॥ गणा
चार्य्य इति । गणाः प्रत्येकबुद्धगणा स्तेषा मधिप
तितापदेशदात्वाचार्य्यो मल्लश्रीरिव ॥ गणावधि
सत्वगणा स्तेषा मीशा गणेशाः ॥ गणपतिः
। गणास्तथागतसमूहाः स्तेषांपतिः स्वामि वो
धिचित्तस्वभावत्वात् ॥ अतएव वशी । तत्स्वभाव

संदर्शनतया सर्वरूपप्रकाशत्वात् । महानुभावो धीरयो
ऽनन्तनयो महानय इति ॥ तत्र महानुभाव इति मह
नुभावो महात्म महांश्चासावनुभावश्च महानुभाव ॥
धीरय इति । धर्मधृति साधुः धीरयः ॥ अनन्तनेय
इति ॥ अनन्तनेयो अनन्तनेय । गम्भीर धर्माधिमु
क्तात् ॥ तथा च अधिमुक्तिप्रभागीहि स्वसिद्धांता
परज्ञवादिभिरपहर्तुं नशक्यत इत्यसावनन्तनय
इति ॥ महांश्चासो नयश्चेति महानयः ॥ मेहपाथइ
त्यर्थः ॥ ८ ॥

वाग्मीशो वाग्पतिर्वाग्मी वाचस्पतिरनन्तगीः ॥
सत्यवाक्सत्यवादी च चतुःसत्योपदेशकः ॥ ९ ॥
वागीशो वाक्पतिर्वाग्मी वाचस्पतिरनन्तगीरिति ॥ त
त्र वागीशोमिति वाचामीशो वागीशः । अर्थप्रति
भानात् । वाक्पतिः वाचांपतिः स्वामी इत्यर्थः इति
रूपप्रतिसंविदभिप्रायात् वाग्मीति प्रवक्ता धर्मप्रतिस
म्विदभिप्रायात् ॥ वाचस्पतिरिति ॥ प्रतिभानप्रतिस
विदभिप्रायात् । साधुमत्यां भूमौ चतुःप्रतिसंविद
भिप्रायात् ॥ धर्मप्रतिभानक इत्युच्यते ॥ अनन्तगीरिति ॥

अनन्तागी वाग्यस्यासौ अनन्तगीः । सर्वभाषाभिः
सर्वसत्वानां यथाभव्यतया धर्म्मचक्रप्रवर्त्तकत्वात् ॥
सत्यवाक्सत्यवादीच्च चतुःसत्योपदेशकइति ॥ त
त्रसत्यवागिति द्वे सत्ये यदुत संवृत्तिसत्यं परमा
र्थसत्यंच । तत्रसंवृत्तिस्त्रिविधा ॥ प्रज्ञप्तिसंवृत्तिः
प्रतिपत्तिसंवृत्तिः । उद्भावनासंवृत्तिश्च ॥ तयोः
संवृत्तिसत्यं परमार्थसत्यंतु । एकस्मान्परिनिष्प
न्नत्वात् वेदितव्यं ॥ सःपरमार्थस्त्रिविधः । अर्थप
रमार्थः । ज्ञप्तिपरमार्थः । प्रतिपत्तिपरमार्थश्च ॥
तत्रार्थपरमार्थस्त्रधना ॥ परमार्थस्यज्ञानस्यार्थ
इति ॥ कृत्वाज्ञप्तिः परमार्थनिर्वाणः ॥ परमार्थ
इतिकृत्वा प्रतिपत्तिः परमार्थो मार्गः । परमास्या
र्थः परमार्थ इतिकृत्वा ॥ तदेतत्सत्यद्वयमाश्रित्य
यस्य वाक्षु वर्त्तते सत्यवादीति भव्यते ॥ तथाचो
क्तं सूत्रमध्यमके । आर्य्यनागार्जुनपादैः ॥ द्वे
सत्येसमुपाश्रित्य बुद्धानांधर्म्मदेशना । लोकसं
वृत्तिसत्यंच सत्यंच परमार्थतः ॥ अतयोर्न वि
जानन्ति विभागंसत्ययोर्द्वयोः ॥ तेधर्म्मनीदृशा

नत्रिगंभीरबुद्धशासन इति ॥ ततश्च सत्यवादीति । सत्यं भूतं भूतमात्मभावं तंवदितुं शीलं यस्य तथा ॥ वदनः सत्योपदेशक इति ॥ सकलज्ञेयाभि संक्षेपलक्षणानि । चत्वारि आर्यसत्यानि । दुःखसत्य स्कन्धादि विषयाणि सप्ताक्षराणि आर्याणांप्रतिकूलत्वात् । समुदयसत्यं समासतो यथोक्तं ॥ दुःखमेव अविद्यायाः संस्कारादिदुःखप्रत्ययत्वेन सत्यादिदुःखहेतुत्वात् ॥ निरोधसत्यं सर्वधर्माणां यथार्थपरिकल्पसमुत्पादलक्षणत्वात् । भगवान्बोधप्रतिपक्षभूतत्वदधिगमश्च ॥ मार्गसत्यं सम्बोधिपरिपूरणतो मैत्रीप्रभृत्यागादिति आदेशकः वदनः सत्योपदेशकः ॥ ९ ॥

अवेवर्त्तिकोध्यनागामि खड्गप्रत्येकनायकः ।
नानानिर्माणनिर्याती महाभूतैकुकारणः ॥ १० ॥

अवेवर्त्तिकोत्यनागामि खड्गप्रत्येकनायकः ॥ तत्रोवैवर्त्तिक इति । अनुत्तरायां सम्यक्सम्बोधेर्योऽपरावर्तनीयः सोऽवेवर्त्तिक उच्यते ॥ यथाश्रावकगोत्रेणाविवर्त्तिकः । तेनदिव्यतीति अवेवर्त्तिकः ॥ अचलायां भूमौव्याकरणाभावात् ॥ अनागामीति । अद्राक्षीत्प्राग्लब्धोदयः ॥ कामावचरेषु सर्वसंक्लेशप्रकारप्रहाणात् ॥

अनागामि इत्युच्यते॥ तथा चोक्तं॥ कामेऽष्टमप्रकारस्य नवमस्यच संख्यायां। जायतेसकृदागामी अनागामी च पुंगल इति॥ द्विविधः प्रत्येकबुद्धः खड्गचारी वर्गचारीच॥ तत्र खड्गचारिणमधिकृत्याह॥ खड्ग इति खड्ग इव खड्ग॥ खड्गनामगण्डकः तस्यमुद्दे एवएवंविधोभवति॥ तेनतुल्यत्वात्। एकवाचीप्रत्येकबुद्धः॥ खड्ग इत्युच्यते। प्रत्येकनायक इति। वर्गचारीएकमेकंनिनायकः प्रत्येकनायकः। वर्गचारित्वात्॥ नानानिर्याणानियोगमहाभूतैककारण इति॥ तत्रनानानिर्याणइति॥ नानानिर्याणानि अष्टकादिनिर्याणानि तैर्निश्चयेनयातीतिनिर्यातः॥ यद्यपिनिर्याणंचतत्सामान्येषुतथापदस्यप्रतिभासनात्॥ महाभूतैककारणइति। तत्रभूतानिचत्वारिपृथिव्यादीनि। नतुचाकाशस्यापिमहाभूतत्वात् पंचमहाभूतानि॥ कथंचत्वारिइत्युच्यते। महान्तिचतानिभवन्तिचेतिमहाभूतानि विपुलाकाशाक्रान्तेवस्थानात्॥ महत्त्वमेषांपृथिवीधात्वादीनांसाधारणकर्मविशेषत्वाच्चभूतत्वं॥ अतोल्पस्याकाशस्यमहत्वे सर्वैकदेशत्वस्यकाशादानुभू

नत्रिगंभीरदुरुद्धशासन इति ॥ ततश्च सत्यवादीति । सत्यं भूतं भूतभावतत्त्वभावं तंवदितुं शीलं यस्य तथा ॥ चतुः सत्योपदेशक इति ॥ सकलज्ञेयाभि संक्षेपलक्षणा नि । चत्वारि आर्यसत्यानि दुःखसमुदयनिरोधमार्गसत्यलक्षणा आर्याणां प्रतिकूलत्वात् । समुदयसत्यं समासतो यथोक्तं ॥ दुःखमेव अविद्यायाः संस्कारादिदुःखप्रत्ययत्वेन सत्यादिदुःखहेतुत्वात् ॥ निरोधसत्यं संसर्वधर्माणां यथार्थपरिकल्पसमुत्पादलक्षणत्वात् । भगवान्बोधिप्रतिपक्षभूतस्तदधिगमश्च ॥ मार्गसत्यं सम्बोधिपरिपूरणतो मैत्रीप्रभृतयोगादिति आदेशकः चतुःसत्योपदेशकः ॥ ९ ॥

अवैवर्तिकोऽनागामि खड्गप्रत्येकनायकः ।
नानानिर्याणनिर्यातो महाभूतैकवारणः ॥ १० ॥

अवैवर्तिकोऽनागामि खड्गप्रत्येकनायकः ॥ तत्रावैवर्तिक इति । अनुत्तरायां सम्यक्सम्बोधौ योऽपरमुखः सोऽवैवर्तिक उच्यते ॥ यथाश्रावकगोत्रेणावैवर्तिकः । तेनदिव्यतीति अवैवर्तिकः ॥ अचलायां अविपाकरणाभावात् ॥ अनागामीति । अग्रा दृष्टिर्ग्रा सम्बोधः ॥ कामावचरेणैव सर्वसंक्लेशप्रकारप्रहाणात् ॥

अनागतानि इत्युच्यते॥ तथा चोक्तं ॥ कामेऽष्टमप्रकारस्य नवमस्यच संख्यान ।जातेस्तु कारणाभावादनागतानी त्युक्तानीति॥ त्रिविधःप्रत्येकबुद्धः खड्गचारी वर्गचा रीच ॥ तत्र खड्गचारिणामधिकृत्याह ॥ खड्ग इति खड्ग इव खड्ग॥ खड्गनामगण्डकः तस्यमुक्ते एवएवविशेषो भवति॥ तेनतुल्यत्वात्। एकवान्प्रत्येकबुद्धः॥ खड्ग इत्युच्यते।प्रत्येकनायक इति। वर्गचारीएकमेकम्प्रतिनायकः प्रत्येकनायकः। वर्गचारित्वात्॥ नानानिर्याणानिर्याताभूतैककारण इति॥ तत्रनानानिर्याणइति॥ नानानिर्याणानि अभ्रकादिनिर्याणानि तैर्निश्चयेननार्यातिनिर्यातः॥ यथाहिनेयार्यांचिन्तासमाधेषुतत्रइषादयप्रतिभासनात्॥ महाभूतैककारणइति। तत्रभूतानिचत्वारिपृथिव्यादीनि। नतुचाकाशस्यापिमहाभूतत्वात् पंचमहाभूतानि॥ कथंचत्वारिइत्युच्यते ।महान्तिचतानिभवन्तिचेतिमहाभूतानि विपुलाकाशाकाशेवस्थानात् ॥महत्त्वेनेमांपृथिवीधात्वादीनांसाधारणकर्मविशेषत्वाच्चभूतत्वे ॥ अमीत्वस्याकाशस्यमहत्वे सर्वहेतुत्वत्वेवकाशदानान्नतुभू

नत्वं । असंस्कृतत्वाद्भूतो भवनार्थोभूः ॥ अतोनमहाभूतः आकाशः ॥ तस्माच्चत्वार्येवमहाभूतानि ॥ तेषांचतुर्णां महाभूतानां एकोऽद्वितीयकारणहेतुर्यस्मात्सोनथोऽर्हः ॥

॥ १० ॥

अर्हन्क्षीणाश्रवोभिक्षुर्वीतरागोजितेन्द्रियः ।
क्षेमप्राप्तोऽभयप्राप्तःख्यातिभूतोत्थनाविलः ॥ ७ ॥

अर्हन्क्षीणाश्रवोभिक्षुर्वीतरागोजितेन्द्रियइति ॥ तथार्हन्निति । अरयःक्लेशास्तान्हतवानित्यर्हन् ॥ संसारेपुनरागमनधर्मतयावासकक्षेपरिसंनद्धार्थः ॥ परेभ्यमनुष्याज्ञानंकर्तुमर्हतीति । शक्रोतीतिवा । उद्धर्मसंघरत्नमर्हतीति । अथेत्येधात्वर्थः क्रियमाणाभवेत्कविधंकृतामर्हतीतिवा । निरंतरंतथागतप्रतिपत्तिभूमिभिरर्हयेति ॥ पूजयतीत्यर्हन्मुच्यतेभगवान् ॥ क्षीणाश्रवइति । नवचशरीरधर्माऽकुशलमूलमाश्रवेभ्यउत्पादयतीतिवा ॥ क्लेशक्षणमयाभवाश्रवेतीति ॥ आसवाग्र्याद्वर्वीसञ्जिरायतनीभ्रवरोस्मत्वान्हि श्नलि वाध्यन्तइति ॥ क्लेशाआश्रवाइवोत्पादयःपञ्चविधस्याअविद्याप्रभावाः ॥ सहजापरिकल्पितावावि

विद्या क्षयाद्दृष्टव्याः ॥ कामाश्रवाभवाश्रवा । अ
विद्याश्रवो दर्शनेन क्षीयन्ते ॥ अशीलेन शीलसमा
धिस्कन्धेन कामाश्रवः क्षीणाः । अशीलेन प्रज्ञास्कन्धे
न दृष्टाश्रवक्षीणाः । अशीलेन विमुक्तिज्ञानदर्शन स्क
न्धेनाविद्याश्रवक्षीणाः ॥ शीलपरिपूरि भूम्यांवा दृ
ष्टिमार्गसम्यग्दृष्टाश्रवः क्षीणाः ॥ समाधिपरिपूरि
भूम्यां वा अवागामिमार्गे सम्यक्समाधिना कामाश्रवः
क्षीणाः प्रज्ञापरिभूम्यां वा अर्हन्मार्गे सम्यग्विमुक्ता
अविद्याश्रवः क्षीणाः । विमुक्तिपरिपूरि भूम्यांवा क्ष
यानुत्पादज्ञानाभ्यां भवाश्रवः क्षीणाः ॥ अर्हन्मार्गे
वा कामोपधिपरिज्ञानात्कामाश्रवः परिक्षीणाः ॥ सं
स्कारोपधि परिज्ञाना दविद्याश्रवः क्षीणाः ॥ अविद्या
प्रत्ययाभिसंस्कारा झेयोपधि परिज्ञाना दृष्टाश्रवः क्षी
णाः ॥ स्कन्धोपधिपरिज्ञाना भवाश्रवःक्षीणाः । दुःख
सत्यपरिज्ञाना दृष्टाश्रवः क्षीणाः । चक्षोवा दानस्कं
धादि लक्षणाः सर्वदृश्यः सर्वदुःखसत्यस्वभा
यसत्यप्रज्ञाणाच्च कामाश्रवः क्षीणाः ॥ निरोध
सत्य साक्षात्क रणाद्भवाश्रवः क्षीणाः । मार्गसत्य

भावनयाऽविद्याश्रवः क्षीणः । कामाश्रवप्रहाणाच्चैव पुत्रसारोभस्रोभवति । भवाश्रवप्रहाणाच्च मरणसार भस्रोभवति । अविद्याश्रवप्रहाणात्क्षेमसारो भस्रो भवति । क्षीणाश्रवप्रहाणात्तत्त्वसारोभस्रोभवति ॥ चतुर्भारपराजयाद्भगवान्मञ्जुश्री क्षीणाश्रवः ॥ अतएते आश्रवाः क्षीणा येषासौसतथा ॥ भिक्षतीति तथाऽभिधर्मे ॥ चत्वारोभिक्षवः पठ्यन्ते ॥ यउत संज्ञाभिक्षुः । भिक्षणाशीलोभिक्षुः । तत्रि चतुर्थसम्मतोभिक्षुः । परमार्थभिक्षुश्च ॥ तेषांच तेषां अयंपरमार्थभिक्षुः भिन्नक्लेशात् चतुर्भारे रभेदाच्च । वीतरागइत्यनेनचचैधातुके चतुरार्य सत्यानां षोडशाकारेण अधिगतवतिक्लेशानांदर्शन मार्गाच्चाप्रहाणात् वीतरागइत्युच्यते ॥ अतएव जितेन्द्रिय इति । सर्वविषयेभ्यभिभवनीयत्वात् ॥ क्षेमप्राप्तोभयप्राप्तः शीतिभूतोघनाविलः । तत्र क्षेमप्राप्त इत्यनेन क्षेमं कारणं कर्मनप्राप्तोयः स क्षेमप्राप्तः ॥ भीतिर्भयं नविद्यते भयंयस्य तदभ यं वाकर्म सर्वदाऽप्रतिषेधाभावात् ॥ वाक्कर्मणाः ततः

आत्मनः कर्म सर्वचित्तोपक्लेशाभावात् ॥ शीतिभूत इत्यनेन शीतं शान्त
त्वात्मनः कर्म सर्वचित्तोपक्लेशाभावात् ॥ शीतिभू
तागादिभिरभिभूतत्वात् । यस्मात्तदपगमात् शी
तीभवतीति शीतिभूतः । अनरणाह इति यस्मा
दर्थे कायवाङ्मनोदोषाभावत्वादनाविलोऽभ्यते
॥ ९९ ॥

विद्याचरणसम्पन्नः सुगतो लोकवित्तरः ।
निर्ममोनिरहंकारः सत्यवचनयस्थितः ॥ १०॥
विद्याचरणसम्पन्नः सुगतोलोकविच्चरः इति ॥
तत्रविद्याचरणसम्पन्न इति । अनेनतत्स्वज्ञानस
त्वस्यशास्तृसंपदं ज्ञाप्तिहेतुं दर्शयति ॥ चरणास
म्पन्नः आर्याष्टाङ्गमार्गः ॥ सम्यग्दृष्टि विद्याशब्दा
भ्यामनिचरणं नयप्रपन्नचरनः ॥ जागर्तुंसमर्थ
इति । कुत्सितोयोपि शिष्यो विद्याचरणं अ
धिप्रज्ञाशिक्षा अधिशीलं । अधिचित्तंच ।तत्र
विद्याहे चरणं प्रज्ञयापूर्व परिकर्मत्वात् । उर
चरणं पूर्वोक्तं चरणमितिकृत्वा विद्यायाश्च पू
र्वंचरणं ॥ अंसुतःपरिभुक्ता शीलसमाधयो

श्रुद्धिनः ॥ तथाहि । ज्ञानाया चक्षुर्वं पश्यन्नाभ्यां गीला
समाधिचरणाभ्यामिवगच्छन्ति गन्तव्यमनुप्राप्नो
न्ति इतिविद्याचरणशब्देननिस्त्रः शिक्षानिर्दिश्य
ते ॥ अथतिस्रभिर्विद्याभिः सम्पन्नो विद्याचरण
सम्पन्न इत्युच्यते ॥ सुगत इत्यनेनैवयथागन्तव्यं
गतस्तंदर्शयति ॥ सुष्ठुगतसुगतः पुनरेतदर्थे
नसुनटज्जरवत् ॥ निःशेषंज्ञेयगमनार्थेनसुप
रिपूर्णघटवत् ॥ तदर्थद्वयं वाश्रावकादि
भ्योविशेषणार्थंवा वाक्यवाहिनसुष्ठुगतः ॥ श्रा
वकादयोयद्यपिसुष्ठुगताः । पुनः पृथग्जनता
याअभव्यत्वात् । नतुनिःशेषगताः सर्वज्ञायेषु
ज्ञानविबन्धत्वात् ॥ एवंविद्याचरणसम्पन्न ॥
सुष्ठुनिःशेषात्मनाहि शास्त्रसंपद्दात्रस्यभ
गवतोज्ञानसत्वस्यतच्छास्त्रकर्म लोकविस्मा
दनाभ्यां पापाभ्यांदर्शयंति ॥ तत्रनः शास्त्रक
र्मिंकविधं ॥ भव्याभव्यलोकावलोकनंभव्य
विनयंच । तत्रलोकविदित्यनेन भव्याभव्य
वलोकनंदर्शयति । लोकंवेत्तीतिलोकवित्।

भव्याभव्य परिज्ञानात्मा असौलोकविदुच्यते ॥
तथाहि भगवान्मञ्जुश्रीस्त्रिकल्पात्रयो स्त्रिकल्पादि
वसस्य चेप्रज्ञाचक्षुषालोकमवलोकयति ॥ कोहीय
तेवाकोवर्द्धतेवा ॥ कःसंकटःप्राप्तःकोपायनिर्मोय
महप्रपाताद्दुःखस्वर्गमोक्षेयंप्रतिलपेयंकु
स्यानवरोपितानिकुशलमूलानि अवरोपयेयं । कु
स्यावरोपितानि परिपूरयेयं । कस्यापरिपक्वानि
परिपाचयेयमिति ॥ अनस्यपरउत्कृष्टोऽसौभ
गवान् । निर्ममोनिरहंकारसत्यदृढनयस्थितइ
ति ॥ तत्रनिर्मम इत्यनेनपदेनग्राह्यग्राहकाभावः ॥
निरहंकार इत्येनतत्रचग्राहकांशः तदुभयस्यापिमि
थ्याप्रभासनत्वात् ॥ तथाचनागार्जुनपादैः ॥ उक्तं
च रत्नावल्यां ॥ अस्त्यहं ममचास्तीति मध्येतत्पुर
मार्थतः ॥ यथाभूतपरिज्ञानान्नभवत्युभयंयत इति
॥ सत्यदृढनयस्थितइति गतार्थः ॥ १२ ॥

संसारपारकोटिस्थःकृतकृत्यःस्थलास्थितः ॥
केवल्यज्ञाननिष्ठुतःप्रनाशस्त्रोविदारणः ॥१३॥
संसारपारकोटिस्थःकृतकृत्यस्थलास्थित इति ॥ तत्र

संसारपारकोटिष्ठ इति अनेनैतद्दर्शयति ॥ संसा
रोहि भावरूपः पश्चोपादानस्कन्धान् । अनस्व
पश्चोपादानस्कन्धाः । क्लेशकर्मविद्युगतयागभग
त्यनगच्छेत्संसार इत्युच्यते ॥ तस्यपारंनिर्वाण
तच्च भावरूपं संसारश्च संसारपादौ तयोः तयोः
कोटिष्ठ स्तस्यांतिष्ठति इति संसारपारकोटि
ष्ठ स्तदुक्तं भावाभावस्वभावयोः संदत्तार्थि
तोसौ भगवान् मञ्जुश्री नपरमार्थतः कस्मात्यो
सक्ष्मस्यापि धर्मस्यानुपलब्धेरिति ॥ तथाचो
क्तं ॥ निर्वाणस्यच पारकोटिः कोटिसंसारकस्य
च । मतयोरन्तरंकिंचित्सुसक्ष्मंनोपविद्यतेति
॥ कृतकृत्य इति । अवश्यंकर्त्तव्यं कृतकृतीम
त्युच्यते ॥ तत्रशीलसमाधिप्रज्ञा परिपूर्या सर्व
दुःखविमोक्षस्थानकर्म तत्परिसमाप्त्या कृत
कृत्य उच्यते ॥ अस्यैच्छावज्रसंतोषवज्रवतांग
वज्रंसंरञ्जनीय ॥ वज्रमिथ्यादृष्टिवज्रविद्याः प
रिणतव्या कृता अनेनेति असौ इ. तकृत्य इति
॥ स्य लति स्थलनिर्वाणक्षमस्यानीयत्वात् ॥

न्नस्थितः ॥ सर्वदा धर्म्मकार्यस्य भावत्वात् इति॥
अक्षयधर्म्मतायामवस्थानात्। केवलज्ञानिभिः
तः प्रज्ञाशस्त्रोविदारणात् ॥ केवलंब्रह्म तज्ज्ञा
तं केवलंच तत् ज्ञानंचेति केवलज्ञानं ॥ त
स्माज्ज्ञानिभिः स्तुतः सतथोक्तः। प्रज्ञाशस्त्रोविदा
रणात् ॥ प्रज्ञा धर्म्मप्रविचयलक्षणा आत्माका
शैवशस्त्रं शस्त्रलक्षणं रूक्षादिकृन्तनत्वात्॥ते
न प्रज्ञाशस्त्रेण सर्वधर्म्माणां हेयोपादेयविवि
क्तेचबोधनात् ॥ १२ ॥

सद्धर्मो धर्मराड्भास्वान् लोकालोककरः परः॥
धर्मेश्वरो धर्मराजा श्रेयोमार्गोपदेशकः॥ १३॥
तथाचोक्तं। सद्धर्मो धर्मराड्भास्वान् लोकालोककः फ
रः परः॥ नचसद्धर्म्मोविविधः भेदोनमुख्यश्च ॥ तच्च
सनातनधर्म्मः सद्धर्मः। सन्नाहि बुद्धबोधिसत्वाश्च
तेषांधर्मं द्वादशांगप्रवचनानि। नचद्वादशाङ्गा
नि। सर्वंगेयं गाथाव्याकरणं उदानं निदानं
जातकं इतिवृत्तकं अवदानं वैपुल्यं निरुक्ति
र्थाद्भुतश्चेति ॥ अङ्गानि तानि प्रथमे रक्षेरन्

पुस्तके व्याख्यानं रोगानः सद्धर्म उच्यते । तस्या सु
धर्मरतिरिति। धर्म्मधातुस्वभावः वाच्यवाचकरहित
त्वात्। असाधविज्ञेय तथाचोक्तं विंशतिकायां ॥
धर्मनोवुद्धद्रव्या धर्मकायाहिनायकाः। धर्मतावा
प्यविज्ञेयानसाशक्याविजानितुं ॥ अतश्चाहभास्वा
न्निति । उभावपि धर्मो वाधाध्यात्मिकनमोऽविद्यामप
गमात्। लोकालोककरइति। लोकस्याज्ञानतमो हन्त्य
तस्तात्र भवति श्रेयोभे सदा॥ मनसाकर्मणावाचावा
र्योयत्तिविधः स्मृतेति॥ धर्म्मराजइति। धर्म्मस्यवा
ऽयंयत्रिमानभेदाभिन्नस्यराजाधर्म्मराजः॥ श्रेयो
मार्गोपदेशकोति। श्रेयोः सोमार्गः श्रेयोमार्गः न
स्तदिपादकोधर्म्मः श्रेयोधर्म्मइत्युच्यते। तस्योपदे
शकः श्रेयोमार्गोपदेशकइति॥ मार्गोपदेशको
भगवान्॥ तथाचोक्तं रत्नावल्यां ॥नैश्रेयस्यपुन
र्धर्म्मः सूक्ष्मोगंभीरदर्शनः। बालानामश्रुतवतां
क्लेशसंक्रोशिनोरिति ॥ १४॥

सिद्धार्थः सिद्धसंकल्पः सर्वसंकल्पवर्जितः॥
निर्विकल्पोक्षयोधातु धर्मधातुःपरोऽव्ययः॥

॥१५॥

सिद्धार्थः सिद्धसंकल्पः सर्वसंकल्पवर्जितेति। तत्रार्थ
तदर्थः॥ रूपादिविषयः सर्वग्राह्यग्राहकभावेनाभीवलो
कप्रसिद्धः सिद्धश्चासावर्थश्च सिद्धार्थ तथाहि बहिरर्थ
तयाविकल्पितभावनारूपादीनामात्मनोजातिगुणक्रि
यादीनांबलक्षणानांतत्वतोऽभिनिवेशःपरि क
ल्पितस्वभावः॥ तथाचोक्तं आर्यविमलप्रभादेः॥ येन
येनविकल्पेनयद्यद्वस्तुविकल्प्यते। परिकल्पितस्वभा
वोसस्वभावेनसविद्यतेनेति॥ सिद्धसंकल्पश्चेति। संकल्पः
सिसंकल्पः॥ सिद्धश्चासौसंकल्पश्चेतिसिद्धसंकल्पः
॥परतंत्रस्वभावहेतुःप्रत्ययेस्तंत्रयतीति परतंत्रः॥
तथाहि। कुशलाकुशलाभ्यासंस्कारादिवकुविषवास
नानुगमभेदकारणकलापात्॥ प्रतिक्षणमुत्पद्यमानस्य
तत्तदन्यस्यापिआत्मतयाद्रव्यप्रतिभासतः॥ चित्तचै
तकलापक्षणस्य परतंत्र स्य यन्निस्यत्वहेतुत्वविषय
त्व कल्पनासाश्चसोपरतंत्रः॥ तथाचाह। परतंत्रस्व
भावस्तुविकल्पप्रत्ययोद्भव इति॥ सर्वसंकल्पवर्जि
तइति॥ परनिष्पन्नस्य स्वभावस्यस्वभावः॥एत
स्मेव परतंत्र स्य प्रत्या मार्गविभुद्धा वा सर्वोपरणा

निर्मलाद्वयशून्यता परिनिष्पन्नस्वभावः॥ तथाचोक्तं॥ निष्पन्नस्तस्य पूर्वेण सदा रहितं त्रयेति॥ तत्र ज्ञानि स्वभावोभगवान् ज्ञानसत्वः॥ निर्विकल्पाक्षयोधातुर्धर्मधातुपरोव्ययइति॥ तत्रनिर्विकल्पइति। परिनिष्पन्नज्ञानेविकल्पाभावात्॥ नविकल्पाद्वितकश्चित्संसमाविद्यतेमना। तेनोपेतविकल्पस्यसदैवनवानिर्वृतिरिति॥ अक्षयइतिशून्यतायाआकाशतुल्यत्वात्॥ धातुरितिउत्पत्तिमतं। सर्वसंस्काराणांहेतुभूतत्वात्॥ धात्वर्थोत्यत्रेहत्वर्थः॥ आर्यधर्माणांतत्फलस्यचसत्रभावत्वात्। परंशनिवाद्यश्रावकादिभ्योवशिष्टत्वात्॥ अव्ययइति असंहृतस्वभावत्वात्॥ १५॥

पुण्यवान्पुण्यसम्भारो ज्ञानंज्ञानाकरंमहत्।
ज्ञानवान्सदसज्ज्ञानी सम्भारद्वयसंभृतः॥ १६॥

पुण्यवान्पुण्यसंभारो ज्ञानंज्ञानाकरंमहदिति॥ तत्र पुण्यमानीतिपुण्यं तदस्यास्तीतिपुण्यवान्। पुण्यसम्भारइति। सम्यक्स्तारणं संभारः पुण्यानांसंभारः पुण्यसंभारः॥ तत्रचमंत्रपदद्वयेनतदुक्तं भवति। लोकिकलोकोत्तरपुण्यसम्भारेण

रविशुद्धस्त्यर्थः॥ ज्ञानमिति। बाह्यश्रावकादिज्ञानं ज्ञानान्तरमिति। बाह्यश्रावकादिभ्योज्ञानेभ्योऽन्यज्ञानं ज्ञानान्तरं सविशुद्धधर्मधातुज्ञानागर्तं च चित्तमिति। बाह्यास्यार्थस्यप्रमाणविशुद्धत्वेनासत्वात्॥ प्रमाणविरोधस्यचविसंवादनाप्रतिपादितत्वात्॥ चित्तमात्रं भोजिनपुत्रा यदुतत्रैधातुकमित्यागमात्॥ सर्वभावस्यदर्शनस्यच। सर्वप्रमाणविरुद्धत्वात्। ज्ञानान्तरं। अतस्यधर्मस्यदेशनेति। अशेषक्लेशसत्वधातुपरित्राणाशयत्वात्। ज्ञानवानादि। ज्ञानवानिति तदेवभूतं ज्ञानमस्यास्तीतिज्ञानवान्। सदसज्ज्ञानीति। सच्चासच्चतदसदिति तयोः ज्ञानंसदसज्ज्ञानं तस्यास्तीति सदसज्ज्ञानी। तथाचोक्तं आर्यदेवपादैः। सदसत्सदसच्चेति यस्यपक्षो नविद्यते॥ उपारंभचिरेणापि तस्यवक्तुं नशक्यत इति॥ संभारद्वयसंभृतइति॥ अनन्तरोक्तेन संभारद्वयसंभृतेनपरिपूर्णइत्यर्थः॥ १६॥

शाम्भवोविश्वराशोगी ध्यानधैर्याधियांपतिः
प्रत्यात्मवेद्योह्यचलः परमार्थस्त्रिकायधृक्॥

नत्रशाश्वतेति। अयंधानित्यतया असंसारावस्थानात्॥ धर्मधातुस्वभावस्थानयेत्यादिनाभिप्रायः॥ विश्वेश्वरादिति। विश्वकृत्लंजगत्। राज्यते दिव्यते इति राट्। स्थिरश्चरसर्वस्वभावकत्वात्॥ योगीति। ज्ञानमात्रसमापत्तियोगमित्यभिधीयते। इतिवचनाद्योगोऽस्यज्ञानं। तदस्यास्तीतियोगी। ध्यानमितिचज्ञानात्मकत्वात्॥ ध्येयइतिध्यातव्यविषयत्वात्॥ श्रियांपतिरिति। श्रियांबुद्धीनांपतिः स्वामी सर्वतथागतज्ञानकायस्वभावत्वात्॥ तत्रप्रत्यात्मइति। आत्मंप्रतिवेद्यप्रत्यात्मवेद्यधर्मधातुज्ञानस्यस्वयंसंवेद्यत्वात्। कुमारीसुरतसुखत्॥ परसत्त्वसंक्रान्तयोगात्तथाचोक्तं। योनेकोनाप्यनेकस्वपरहितमहासंपत्साधारभूतोनेत्राभावोनभावः स्वभिन्नसमस्तपदार्थविभावः स्वभावः॥ निर्लेपंनिर्विकारं शिवमसमसमव्यापिनं निःप्रपञ्चंवन्द्यप्रत्यात्मवेद्यं नमस्मनुष्यं धर्मकायं जिनानामिति॥ अतस्वअचलइति। हीतियस्मादर्थे। अतश्चासौभगवान्मञ्जुश्रीः अचलः सर्वविकल्पगोचरत्वात्। परमाश्चइति आ

दोभव आद्य. परमश्चासौआद्यश्चेतिपरमाद्यः सचभ
गवान् श्रीवज्रसत्वः ॥ त्रिकायधृगिति ॥ त्रयःकायाधर्म संभोगनिर्माणलक्षणाः तांधारयतीति त्रिकायधृक ॥ ७ ॥

पञ्चकायात्मकोऽजः पञ्चज्ञानात्मकोविभुः ॥
पञ्चबुद्धात्ममुकुटः पञ्चचक्षुरसंगधृक ॥ १८ ॥

तत्रपञ्चकायात्मकेति । स्वाभाविकसंभोगिकधर्मनैर्माणिकधर्मकायात्मकपञ्चकाया । तस्वात्मास्वभावोयस्यासौ पञ्चकायात्मकः । अज इति गतार्थः ॥ पंचज्ञानात्मइति । आदर्शसमताप्रत्यवेक्षणासत्यानुष्ठानधर्मधातुज्ञानानीत्येतानि पंचज्ञानानि ॥ तान्येवात्मास्वभावोयस्यस पञ्चज्ञानात्मकः ॥ विभुरितिगतार्थः ॥ पंचबुद्धात्म · अक्षोभ्यरत्नसंभवामोघसिद्धिवैरोचनाः ॥ तदात्मकस्तत्स्वभावोमुकुटोयस्यासौ पंचबुद्धात्ममुकुटः ॥ पंचचक्षुरितिः । मांसदिव्यप्रज्ञाधर्मबुद्धचक्षुपंचतानिविद्यतेयस्यस पंचचक्षुः ॥ अतएव असंगधृगिति । असंगाअसंसक्ता सर्वज्ञेयस्वरूपलिप्ताऽज्ञानेयस्यासावसंग

यक् ॥ तथा चोक्तमभिधर्मे ॥ द्विविधा हि स्वभावसंख्या दृश्यो हेतुश्च दृष्टेर्शिकाइति ॥ १८ ॥

जनकः सर्वबुद्धानां बुद्धपुत्रश्च पैरोवरः ॥
प्रज्ञाभवोऽद्वयोनिर्धर्मयोनिर्भवान्नतः ॥ १९ ॥

जनकः सर्वबुद्धानामिति । तत्र जनकः उत्पादकः सर्वबुद्धानां बोधिचित्तस्वभावत्वात् । अतस्तोक्तं श्रीलंकावतारसंग्रहे ॥ संभूताः संभविष्यन्ति ये मासाश्च तथागतेति ॥ बुद्धपुत्रइति । सर्वबोधिसत्त्वावरणविनिर्मुक्तइति ॥ सर्वप्रकारः सर्वधर्मसंदोषकः । सर्वचित्तस्याभासश्रोतिर्विकल्पज्ञानविशेषोबुद्धः । तस्यपुत्रोबुद्धपुत्र आत्मजः ॥ पुत्र इत्युच्यते । तस्यचात्मापरमार्थेन तथागतस्वभावतत्वात् ॥ निर्विकल्पज्ञानस्यतत्स्वभावतोबुद्धजातइति ॥ अनेनार्थेन बोधिसत्वोबुद्धपुत्रउच्यते । पर इति उत्कृष्टत्वात् । वर इति अभिगमनीयानामग्र्यश्रेष्ठत्वात् ॥ प्रज्ञाभवोऽद्वयोनिरिति ॥ तत्र प्रज्ञा धर्मप्रविचयः सर्वलोकोत्तरा धर्मदेशना योविवेकः प्रज्ञेव भवः प्रज्ञाभवः पञ्चबुद्धस्कन्धाः शीलसमाधिप्रज्ञाविमुक्ति

विमुक्तिज्ञानदर्शनात्मकाः तेभ्यऽजवतीतिप्रज्ञाभवो
ऽव इत्युच्यते भगवान्। योनिरीति। योनिः कारणा
मुत्पत्तिमर्यादा साश्रवाणां धर्माणां नऽुच्यते। धर्मयोनि
रिति। धर्माणांयोनि धर्मयोनिः। धर्मो अना श्रवाः क्ष
शाः कर्मपथास्तेषांयोनिहेतुरित्यर्थः॥ भवानऽु
दिति। भवः संसारः तस्मान्नमवसार्मतत्करोतीतिभ
वानऽुकृत्॥ १९॥

घनैकसारोवज्रात्मा सर्वज्ञोजगत्पतिः॥
गगनोऽुवः स्वयंभूःप्रज्ञाज्ञानऽुमऽुत्तमः॥२०॥

तत्रघनैकसारीति। घनश्चासावेकसारश्चघनैकसा
रः। घनोनिबिडः। अविघमानान्तरत्वात् सारऽुक्त
शब्दलाभाच्च अतस्यवज्रात्मेति। वज्रज्ञानमभेद्य
त्वात्। तद्वालास्वभावोयस्यासौवज्रात्मा सर्वतथा
गतानांज्ञानकायत्वात्। सर्वज्ञोजानऽीति. यत्र यत्रस
त्त्वार्थं पश्यति तत्रतत्र सर्वज्ञत्वलक्षणमेवजऽ्ञमपरि
ग्रहात्। सर्वज्ञोजानऽीत्युच्यते॥ उपपत्तिर्वशितासा
भात्॥ जगत्पतिरिति. जगतांपतिः जगत्पतिः
जगत्स्वामीत्यर्थः॥ तेषांसर्वसंपत्त्याधारभूतत्वा

न। सर्वोज्ञातइति॥ गगनोऽवस्वयंभूरित्यादि॥ग
गनंभ्रम्यनाशार्थं तस्मादुऽवतीतिगगनोऽवः॥ स्वयं
भूरिति॥स्वयंभवतीति स्वयंभूः। बोधिचित्तबुद्धा
त्मकत्वात्॥प्रज्ञाज्ञानमहाइति। प्रज्ञाबाअद्वयस्व
रूपायांज्ञानंप्रज्ञाज्ञानंनिर्विकल्पात्मकंतेदवानस्वः
सः वासनाक्लेशादरूपलक्षमत्वात्। महानिति। क्षिति
जलपवनतरुणासमप्रकाशमानकाससोमेसूर्योऽमू
र्त्तित्वेनमहान्॥ ज्ञानबलधैर्य्यनेसत्कृतेश्वसान
भ्ययोगाच्च॥ २०॥

वैरोचनोमहाधीश्चिर्ज्ञानज्योतिर्विरोचनः॥
जगत्प्रदीपोज्ञानोल्कामहातेजाप्रभास्वरः॥२१॥

तत्रवैरोचनइति गतार्थः। महाधीश्चिरिति महा
धीश्चिसुविशुद्धधर्मधातुज्ञानमुखेनधीश्चिर्ज्ञेयावभा
सासाधर्म्मेनज्ञानज्योतिरिति॥ ग्राह्यग्राहकइति
रहितत्वात्॥अद्वयज्ञानंतस्यज्योतिर्ज्ञानज्योति
रित्याह॥ आदर्शज्ञानस्वभावत्वाद्विसरनदीप्यनइ
तिविरोचनः॥ सांवृतिककायेवसकलजगदर्थज्वल
नात्॥ जगत्प्रदीपइति। जगतांप्रदीपप्रत्यवेक्षणा

ज्ञानस्वभावत्वात् ॥ ज्ञानोल्क इति । ज्ञानस्य उल्कादी
प्रियस्य सज्ञानोल्क इति । समता ज्ञानस्वभावेन म
हातेज इति । महातेजा वभासोऽथ स्य स महातेजः ॥ क
र्मानुष्ठानज्ञानमुखेन । प्रभास्वर इति । प्रकर्षेण भा
स्वरः प्रभास्वरः पञ्चज्ञानात्मकत्वात् ॥ समता द्वीप
नद्वीलोभगवान मञ्जुश्रीः ॥ २१ ॥

विद्याराजाग्रमंत्रेशो मंत्रराजो महार्थकृत् ॥
महाक्षमो धृतो क्षीवो विश्वदृग्वियत्पतिः ॥

॥ २२ ॥

नत्र विद्याराज इति । विद्यानां राजा विद्याराजः सर्वासां
विद्यानां धारणी मरुल्लक्षणानां तज्ज्ञत्वात् । अग्रमंत्रे
शइति । अग्रश्चासौ मंत्रश्चेति अग्रमंत्रः तस्येशः
प्रभुः । अग्रमंत्रश्च ह्रूंकारोऽवगन्तव्यः ॥ तस्य महासु
ज्ञात्मकत्वात् । मंत्रराज इति । मंत्राणां धर्ममरुल
क्षणविदितानां राजा मंत्रराजा ॥ महार्थकृदिति । महां
श्चासावर्थश्चेति महार्थः तं करोतीति महार्थकृदि
ति ॥ कर्ममरुल्लाक्षणैः सकललौकिकलोकोत्तर
ज्ञानैः सिद्धिर्वाच्यगम्यमानसिद्धिश्च सर्वत

थागतपूजाकर्तृत्वेनामेयपुण्यसंभारोपार्जकत्वेनच
सर्वसत्वार्थकरणात्॥ महोष्णीषेत्यादि॥ महांश्चासा
वुष्णीषश्चमहोष्णीषः॥ सर्वतथागतोष्णीषाकारेण
राशीभूत्वाऽवस्थितत्वात॥ सर्वतथागतोष्णी
षसदृशत्वाच्च महोष्णीष उच्यते॥ विश्वदृगीति।
वियत्पतिरिति। वियदाकाशंतस्यपतिः वियत्पतिः॥
शून्यतार्यापतिरित्यर्थः॥ तथाचोक्तं। निरालम्बस्यचि
त्तस्यस्थितिराकाशलक्षणा। आकाशभावचैवंशून्य
तेतिभावनामतेति॥ 22॥

सर्वोद्घात्मभावाग्र्योजगदानन्दलोचनः॥
विश्वरूपोविधाताच वृज्योमान्योमहाऋषिः॥23॥

सर्वोद्घेत्यादि। तत्रसर्वोद्घात्मभावाग्र्य इति। सर्वेचतेउ
द्घाश्चसर्वोद्घाः॥ शाश्वतादयस्तेषां आत्मना सर्वोद्घा
त्मा तस्यसर्वोद्घात्मनः स्वभावस्य। भावः सत्ता। सर्व
उद्घात्मभावो धर्मधातुः॥ अग्र्येभवोऽग्र्यः। सर्वोद्घात्मभा
वेनतथतैकरसत्वेनाग्र्यो भगवान्मञ्जुश्रीः॥ येनहेयो
पादेयप्रविचयात्मकत्वात सर्वतथागतज्ञानकायत्वा
न्न। तस्यभगवतः जगदानन्दलोचन इति॥ तस्यलो

चनोभगवान्मंजुश्रीः॥प्रज्ञाचक्षुः॥विश्वरूपेति॥स्थि
रचलसर्वसत्वभावतयानानारूपसंदर्शकत्वात्॥
विधातात्वेति॥सर्वसत्वानां यथारूपभव्यरूपयासर्व
मंत्रमुद्राभिसमयमहाउलोपसर्गात्॥सर्वलोकिक
लोकोत्तरपूजार्हत्वात्।पूज्यपूजनीयः।अतस्त्वमा
न्यो माननीयः सर्वसत्वानां महाऋषिरिति।महां
श्चासावृषिश्चेति महाऋषिः।उक्तोभगवान्मह
ऋषिरित्युच्यते॥ २३ ॥

कलत्रयधरोमंत्री महासमयमंत्रधृक्॥

कलत्रयधरःश्रेष्ठस्त्रियानोत्तमदर्शकः॥२४॥
तत्रकलत्रयधरइति।कायवाक्चित्तभेदेन तांधार
यतीतिकलत्रयधरः। मंत्रीति। मंत्राः सकललो
किकलोकोत्तरा तेविद्यन्ते यस्य स मंत्री। सर्वमंत्र
मूर्तिधारत्वात् भगवतो ज्ञानसत्वस्य।महासमय
मंत्रवेदितेति।महांश्चासौ समयश्च महासमयः
॥सचभगवान्बोधिचित्तवज्रः। तस्यमंत्रः। सम्य
क्त्रायतेत्रयतीतिमंत्रः॥ ज्ञानरूपात्मकत्वात्। तद्धा
रयतीति महासमयमंत्रधृक्॥ भगवान्सर्वतथाग

तज्ज्ञानकायः ॥ रत्नत्रयेत्यादि। रत्नानांत्रयं रत्नत्रयं दुर्लभत्वात् महार्घत्वात् प्रकाशकत्वाच्च ॥ रत्नानीव रत्नानि विशुद्धधर्मसंघानि तानि धारयतीति रत्नत्रयधरः ॥ सर्वेषामभिगमनीयानां यत्प्रथमतरमभिरमनमर्हति सभ्रिक उच्यते ॥ सचभगवान् मंजुश्रीः ॥ त्रियानोत्रमदेशक इति । त्रयाणां श्रावकप्रत्येकबुद्धमहायानानामुत्तमदेशक इति ॥ सर्वसत्वानां गोचेन्द्रियानुशयज्ञानत्वात् ॥ २४ ॥

अमोघपाशोविजयी वज्रपाशो महाग्रहः ॥
वज्रांकुशोमहापाशो वज्रभैरव भीकरः ॥ २५ ॥
सुविशुद्धधर्मधातुज्ञानगाथा पंचविंशतिः ॥

तत्रअमोघपाश इति । अमोघाअवंध्यपाशइव पाशो यस्यासावमोघपाशः ॥ बोधिचित्तवज्रविनयानांसत्वानांतथाप्रतिभासनात् ॥ विजयी त्रैलोक्यसमाक्रमणेन वज्रपाश इति रत्नसंभवद्वारेण । महाग्रह इति ग्रहणंग्रहः महांश्चासौग्रहश्च महाग्रहः ॥ महांग्रहो वज्रनिगडः । सचअमितासत्वभावेन । वज्रांकुश इति अक्षोभ्यस्वरूपेण महापाश इतिपा

श सोभ इत्यावेशपर्यायः ॥ महांश्चासौ पाशश्चेति महा
पाशो ब्रह्मावेशः । सच्चामोघसिद्धिरूपेणेति ॥ ततो
सौभगवान्नित्येभिर्महावैरोचनादिभिरभिदायकैः
सद्रसमूहैः नाममंत्राक्षरपदैः प्रथमान्तविभक्तयं
नवभिर्देवो वेदितव्य इति नत्वा भिन्नपिण्डवत् ॥ म
हावैरोचनादयः शुक्लवर्णाश्चक्रपाशयो भूत्वा निष्क
लानिष्कलमतत्सर्वं दग्ध्वा सर्वसत्त्वांश्च मरुव
मिवमोक्षसुखेन संशोध्य पुनरागत्य नाममंत्राक्षरा
णिभूत्वा स्वचक्रे चक्रीभूय स्थितानि पश्यत ॥ तत्पू
र्वमंत्रैरक्षर्यो ग्रहानिवाधिसत्वो नामसंगीति प
न स्मरणागरणासमूहान् ज्ञानोति । द्वितीयस्य
महावैरोचनचक्रस्य च नाममंत्राक्षरपदानि जलभेद
नवच्चिंशत्प्रविभक्त्यपूर्ववत्सर्वमनुविधेयमित्याम्नायः
--- पादा - पंचविंशतिनाममंत्राक्षरा णीति । शी
तिगतमं --- २५ ॥ १८१ ॥

आर्य्यनामसंगीतिटीकार्थो नाममंत्रार्थावलोकिन्यां
सुविशुद्धधर्मधातुज्ञानसूत्राधिकारः षष्ठः ॥ ॥
गाथापञ्चविंशति ॥ २५ ॥

क्रोधराड्खरमुखोभीमः प्ररोणत्रः वज्रजोवली ॥
दंष्ट्राकरालकंकालो हलाहलशताननः ॥ ९ ॥

अतःपरं तीक्ष्णमादर्शज्ञानस्वभावक्रोधवज्रत्रैलोक्यवि
जयरूपेण भगवतः सर्वतथागतज्ञानकायस्य स्तुति
माह ॥ ॥ वज्रभैरवभीकर इति वक्तव्यनिर्देशः ॥
ततोऽयमर्थोभवति । वज्रभैरवश्च भीकरश्च वज्र
भैरवभीकरः ॥ तत्र श्रीवज्रभैरवतंत्रे । द्वाविमौ पि
पठितत्वात् । यदुत वज्रभैरवो वज्रभीकरश्च । ता
वत्स्वभावो यस्य स वज्रभैरवभीकरः ॥ भगवान्
मंजुश्रीकस्मादित्यतआह ॥ दमविनयानांसत्वानां
सौम्यतामुपयोगात् ॥ तथोक्तं श्रीसम्वरतंत्रे ॥ अ
त्युग्ररौद्रेषु सौम्यतामोपयुज्यते । अज्ञोपायमत्व
श्चक्रुस्सर्वतथागतइति ॥ क्रोधराड्खरमुखोभीमः
वसोत्रः वज्रजोवली इति ॥ तत्रक्रोधराडिति ॥
श्रीक्रोधविजयेपदमत्रे । राडुत्याह । क्रोधानांराड्
क्रोधराड् ॥ तथाचोक्तं ॥ अथैवमंजुघोषस्य नाम्ना
क्रोधयमान कः । दष्ट्वातमपरे क्रोधाः सर्वविगलि
तौजसः इति ॥ खरमुख इति ॥ श्रीमायाजालात

त्रे ॥ षण्मुखानिव स्यासौ षण्मुखः । करचरणयोर्
व्यर्थात्षः इत्यमिनिर्वेदितव्यं ॥ सच्च भगवान् भीमर
ति । सेनासत्यभामाभामेति । भीमश्रीवज्रमाणि
भिषेकतंत्रे । भीमोभयानकः ॥ तथाच सर्वाङ्गेषु स
र्वरोमकूपेषु वज्रतेजःप्रभृतानि मण्डलानि निश्चा
र्यतेषु मण्डलेषु क्रोधराजान्नानावेशान्नानाप्रहर
णोपेतान् भ्रूभङ्गकुटिलोदग्रान् । महाभीमभ
यंकरालवदननयनान् ॥ संस्मार्यभयोपदर्शना
श्रीमदित्युच्यते ॥ षण्मेत्रइति । षण्नेत्राणिय स्य स
षण्मेत्रः ॥ अत्रैकदेशेन स्तुतिः । उभयत्रसमुदा
योपचारात् । यथाभीमसेनोभीमसत्यभामाभी
मेति ॥ षड्भुज इति । श्रीवज्रमण्डलतंत्रे । षड्भु
जा यस्यासौ षड्भुजः ॥ बलीइति । कायिकांसामर्थ्या
नदस्यास्तीति बली ॥ श्रीमत्सर्वविघ्नोत्तमतंत्रे । म
हावज्रबलइतिप्रसिद्धः ॥ तत्र दंष्ट्राकरालकंकाल
इति ॥ श्रीवज्रमनोदये दंष्ट्राकरालेऽग्रभयान
केयस्यासौ दंष्ट्राकरालः ॥ कंकालइति श्रीचक्र

सम्वरे । हलाहलशतानन इति । अयमपि पूर्ववत् ॥ दंष्ट्रनिर्देश्यः । हलाहल इति श्रीअमोघपाशतंत्रे । शतानन इति श्रीवज्रलेखतंत्रे ॥ शतानिआननानि मुखानि यस्य स शतानन: ॥ १ ॥

यमान्तको विघ्नराजो वज्रवेगो भयंकरः ॥
विघुष्टवज्रो दंष्ट्रज्रो माया वज्री महोदरः ॥ २ ॥

यमान्तकेति · श्रीसमाजतंत्रे ॥ यमेस्मारि यस्य स को यमान्तकः ॥ विघ्नराड् इति · राजतश्चतिरा ड् । विघ्नानांगणपतिप्रभृतीनांराड् विघ्नराड् ॥ अन्तकृतान्तलिः । समाजादौप्रतीत । वज्रवेग इति । श्रीमहासमयतंत्रे । वज्रस्यवेगो वज्रवेग न हेगो यस्य सवज्रवेगः ॥ भयंकर इति । श्रीगुह्येन्द्रतिलके । भयंकरोतीतिभयंकरः । सर्वदुष्टसंत्रासकरः ॥ तत्रविघुष्टवज्रेति · श्रीअष्टसमनाविजये । विशेषेण घुष्टो विघुष्ट महाशब्द इत्यर्थः ॥ सर्वत्र वज्रो अभेद्यत्वात् यस्यसविघुष्टवज्रो दंष्ट्रज्रः ॥ दंष्ट्रज्र इति । श्रीगुह्येन्द्रतिलकेस्व । दंष्ट्रज्रेय

स्यसहस्रकुञ्जः॥ मायावज्रइति· अस्मिन्त्रैवर्णिकशास्त्रेविवेकपञ्चके॥ मायानिर्माणात्तदेवज्रमभेद्यरूपत्वात्। अस्यसमायावज्रः॥ महोदरइति। तन्त्रेवमहदुदरंयस्यासौ महोदरः॥ २॥

कुलिशोशोवज्रयोनिर्वज्रमणिर्नभोपमः।
अचलैकजटीपोगजचर्मपटच्चरः॥ ३॥

तत्रकुलिशइति· कुलिशोवज्रः तस्येशः प्रभुरित्यर्थः॥ सचश्रीवज्रप्राकाम्यतन्त्रे। वज्रयोनिरिति भूतडामरतन्त्रे। वज्रयोनिकारणंयस्य सवज्रयोनिः॥ वज्रमणइति॥ श्रीवज्रमणालंकारे। वज्रस्यमणिर्वज्रमणिः सार इत्यर्थः॥ नभोपमइति। श्रीगुह्यकाल्यां। नभवतीतिनभः आकाशं उत्पत्तिमत्वावकाशदानात्। स्वयंवासंस्कृतत्वात्· नभवतीत्यर्थः॥ तच्चभूम्यतात्त्वकर्मतेनोपमायस्यसतथोक्तः॥ भूम्यतोपमइत्यर्थः॥ तत्रअचलेकजटीपइति। ढक्कनिर्देशः॥ ततश्चायमर्थः॥ अचंश्च एकजटीपश्च अचलेकजटीपः॥ तत्राचलः श्रीमायाजालादौ॥ एकजटीपः श्रीवज्रशाकिनीतन्त्रे॥ तत्रास्य

ते नकम्पते सर्वमारैरित्यचलः। एकश्वासोजगत्व
एकजगत्। तयाआदेपः सोऽहंयस्यासावेकजग
देपः॥ गजचर्मपदर्द्धरीगिति॥ श्रीचक्रसम्बरे
॥ गजस्यचर्मपदश्वासावर्द्धश्वपदर्द्धः॥ गजचर्मे
वपदर्द्धः गजचर्मपदर्द्धः नंधारयतीति गजचर्म
पदर्द्धधक॥ ३॥

हाहाकारोमहाघोरो हीहीकारोभयानकः।
अट्टहासोमहाहासो वज्रहासोमहारवः॥ ४॥

तत्रहाहाकार इति। श्रीक्रोधविजये। हाहाभूतनामम
राजलं तत्रहाहाकृत्वोत्तिष्ठतीति हाहाकार इत्युच्य
ते। महाघोर इति। तत्रैवमहांश्वासोघोरश्चमहा
घोरः॥ हीहीकार इति। श्रीक्रोधेकुतिलके। तदन
करणोमास्थानात्। भयानक इति। श्रीवज्रतंत्रस
मुच्चये॥ तत्राट्टहासइति। कसाधारणाख्या
लंकारयुक्तत्वे। अट्टैरुच्चैर्हासः अट्टहासः। महा
हासइति। नैरैर्नर्यैणा। वज्रहासइति। ज्ञानह
सः। ज्ञानमानसः। महारव इति। त्रैलोक्यपूरकत्वे
न। महांश्वासोरवश्च महारवः॥ एतेचत्वारिंशि

नत्रैवप्रभेदे॥ ४॥

वज्रसत्वोमहासत्वो वज्रराजोमहासुखः॥
वज्रचरोमहामोदो वज्रहूँकारहूँकृतिः॥५॥

तत्रवज्रसत्वइति। परमाद्य। महासत्वइति। महावज्रधरः। श्रीसमाजे। वज्रराजइति। श्रीगुह्यकाशे महासुखइति। श्रीसम्वरे। तत्रमहासुखमिति यत्तथागतानाभवज्रत्वं तन्महासुखमितिउच्यते॥ तत्रैवोक्तं। सुखसमितिविख्यातं सर्वावोधं महासुखमिति॥ तत्रवज्रचराइति॥ श्रीवज्रगुह्यालंकारे। वज्रस्यचरणो वज्रचराः। चरोविगडउच्यते। श्रीप्रज्ञापारमितायां। महामोदइति। गुह्यसमाजतिलके। महांश्चासौमोदश्च महामोदः। वज्रहूँकारहूँकृतीति। श्रीतत्वसंग्रहे। वज्रहूँकारश्चहूँकृतिश्चत्वारोहूँकारा विद्यन्ते यस्यासौ वज्रहूँकारहूँकृतिरिति॥ ५॥

वज्रवाणायुधधरो वज्रवक्त्रोनिकृन्तनः॥
विश्ववज्रधरोवज्री एकवज्रीरणञ्जहः॥ ६॥

तत्रवज्रवाणायुधधर इति। श्रीमहासमयतंत्रे। वज्रो

कितं वा र्णं धनुश्चतदेकमुर्धं तद्धारयतीति वज्रधारा
युधधर इति ॥ वज्रखड्ग इति । अत्रैव माया जाल
राजे ॥ वज्रश्चखड्गश्च वज्रखड्गौ तावेवायुधं यस्य
स वज्रखड्गः ॥ निरूत्तनन इति । तत्रैव ॥ तत्त्वविश्व
वज्रधर इति । श्रीमत्तत्वरोचनाभिसम्बोधितन्त्रे ॥ विश्व
वज्रं चतुर्मुखं तद्धारयतीति विश्ववज्रधरः ॥ वज्रीति
। तत्रैव वज्रमिव वज्रं ज्ञानं अभेद्यत्वादेकं वज्रीति
॥ श्रीअद्वयसमतविजये । एकश्चासौ वज्रीचैक
वज्री । अद्वयज्ञानस्वभावत्वात् । रणंजह इति । श्री
त्रैलोक्यविजये । रणंसंग्रामं क्लेशैः सह जयात्त्यज
तीति रणंजहः ॥ ६ ॥

वज्रज्वालाकरालाक्षो वज्रज्वालाशिरोरुहः ।
वज्रावेशो महावेशः शतार्क्षो वज्रलोचनः ॥ ७ ॥

वज्रज्वालाकरालाक्ष इति । वज्रभैरवे । तत्र वज्रस्य
ज्वाला । तद्वत्करालेऽक्षिणी यस्य स वज्रज्वालाक
रालाक्षः ॥ वज्रज्वालाशिरोरुहः इति । शिरसिरो
हन्तीति शिरोरुहः ॥ वज्रज्वालावच्छिरोरुहा के
शा यस्यासौ वज्रज्वालाशिरोरुहः ॥ श्रीवज्रपाण

भिवेके ॥ तत्र चत्वारोऽयनेऽक्षोभ्यपक्षे । तत्र वज्रावेशइति । वज्रस्यावेशा वज्रावेशाः ॥ ज्ञानाधिष्ठानमित्यर्थः ॥ महावेशइति । सर्वभावस्वभावात्मकत्वात् । ज्ञानाक्षइति । ज्ञानानि अक्षीणि यस्य स ज्ञानाक्षः ॥ वज्रलोचनइति । वज्रलोचने यस्यासौ वज्रलोचनः ॥ ७ ॥

वज्रशेखरतनुर्वज्रशेखरविग्रहः ॥
वज्रकोटिनखारम्भो वज्रसारघनच्छविः ॥ ८ ॥

अथैषां श्रीवज्रमणिडालंकारपक्षे । तत्र वज्रमयानि शेखराणि तैरंकितालंकृतानि तनवो यस्य स वज्रशेखरतनुः । वज्रशेखरविग्रहइति । एकश्चासौ विग्रहश्चैकविग्रहः । वज्रशेखराभिज्ञानशेखराभिज्ञोयस्य स वज्रशेखरविग्रहः ॥ श्रीवज्रशेखरतंत्रे । ज्ञानवेनोपमत्ते । तत्र वज्रकोटिनखारंभइति । वज्रस्यकोटिवज्रकोटिः कोटिरग्रभागः सहस्रधारा तेनारंभोयस्य स वज्रकोटिनखारंभः ॥ वज्रसारघनच्छविरिति । वज्रसारवन्ति घनानि विशेषेण छादयतीत्यर्थः सोऽसौ वज्रसारघनच्छविः ॥ ८ ॥

वज्रमालाधरः श्रीमान् वज्राभरणभूषितः॥
हाहाट्टहासो निर्घोषो वज्रघोषः षडक्षरः॥ ९॥
श्रीक्रोधविजयस्य हलाचक्रे पठ्यते॥ ऽमोतो क्रोधग
णोऽयुत। वज्रमालाधरः श्रीमान् वज्राभरणभूषणा
इति। वज्रमालां धारयतीति वज्रमालाधरः श्रीमानिति
तस्येवविशेषणं। भाग्यसम्पन्नत्वात्। वज्राभरणभूष
णाइति। वज्रमेवाभरणं वज्राभरणं तेनभूषितस
दृशेनआत्मा वज्राभरणमिति उच्यते॥ तत्र श्रीबाहुतंत्रे
हाहाट्टहास इतिपठ्यते॥ अट्टहास इत्युच्चैर्हासः।
हाहेति कृत्वा हासो हाहाट्टहासः। निर्घोष इति। श्री
सुविसिद्धिकरतंत्रे। निर्गतोघोषो निर्घोषः अत्यु
च्चस्वरघोष इत्यर्थः॥ वज्रघोष इति। श्रीशतसाह
स्रिकेनत्वसंग्रहे। वज्रस्येवनघोषइवघोषो यस्या
सो वज्रघोषः॥ षडक्षर इति। श्रीषट्प्रज्ञायनस
स्वरतंत्रे। षट्अक्षरगणोयस्यासो षडक्षरः॥ ९॥
मंजुघोषोमहानादस्त्रैलोक्यैकरवोमहान्।
आकाशधातुपर्य्यन्तघोषोघोषवतांवरः॥१०॥
आदर्शज्ञानगाथा पदेन सार्द्धदशः॥ ॥

तत्र मंजुघोष इति ॥ आर्यमञ्जुश्रीतंत्रे । मंजुकोमला घोषो यस्यस मञ्जुघोषः । महानाद इति । श्रीत्रि समयालंकारे । महांश्चासौ नादश्च महानादः ॥ त्रैलो क्यैकरव इति । द्वितीयत्रैलोक्यविजयतंत्रे ॥ त्रैलोक्य भूर्भुवः स्वर्लोके एकोद्वितीयो रवो ध्वनिर्यस्य सः त्रै लोक्यैकरवः ॥ अतएव महानित्युच्यते ॥ आकाशधा तुपर्य्यन्त इति ॥ आर्यमंजुश्रीतंत्रे एव यदाभगव ताशाक्यमुनिना यमान्तकस्यानुज्ञादत्ता त्रिसाहस्रम हासाहस्रोपरि मंत्रणायायं मंजुश्रीतंत्रश्रवणार्थं तदासौभगवान् यमान्तकस्मिन्नेव समेरुगिरि द्विस्थित्वा एकमेव महान्तनादमुक्तवान् ॥ येना काशधातोर्ध्वनिः संजात इत्यतआह ॥ आकाशधा तुपर्य्यन्तो घोषाघोष इति ॥ अतएवासौभगवान् घोषवतांवर इति ॥ तत्र घोषोविद्यते येषांते घो षवन्तः । अतस्तेषांघोषवतां वरः श्रेष्ठोऽयमीदृ त्यर्थः ॥ अथेदानीं तृतीयस्यकोधचक्रस्योत्सर्गवि धानमाह ॥ सर्वतथागतज्ञानसत्वस्यहृदयाक्षरात्स एवभगवान् मंजुश्रीः हेमचीरत सत्वानुग्रहार्थं

योगचर्याक्रियातंत्रोक्तक्रोधराजाज्वालास्त्रभैरोक्त
दमनोद्यततश्चस्वकायात्। समन्ज्वालागर्भाः सभृकु
टीभ्रूभङ्गाकुंचितललाटविकटदंष्ट्रोत्कटरौद्रमुखा
वक्त्रांकुशकोशपादादिवज्रज्वालाग्निप्रदीप्तप्रहरणा
व्यग्रकराः अनेकविविधवर्णोल्लंकारविचित्रवेशधरा: तथाचग्रहणानिसत्यसर्वलोकधातुषु सर्वदु
ष्टविनयनंकृत्वा पुनरागत्य वज्रधातुमण्डलस्य
बहि: तृतीयचक्रस्थकसप्तनिनामंत्राक्षराणि स्वकल
चर्यारूपाणि भूत्वा यथापरिपाट्या सन्निवेशानिच
न्येत ॥ तानिचपंचधाविभज्य ओं हूंकारादेरेक
स्यचतुर्दशनामर्मंत्राक्षरपदानिकृत्वा स्फरणासंह
रणादिकं विधाय पूर्वोक्तमेनेकनाममंत्राक्षरप
दमात्मानमधिमुच्यार्चेनामसंगीतिंपठेत ॥ ता
नेवंणाप्रकारेणेत्यभिप्रायइति ॥ गाथा
अवधानसार्द्धदशनाममंत्राक्षराणि स्थकसप्तनि
र्देशेति ॥ ७१ ॥ आर्यनामसंगीतिटीकायांनाम
मंत्रार्थावलोकिन्यां आदर्शज्ञानस्वभावसूत्रविवृ
तिप्रथमः ॥ ॥ गाथादशः ॥ ७० ॥ ॥

तथताभूतनैरात्म्याभूतकोटिरनक्षरः ॥
शून्यतावादीवज्रभो गंभीरोदारगर्जनः॥ १॥
इदमिदानीं प्रत्यवेक्षणाज्ञानमुखेन भगवतः सर्वत
थागतज्ञानकायस्य मंजुश्रीज्ञानसत्वस्य स्तुतिमाह
॥ तत्र तथतेति । प्रकृत्यग्राह्यादि विविक्तज्ञानाव
स्थयोऽनुत्पन्नरूपत्वात् । इयंपराभूतकोटिः सर्वप्र
माणसंवादात् ॥ आत्मादिकल्पनायाश्चप्रतीतिवा
धितत्वात्॥ अतएवभगवान् मंजुश्रिया सर्वतथाग
तसत्यनयेनस्कन्धादीनामात्मादितत्वेनानुपलंभए
व परःप्रमाणत्वेनोपदिष्टः॥ भूतेतिभूतसमंतथ
तायाअविकल्पनामात्रत्वात्॥ नचैवमात्मैकनीमधा
त्वाद्यभावेकोधर्माणांस्वभावःकिंवाफलीमति॥
यतोयमेवधर्मपुंगलादिवेकेकलक्षणेसर्वधर्मा
णांप्रविसोसविकल्पाज्ञानं ध्वनुभूतःपरमार्थको
निश्चलस्वभावः॥ वलादिलक्षणानांचफलधर्मो
णांहेतुकत्वात् ॥ तस्मादेधर्माणांचहेतुधर्मेतस्त
तोनिरात्मं धर्मेधोनरिसुज्यते ॥ तस्मादेतानिच
तथागताधिष्ठानाद्दर्शनानांधर्मकारणमुखानि॥

यतस्तथताकारणमेवं सर्वधर्माणांस्वरूपमवतरति ॥
ततश्चवलप्रविभागदर्शज्ञानंभूतकोटिरुच्यते ॥तद्
धिमात्कर्षात् ॥अनस्यैतानिचत्वार्यादर्शसमता-प्र
त्यवेक्षणाकृत्यानुष्ठानज्ञानलक्षणानिवस्यासोभग
वान्मञ्जुश्रीः तथताभूतनेत्यस्यभूतकोटिरुच्य
ते ।अनक्षरइति ।अपरपर्यायेणानक्षरतीतिअ
नक्षरः ॥धर्मधातुस्वभावत्वात् । शून्यताद्वयीभवइ
ति ॥त्रिविधाशून्यता-अभावशून्यता-अतद्भावशून्य
ता-प्रकृतिशून्यताचेति ॥तद्भावशून्यता । परिकल्पि
तलक्षणंतत्कंचिदाकारणास्तीत्यभावशून्यता ॥
अतद्भावशून्यता परतंत्रलक्षणं । तथानास्तियथाप
रिकल्प्यते ॥ननुसर्वथानास्तीति तस्यांतद्भावशून्यता
परिनिष्पन्नलक्षणं शून्यतास्वभावमिति ।प्रकृतिरे
वास्यशून्यतेति ॥ अतश्चत्रिविधाशून्यतावेदि
तं शीलयस्यासो शून्यतावादीवृषभः ॥प्रधानइत्य
र्थः ॥ सर्वश्रेष्ठत्वाच्छून्यतावादीचासौवृषभश्च
शून्यतावादीवृषभः ॥ गंभीरोदारगर्जनइति ॥उदा
रं नोनानिर्माणानुगतेनसमन्तस्फुरणात्विवासम

नभङ्ग स्वभाव ङ्ग ग्रहेण। सर्वार्थ रूपा निष्पादनं गंभीरं। प्र
नः ग्राह्य ग्राह कादि विकल्पादि रहित ब्रह्म स्वभावः॥ उदा
त्तोपादेय रूपतद्भयमपि स्वचित्ते कलक्षणं। व्याद भि
भेदात्॥ भेदेन व्यवस्थाप्यते॥ यतस्तं वादाभ्यां गंभीरो
दाराभ्यां गर्जनः सर्वतीर्थिकार्थाभिभवनं यस्यासौ तथा
थाच्यते॥ ९॥

धर्मशंखो महाशब्दो धर्मगरुडो महारवः॥
अप्रतिक्षिप्तनिर्घोषो दशादिग्धर्मदुन्दुभिः॥ २॥

तत्र धर्मशंखवदति। यदा नुषितेभ्यो देवनिकायेभ्यो ज
म्बुद्वीपमवतरितुकाम स्तदा भगवान् सर्वतथागतज्ञान
सत्वो धर्मशंखमापूर्योऽवतीर्णवान्॥ ततोऽसौ भग
वान् धर्मशंखवदति॥ पुनरपि किंविशिष्टासावित्याह॥
महाशब्दवदति। त्रिसाहस्रमहासाहस्रलोकधातुश्रा
वणत्वात्। धर्मगरुडवदति। चतुर्मारपेराजयं कृत्वाक्षा
यानुत्पादज्ञानं साक्षात्कृत्य ततश्च धर्मतायाऽवबो
धतामधिगम्य यदाहभगवान् ऽधिगतामया
धर्मोधिगतोऽनुत्तरः। सर्वसत्वानाऽधिगम्य
दित्यल्पेच्छतादिगुणवशत्व॥ तदा महाब्रह्मागत्यार्थ

धितवान्। संतिभगवन्मूलास्त्रीक्षेत्रेन्द्रियाउपचितकुशल
मूलाउन्नतिनताः अप्रहृष्टतस्तादृशयन भगवन्तिति
॥तदाहभगवान्॥ धर्मचक्रमुपसंक्रम्य धर्मश्रवणार्थी
गणीशब्दंतत्रवानित्यतआह॥ धर्मगणीति पुनस्वेषे
वविशेषणमाह॥ महारणाइति. महांश्चासौरणाश्च म
हारणाः॥ ततश्चैतदुक्तंभवति। धर्मश्रोतादिस्वभाविन
सर्वभगवान्द्रष्टव्यः॥ अप्रतिष्ठितेत्यादि०॥ तत्राप्र
तिष्ठितनिर्वाणाइति॥ भवःसंसारः सर्वथा संसारविच्छे
देनिर्वाणः॥श्रावकनिर्वाणवत्। तयोरप्रतिष्ठितउभ
यत्रानवस्थानात्। नभवेप्रतिष्ठितो भवदोषैरभि
प्लुतत्वात्। ननिर्वाणो क्लेशपरनंचलेनासंसारमवस्थानात्
॥तथाचोक्तं। नभवेदोषदर्शित्वात्क्लेशालुत्वान्नेतिहेतो
॥स्थितादिष्टनिश्चयेवपरार्थोदयदीक्षिताइति॥अ
नेनाप्रतिष्ठितनिर्वाणमुक्तंन्च भवनिर्वाणयोर्भिन्न
गकल्पनाभावात्॥ श्रूयतेकरसतयोर्द्वयोरप्यभेदोप
लब्धेः॥ तथाचोक्तं॥ संसारनिर्हेतोर्ज्ञानं सम्यगुत्प
द्यतेयथा। संसारस्यनिर्वाणं तदातस्यभवत्यतीति
॥ एवंभूतोऽसौभगवान्मंजुश्रीरप्रतिष्ठितनिर्वा

रात्युच्यते॥ दशादिग्धर्मदुन्दुभिरिति। धर्माणांदुंदुभि
र्वो धर्मदुंदुभयः॥ दशदिक्षु धर्मदुंदुभिस्वरो यस्या
सौ सतथा॥ २॥

अरूपोरूपवान्नैकोनानारूपोमनोमयः॥
सर्वरूपावभासश्रीरशोकप्रतिविम्बकः॥ ३॥

अरूपेत्यादि॥ नत्वारूपइति धर्मकायस्वभावत्वा
त्। रूपवानिति संभोगिकस्वभावत्वात्। अत्रोभ
यधर्मप्रतिषेधत्वात्। नानारूपइति निर्माणका
यात्मकत्वात्। मनोमयइति। अत्रैवैतेरूपाद्
योधर्मो भगवतः सर्वतथागतधर्मकायस्यवोद्द
ष्या स्वभावत्वाद्भगवतोमंजुश्रीरिति॥ सर्व
रूपेत्यादि॥ सर्वरूपावभासश्रीरिति। जगद्धि
तयस्वभावेन सर्वरूपानामवभासः सर्वरूपा वभास
श्रीर्यस्यास तथा॥ अशोकप्रतिविम्बकइति। अशो
कानांप्रतिविम्ब मशोकप्रतिविम्ब तत्कायतीति
अशोकप्रतिविम्बकः। अतएव॥ ३॥

अग्रधर्मोमहाशास्त्रस्त्रिवातुकमहाभटः॥
सम्मिश्रुनार्यमार्गस्थोधर्मकेतुर्महोदयः॥ ४॥

अप्रधृष्येत्यादि। तत्राप्रधृष्य इति परैरनभिभवनीयत्वात्। महेशाख्य इति अक्षयसंभारोपचितत्वात्। त्रैधातुकमहेश्वर इति कामरूपारूप्यत्रिधातुकेत्रिधातुमेव त्रैधातुकं तस्मिं स्त्रैधातुकमहेश्वरः। महांश्वासावीश्वरश्च महेश्वराः॥ तत्र समुच्छितार्यमार्ग स्थ इति सम्यगुच्छ्रितमुन्नतमार्यमष्टाङ्गं मार्गं येनासौ समुच्छितार्यमार्गस्तस्मिन्नितीति समुच्छितार्यमार्गस्थः॥ धर्मकेतुरिति। धर्माणां केतुर्धर्मकेतुः॥ धर्मध्वज इत्यर्थः॥ महोदय इति उदेत्यस्मादित्युदयः। महांश्वासावुदयश्च महोदयः। महाभ्युदयप्राप्तिरित्यर्थः॥ ४॥

त्रैलोक्यैककुमारांगः स्थविरो वृद्धजनापतिः॥
द्वात्रिंशल्लक्षणाधरः कान्तस्त्रैलोक्यसुन्दरः॥५॥

त्रैलोक्येत्यादि॥ तत्त्रैलोक्यैककुमारांग इति। पूर्वकृतलक्षणो त्रैलोक्येऽस्मिन्नेकएवाधिनीयःकुमारांगमिवांगमस्यासौ त्रैलोक्यैककुमारांगः॥ स्थविर इति श्रावकादीनां तद्धर्मोपदेशकत्वात् वृद्ध इति। प्रत्येकबुद्धानामप्रत्यात्तद्धर्मदेशकत्वेन

प्रजापतिः प्रतिप्रतिजायतेति प्रजा कोधिसत्वाः तेषां पतिः प्रजापतिः स्वामी मंजुश्रीरेव॥ द्वात्रिंशद्भक्षणाधाः कायस्त्रैलोक्यसुंदर इति॥ सुप्रतिष्ठितपादता १ चक्राङ्कपादतलता २ आयतपार्ष्णिता ३ दीर्घांगुलिकता ४ उच्छंगपादता ५ जालावनद्धहस्तपादता ६ सप्तोच्छदशरीरता ७ एणेयजंघता ८ कोशोपगतवस्तिगुह्यता ९ सिंहपूर्वार्द्धकायता १० निग्रोधपरिमंडलांगता ११ समसंवृतस्कंधता १२ अवनतप्रलंबबाहुता १३ वृहत्कायता १४ कम्बुग्रीवता १५ सिंहहनुता १६ समचत्वारिंशद्दशनता १७ समविरलदशनता १८ शुभ्रजिह्वता १९ रसरसाग्रता २० ब्रह्मस्वरकलविङ्कस्वरता २१ अभिनीलनेत्रता २२ गोपक्ष्मनेत्रता २३ सूक्ष्मछविता २४ सुवर्णछविता २५ एकैकरोमता २६ ऊर्ध्वप्रदक्षिणावर्तरोमता २७ इन्द्रनीलकेशता २८ सूक्ष्मसुमृदुरोमलाटता २९ उष्णीषशिरसंगता ३० न्यग्रोधपरिमण्डलता ३१

३२॥ एतानि द्वात्रिंशन्महापुरुषलक्षणानि चक्रवर्तिनश्चक्रवर्तिकायसाधारणानि। नहि

वैज्ञतावीनप्ररोहभूतानि। महापुरुषलक्षणाद्यन्यनरशरीरमविलक्षत्वेषु संभवन्ति॥ यथोक्तधर्मदेशस्योन्नमपूर्णोत्वलक्षणानि महान्तीरिति॥ कान्त इति॥ कान्तकमनीय। सर्वसत्वैरभिलषनीयत्वात्। त्रैलोक्यसुंदर इति। त्रैलोक्यपूर्ववर्त्तिस्मिन्सुंदरो दर्शनीयः॥ असेचनकविग्रहत्वात्॥ तत्राश्चर्यविशेषो रूपास्वेचनकतयावदितव्यः॥ सहि भगवन्नंगप्रत्यंगेष्वविरमिदृश्यमानाअपूर्वदर्शनतांप्रीत्यासेचनात्॥असेचनकोरूपाणि इत्युच्यते॥ ५॥

लोकज्ञानगुणाचार्यो लोकाचार्योविशारदः॥
नाथस्त्राताजिलोकानांशरण्यानांपतिरुत्तरः॥६॥

लोकेत्यादि०॥ ज्ञानंचगुणाश्चज्ञानगुणा लोकानांज्ञानगुणास्तेषांचार्यो भगवान लोकज्ञानगुणाचार्यः॥ लोकाचार्य इति। लोकस्येति देवमनुष्यादेर्यथाभव्यनयासन्मार्गोपदेशाल्लोकाचार्य इत्युच्यते॥ विशारद इति। नानानिर्माणरूपेसंदर्शनमुखेनाशेषजगदर्थकरणात्वात् विशारद इति॥ उदारचर इत्यर्थः॥ नाथेत्यादि०॥ नवनाथ इति

अनाथानां संसारार्णवनिमग्नानां सत्वानां नाथभूतत्वात् ॥ त्रातृणि रक्षितॄणि त्राणार्थिनां त्राणं कृत्वा तानि त्रिलोकान्नरईति । त्रिलोकस्यान्तः त्रिलोकान्तः ॥ सर्वाकारमलभूम्यतापकारकत्वेनाशोषकुदृष्टिगहनविघातनत्वेन ॥ शरणमिति । शरणार्थिनां शरणत्वान्नायेति ॥ तथागतवंशस्य उपच्छेदकत्वान्निरुत्तरइति । सर्वतथागतानुत्तरज्ञानाभान ॥ ६ ॥

गगनाभोगसंभोग सर्वज्ञज्ञानसागरः ॥

अविद्याण्डकोशभेत्ता भवपञ्जरदारणः ॥ ७ ॥

गगनेत्यादि ॥ तत्र गगनाभोगसंभोगइति । गगनस्य समताज्ञानस्याभोगः सोष्ठवज्ञानसामर्थ्यं । सम्यक् भोगः संभोगः । गगनाभोगसंभोगः ॥ वैधातुकधर्मराज्याभिषेकप्रदानत्वात् ॥ सर्वज्ञज्ञानसागरइति । सर्वज्ञानानीति सर्वज्ञः । तस्य ज्ञानं सर्वज्ञज्ञानं तस्य सागरः अतिविस्तरत्वात् ॥ अविद्याण्डकोशभेत्ता भवपञ्जरदारणइति ॥ तत्र अविद्याकर्मफलसत्वरत्नेषु अज्ञानमोहः । तदेवप्रतीत्यसमुत्पादस्यादिभूतत्वात् जगे

त्पत्तिकारणात्वाच्च अरण्यकोश इत्युच्यते॥ तस्यभेदत
शील विदारणस्वभावत्वात्। अतएव भवपञ्जलप
रण इति॥ भवपञ्चोपादानस्कन्धाः सम्यक्प्रभ्रः॥
अनिर्गमनस्थानीयत्वात्। तस्यविदारणाः। भूतार्थ
भावनाप्रकर्षपर्यन्तगमनात्॥ ७॥

शमिताशेषसंक्लेशाः संसारार्णवपारगाः।
ज्ञानाभिषेकमुकुटाः सम्यक्संबुद्धभूभुजाः॥८॥

तत्र शमिताशेषसंक्लेशत्रीणित्रिधासंक्लेशाः॥क्लेश
संक्लेशाः। कर्मसंक्लेशाः। जन्मसंक्लेशश्च। तत्रक्लेश
संक्लेशाः अविद्यातृष्णोपादानि। कर्मसंक्लेशाः सं
स्काराश्च। जन्मसंक्लेशाः। शेषाश्चांगानि॥पुन
रपित्रिधासंक्लेशाः। हेतुसंक्लेशाः फलसंक्लेशश्च।
तत्रहेतुसंक्लेशाः। क्लेशकर्मस्वभावेक्लेशे। फलसंक्ले
शश्च। शेषेभ्योपिसप्तधासंक्लेशाः। सप्तधाहेतु
विपर्यासहेतुरविद्या। आक्षेपहेतुसंस्काराः॥उप
लब्धहेतुविज्ञानं। परिग्रहहेतुर्नामरूपं। अभ्यव
पत्तिहेतुः षडायतनं। उपभोगहेतुः स्पर्शः। वेदनायां। आकर्षणहे
तुः। तृष्णोपादानभवाः। उद्वेगहेतुश्च जातिजरा

मणो ॥ सर्वश्चेष संक्लेशोऽभूत् भूतपरिकल्पात्र वर्त्तते। सच्च शमिता अशेषा निशेष संक्लेशा यस्या सौसतथा। यतएवं ततस्तात्॥ संसारार्णव पारगइत्युच्यते ॥ ज्ञानाभिषेकमुकुटः सम्यक्संबुद्धभूषणइति ॥ अभिषेकार्थं मुकुटः अभिषेकमुकुटः समन्तभद्रज्ञानाभिमुकुटः यस्यासौ ज्ञानाभिषेकमुकुटः। ततश्च सम्यक्संबुद्धभूषणइति। तेरलंकृतत्वात्॥ ८ ॥

चिदुःखदुःखशमनस्त्वंतोऽनन्तस्त्रिमुक्तिगः॥
सर्वावरणानिर्मुक्तआकाशसमतांगतः॥ ९ ॥

चिदुःखदुःखशमनइति। ढंढेनानिर्देशइति। चिदुःखेति। दुःखदुःखता १ उपादानदुःखता २ लक्षणदुःखताच ३ दुःखसत्यं वेदनासत्यं। निमित्तार्थेचयत्किंचिद्वेदितव्यमिदमत्रदुःखेतिकृत्वा वेदनानिमित्तेपुनर्वेदनास्थानीया धर्मा वेदितव्या॥ तथाचोक्तं॥ दुःखसंसारिणस्कंधाइति॥ दुःखेति तंनिमित्तंप्रतिपद्यितः। समुदयसत्यं दुःखसत्यनिमित्तं वेदना सत्यनिमित्तंसमनमिति॥ तयोस्समनार्थेनानिर्देशस

त्वं अतआह॥ त्रिदुः खशमनोभगवान् मञ्जुश्रीरिति
॥ त्रयइति । त्रयाणांसत्यानां मन्तो मार्गसत्यं तत्र अ
नुएधर्मस्कन्धसहस्राणि मार्गसत्यमितिवचनात्
॥ तत्रसत्यानामज्ञातिश्चित्तचैत्तसहस्रेणोपक्ष
ट्येन चतुरशीतिधर्मस्कन्धोपदेशात्। अतआह
। अतत्त इति । त्रिमुक्ति इति तिस्रो मुक्तयः। श्रा
वकादिभेदेन तान्मुक्तिं गच्छन्तीति त्रिमुक्तिगोभग
वान्मञ्जुश्रीः॥ सर्वावरणनिर्मुक्तः आकाशसमतां
गत इति । तत्रावरणानिर्मुक्त इति ॥ सर्वाणिचक्ले
शावरणानिचेति सर्वावरणानि । कर्मक्लेशविपाक
जेर्यति वरणाभेदात्॥ पञ्चसर्वावरणानि उच्यन्
ते । तेर्मुक्तो भगवान् ॥ सर्वतथागतज्ञानकायः॥
अतएवाह॥ आकाशसमतागत इति सर्वावर
णानिर्मुक्तत्वात्॥ ९ ॥

सर्वक्लेशमलातीत स्त्रक्षान्त्यगतिंगतः॥
सर्वसत्वमहानागो गुणाशेखरशेखरः॥१०॥

तत्रसर्वक्लेशमलातीत इति॥ सर्वक्लेशा उक्ताल
क्षणा एवमलास्तानतीतोऽतिक्रान्तः। सर्वक्ले

शोपलक्षेशमलाअपगमत्वात् । अध्वेति । अतीतानाग
तवर्त्तमानस्वभावरूपत्वात् । अध्वाचिकालरूपतया
अनध्वगतिंगत इति । नाध्वा अनध्वा । तत्रचातीत
स्यातीतत्वात् । अनागतस्यासंप्राप्तत्वात् । वर्तमान
स्यचोभयाभावात् ॥ स्थितेर्नास्ति अतश्च त्रैकाल्पा
गसंस्थितस्यानध्वगतिरनध्वगतिः । तांश्चध्यानध्व
गतिंगतः ॥ तत्र सर्वसत्व महानाग इति । विशिष्टा
धिगमधर्मत्वाभात् । सर्वसत्वानां महानागः सर्वस
त्वमहानागः । प्रधान इत्यर्थः । अतएवं गुणशेव
रशेखर इति । सकललौकिकलोकोत्तरगुणा
भिगामिकादिगुणानां शेखरस्थूडामणिः
गुणशेखर इत्युच्यते । यथा उष्णीषां मूर्द्धि
व्यवस्थितानां लोकशेखरः इति व्यपदेशः ॥ त
थासर्वगुणमूर्द्धव्यवस्थानात् । गुणशेखरशे
खर इति ॥ १० ॥

सर्वोपधिविनिर्मुक्तो योगवर्त्मसुसंस्थितः ।
महाचिंतामणिधारः सर्वरत्नोत्तमादिभः ॥११॥
तत्रसर्वोपधिविनिर्मुक्त इति । उपनिधयश्च

त्वारः। धर्मार्थकामनोतिलक्षणाः तेश्चनभिरीप्
धर्मे दिमुक्तत्वात ॥ सर्वोपधिविनिर्मुक्त इति । सर्व
धर्मैरकंपत्वात । निर्विकारत्वाच्च । व्योमवन्निरुपलि
त इति ॥ आकाशमार्गप्रतापारमितायाश्च प्रतिषि
द्धत्वात । तथाचोक्तं आर्योष्टसाहस्त्रां । आकाशभा
वेनाप्यभूतेयदुत प्रज्ञापारमिताभावनाइति ॥ त
त्रमहाचिंतामणिधर इति । महांश्वासौचिंतामं
णिधरश्चमहाचिंतामणिधरः । यथाभिलषितार्थ
सिद्धिसंपादकत्वात । तांधारयतीति महाचिं
तामणिधरः ॥ अतएवसर्वरत्नोत्तमइति ।
सर्वरत्नानांउत्तमत्वात । विभूतिनिगमार्थः ॥ ९१ ॥

महाकल्पतरुस्फीतो महाभद्घटोत्तमः ।
सर्वसत्वार्थकृत्कोहिनैवोसत्वदत्तजः ॥ ९२ ॥

तत्रमहाकल्पतरुरिति । महांश्वासौकल्पतरुश्चम
हाकल्पतरुः । ओभिमतार्थसिद्धिप्रदायकत्वोद्गतस्फी
तवर्मीतः सर्वसमृद्धत्वात । महाभद्घटोत्तम इति ।
भद्रघटश्चासावुत्तमश्चेतिभद्घटोत्तमः । महांश्चा
सौभद्घटोत्तमश्चमहाभद्घटोत्तमः ॥ तत्रसर्वस

त्वार्थं करोतीति सर्वसत्वार्थकृन्मंजुश्रीः। एतदेवोक्तं चंडगोमिपादैः जंभलजोजो भद्रघटकस्यादपः चिन्तामणायोप्यचेतनस्य वज्रस्येपि सत्वात् किंनु भगवान् न स्वीकृतः। कृपयेति। सत्वविनेयवशात्। स्थानावरणाग्रहेणापि प्रतिभासनात्। कर्मेति। यथाभिप्रायतया धर्मतापरिशोधकरणात्। हितैषीति। हितमार्यतिपर्यं। तद्धितं शीलमस्येति हितैषी। सत्ववत्सल इति। जगदेकबन्धुप्रेमकत्वात्॥ ९२॥

शुभाशुभज्ञः कालज्ञः समयज्ञः समयौचित्यभुः।
सत्वेन्द्रियबोधनो विमुक्तिक्षयकोविदः॥९३॥

तत्र शुभाशुभज्ञ इति। शुभं चाशुभं च शुभाशुभं कुशलाकुशलमित्यर्थः। तच्चायतीति शुभाशुभज्ञः भगवान्मंजुश्री कुचित्क्षुभमपि हेतुं सत्वार्थवशात्। तथाचोक्तं। सदाशयस्याशुभं नास्ति। कालज्ञः इति। कालं जानातीति कालज्ञः अयमत्र कालोयं धर्मदेशनाकालोयं सत्वार्थकृत्याकालोयमुपेक्षाकालोयं पारिनिर्वाणकाल

ज इत्येवंभाग्यः। समयज्ञ इति। हस्तुडामंत्रविज्ञानं स्वरूपं जानातिवेत्तीति समयज्ञः॥ अतएव सर्वमयो विभुरिति गतार्थः॥ तत्र सर्वेन्द्रियज्ञ इति सत्त्वानामिंद्रियाणि सर्वेन्द्रियाणि सर्वेन्द्रियाधीनि तानिजानातीति सर्वेन्द्रियज्ञः। वेलज्ञ इति। वेलांजानातीति वेलज्ञः॥ याचकजनानामभिप्रायवेदीत्यर्थः। कालेदीयमानं नानादिकमक्षयत्वात्। विमुक्तिस्त्रयकोविदः इति॥ श्रावकादिविमुक्तित्रयेविभागकल्पनालक्षणेनिपुणत्वात्। कोविद इत्युच्यते॥ १३॥

गुणीगणाग्रेसरः ब्रह्मलोमङ्गलोदयः।
सर्वमंगलामांगल्यः कीर्तिर्लक्ष्मीर्यशःशुभः॥

उत्पत्त्यस्मादित्युदयः। मंगलानांलौकिकादीनामुदयोऽस्मादिति। मंगलोदयोभगवान्॥ तत्र सर्वमंगलमांगल्य इति। मंगलेसाधुमांगल्यः सर्वमङ्गलानां सर्वजीवत्राणां मध्ये मांगल्यः कीर्तिरिति॥ विश्वत्रयशब्दज्ञानकावदाने॥ चतुर्दशसत्यर्थकरणादशार्थविनश्वरीकीर्तिरिति। तस्यचित्तात्तस्यभगवतः। लक्ष्मीरिति। एकाग्रचित्तन

यानावनाभियुक्तानां फलप्राप्तीनां सर्वसम्पत्त्याधार
भूतत्वाच्छ्रीभगवान्मञ्जुश्रीः॥ यशइति दानादी
नांप्रकर्षपर्य्यन्तगमनात्। सर्वदेवमनुष्याभावाच्छ्रि
मंलयशः पुंजत्वात्॥ १८॥

महोत्सवोमहाश्वासोमहानन्दोमहारतिः।
सत्कारःसत्कृतिर्भृतिःप्रमोदःश्रीर्यशस्कृतिः॥१५॥

महोत्सवइति. महाश्वासो उत्सवश्च महोत्सवः॥
योयोवरइत्युच्यते॥ अनुत्तमत्वात्सर्वार्थसाधकत्वा
त्तथाविधिः॥ नित्यप्रवृत्तियोगश्च सयोगोवरइ
च्यते॥ मोक्षमार्गतंनित्यमत्वेयोयोवरविशेषइति
॥महोत्सवोपिभगवान मंजुश्रीरेवयोयोवरःसत्त
नः॥ संप्रवृत्तदानत्वात्। नित्यंचमोक्षमार्गगतत्वा
त्। कुशलपक्षैकनिष्ठतया महोत्सवत्वात्म
हाश्वासइति॥ आश्वसनमाश्वासः। महाश्वासा
वाश्वासश्च महाश्वासः॥ श्रीवज्रसत्त्वादिषु मेधि
मुक्तिकानां सत्त्वानां स्वमाश्वासनात्सनथामत्व
नन्दइति। महाश्वासावानन्दश्च महानन्दः॥
सर्वलोकानांयसेरुपनयात् अनुत्तरंधर्मदेशक

त्वानानदनत्कत्वात्सदातिरिति । सत्यतीतिर्नाश्रवलक्षणायस्यासौ सदातिर्भगवान् ॥ तत्र सत्कारः इति । त्रैधातुकेषु सत्मानपूजार्हत्वात् । सत्कीर्तिरिति । जरणात्कृतिः सत्कृतिः संदोहिश्रावकादयस्तेषांयथार्हप्रतिपत्तिः तथाचोक्तं । सत्कृत्याध्यापयन्तिस्म - बद्धयेथाविधिदृष्टानिच मंत्रार्थसत्कृतिसाभिर्धर्मचक्रेइति ॥ भगवान्मंजुश्रीश्चसत्कृत्यपरमार्थवेदस्यद्वादशांगस्यप्रवचनस्यावापनात् । सर्वमंत्राणांचयथावद्विचरणात् । सत्कृतिरुच्यते । भृतिरिति । सर्वविभृत्याधारभूतत्वात् । प्रमोदइति । स्वप्रकर्षस्वभावत्वात् । श्रीर्यशस्कीर्तिरिति । श्रियोदेवतासासायशांसिसुखसोमनस्यानिनंदनसांपतिःस्वामीभगवान् ॥ १५ ॥

वरणोवरदःअग्रः शरण्यःशरणोत्तमः ।
मंगल्यारिप्रकर्षोनिःशल्यभयत्राणः ॥ १६ ॥

तत्रवरणइति । सर्वाभिगमनीयावाप्तमत्वात् । वरदइति । वरंददातीतिवरदः । यथाभिलषितपरिपूरणात् । अग्रइति । वाप्तश्रावकादीनामग्रत्वात् । श

शरणं दीनानां दुःखितानां अशरणानां शरणमस्त्वा
न। अतएव शरणान्नम इत्युक्तं तत्र मनुष्येभ्यो रि
क्षितेभ्यः। दस्युभ्यश्चौरेभ्यः॥ व्याघ्रनरकेभ्यो दुर्भिक्षा
दिरुपेभ्यो रक्षः सदा मानुषिकेभ्यो दैवतेभ्यो मनुष्य
भ्यः। व्याघ्रविनाशनया इत्युपद्रवनाशकत्वात्। अ
तएव जवद इत्युच्यते॥ निःशेषभयनाशन इति।
निरवशेषभयान्यशेषाणि नवानि हीरकादि शिवि
फणीत्यादीनि। तेषां निःशेषाणां भयानां नाशकत्वा
त्। निःशेषभयनाशनो भगवान्मुनि आदिनरे
श्वरणमात्रेणाशेषभयनाशनादिति॥१६॥

शिखिशिखण्डजटिलो जटिलो मौलौकिरीटघृतः।
पञ्चाननः पञ्चशिखः पञ्चशीर्षकशेखरः॥७॥

इदानीं सर्वसत्त्वानांजगद्विनयरूपत्वं भावनद्वारेणा
नुपश्यादिभासत इति॥ तत्र शिखीति शिखा
स्थानेतीतिशिखी। क्वचिद्बालरूपत्वप्रतिभावनइति॥
शिखण्डीति। कलिकायरूपेण जटिलइति। निर्यो
गेन यस्यासौ जटिलः। नेयर्थरूपेण नयद्वारेण
शिखारूपेण। मौलीति मुकुटेश्वररूपेणाकिरी

स्वानानन्दजनकत्वात्सदारतिरिति। सदा रतिर्यस्मिन्
नाभवत्सदारतिर्यस्यासौ सदारतिर्भगवान्॥ नन्दसदा
रइति। नन्दधातुर्कुसमृद्धार्थत्वात्। सत्कृतिरिति
। सत्करणकृतिः सत्कारकृतिः सत्कृतिः संतोऽस्मिन्भावका
दयस्तेषांयथार्थप्रतिपत्तिः तथाचोक्तं। सत्कृत्याख्या
पयतिसा - वदंयथाविधिस्तेषांगुणानांच मंत्रार्थस
त्कृतिस्तामिधीयतइति॥ भगवान्मंजुश्रीश्चसत्कृ
त्य परमार्थवेदस्वाद्दशांगस्यप्रवचनस्याप्तत्वा
त्। सर्वमंत्राणांचयथावद्विचरणात्। सत्कृतिरुच्य
ते। भूतिरिति। सर्वविभूत्याधारभूतत्वात्। प्रमोदइति।
सत्त्वप्रकर्षस्वभावत्वात्। श्रीर्यशस्वीतिरिति। श्रियोदेव
तालक्षणांयशांसिसुखंसोमनस्यानिनेषांप्राप्तिःस्वामीभ
गवान्॥ १५॥

वरेण्योवरदःश्रेष्ठः शरण्यःशरणोत्तमः।
सर्वभयारिप्रवरो निःशेषभयनाशनः॥ १६॥

सर्ववरणमइति। सर्वाभिगमनीयानामग्रत्वात्। वरदइ
ति। वरंददातीतिवरदः। यथाभिलषितपरिपूरणा
त्। श्रेष्ठइति। बोधिसत्त्वादीनामुत्तमत्वात्। श

स्यइति। दीनानां दुःखितानां अशरणानां शरणंगत्वा
न। अतस्त्वं शरणोत्तम इति॥ तत्र मरुभयारिरि
ति। देवान्यक्षो मरुभयानि॥ व्याधिनरकदुर्भिक्षा
ग्निरुद्धकरक्षः सर्पभोमूषिकश्वेतव्याधिनि। मरुभ
यारिः। व्याधिनिर्घातनया ईत्युपद्रवनाशकत्वात्। अ
तस्त्वंशरद इत्युच्यते॥ निःशेषभयनाशन इति।
निरवशेषभयान्यक्षोमरुभयानि। हरिकरिशिवि
फणीत्यादीनि। तेषांनिःशेषाणां भयानां नाशकत्वा
त्। निःशेषभयनाशनो भगवान्मरुभयारिः॥ तदनु
स्मरणमपि निःशेषभयनाशनादिति॥१६॥

शिविशिरवरुद्रजटिलो जरीमोलीकरीटमान्।
पञ्चाननःपंचशिखः पञ्चशीरकशेखरः॥७॥

इदानीं सर्वसत्त्वानांजगद्विनयरूपत्वभावेन तद्भक्तौ
तद्रूपेणाविर्भावत इति॥ तत्र शिवोनि शिवाय
स्यालोनिशिवो। क्वचिद्बालरूपेणाप्यतिभावत इति॥
शिवलोनिव कानिकेयरूपेणा जटिलइति। जटाविद्य
ते यस्यासौ जटिलः। जरीधररूपेणा नटोलक्ष
शिखारूपेणा। मोलीनि मुकुटधररूपेणा। किरी

रिमानिति। किरीटिर्मुकुटः। सविद्यतेयस्यसः किरीटि
मान् आदित्यादिरूपेण। यद्यप्यनियतानांसत्वानांनत्त्व
रूपेणैवतेषांचित्तसंतानेषु प्रतिभासोऽस्यात्। सतथोक्तः।
पञ्चाननः पञ्चशिवः पञ्चवीरकेशवरहित। अयमत्र
सर्व्वादिऊर्द्धस्थरूपेशानादियोगेऽवस्थः॥ न
त्रैवल्यात्तत्वाच्च पुनरिहोच्यते॥ ७॥

मत्तव्रतधरो मौञ्जी ब्रह्मचारी व्रतोत्तमः॥
महाव्रतोपवीतिष्टः स्नातको गोतमोऽग्रणी॥८॥

नत्वमत्तव्रतधरेति। कचित्यज्ञोपवीतालंकाररूपेणापि
प्रतिभासनात्। मौञ्जीति। मुञ्जमेखलाव्रतधारणरू
पेण। ब्रह्मचारीति। अनन्तकल्पब्रह्मचर्य्यचरणात्
। विकारहेतावपि सत्यचेतोरपि रूपेऽत्यसावेव भ
गवान्मुञ्जीब्रह्मचारीरूपेण। क्वचित्प्रभासने। व्रतो
त्तमइति। असंपर्यायप्रतिज्ञ एष्ठा दशवर्षाणि ब्रह्मच
र्य्यचरित्वा गुरुश्रमत्वेनभिक्षुत्वेनप्रस्थभावेन नार्यो
जमसकलं नीतवान्॥ न मलमुखिन्नब्रह्मचर्य्य मतु
व्रतोत्तमंच॥ व्रतानां सर्वेषामुत्तमत्वात्। मौञ्जीरेव
मुच्यते। अपरिन्नकल्पब्रह्मचर्य्याचरणात्॥ नत्वमह

नपइति । महच्चतपोयस्य सो महातपः । तंसोम मात्मस्वरूपं निरुद्धरत्यर्थोयामवस्थानात् । तत्प्रदर्शकं तंतु तद्विनयाना मार्जनार्थं । तत्रासौभगवान्म हातप इत्युच्यते । तपोनिष्ठ इति । सर्वस्यलोकस्य यंयइंद्रियसंयमलक्षणास्थिरज्ञानमानंयस्यसत पोनिष्ठः । सचस्थविरः । स्नातकइति । अधीतवेदस माप्त्यतः स्नातकः सर्वव्रतानां सर्वविद्यानां पर्यन्तग मनादयं मस्थविरएव । स्नातकइत्युच्यते । गोतम इति । गोत्रनामतेनासौभगवान्व्यवदिश्यते । अ तस्वायुष्मीरिति । स्वगोत्रेषुज्येष्ठत्वं सर्वज्ञानला भात् ॥ १८ ॥

ब्रह्मविद्ब्राह्मणोब्रह्मा ब्रह्मनिर्वाणमाप्नुवान् ।
अक्लिष्टोक्षीणमोक्षाक्षो द्विमुक्तिः स्नातताशिवशाश्वी ॥

तत्रब्रह्मविदिति । ब्रह्मशब्देनवेदाउच्यंते तांजाना तीतिब्रह्मवित् । अनूचानउच्यते । ब्रह्मादयः किलनुचारो । एवंहि समन्यते । ब्रह्मासहेश्वरश्च प्रथमतरं वेदमाकाशस्थमनुगम्योंकारंब्रह्मे प्रजापतये । प्रजापतिरिंद्राय । इंद्रोवशिष्ठाय ।

वशिष्ठ पराशरादय। पराशर कृष्ण द्वैपायनायनोजैमि
नये इत्यादि। सर्ववेदाक्षरोभगवान् मंजुश्रीरेवानू
चानाएक:॥ यतोभगवान् यातत्रय ग्रहीतं॥ निःशेष
प्रवचनमनुगम्य विनेयेभ्यउक्तवान्। तस्मादसौम
ञ्जुश्रीरेव ब्रह्मविद्रूपेणापि — नोप्रतिभास त
इति॥ ब्राह्मणा इति। तपःश्रुतंच योनिश्च एतद्ब्राह्म
णाकारणा इति॥ यतोभगवानेवापर्य्याप्तकालजनितेन
तपसोपर्य्याप्तेन श्रुतेन युक्तत्वात्॥ अनाश्रवमार्गोत्पत्ति
यानश्रवणाच्चयेणाएक इति॥ परोब्राह्मणोभगवान्
॥ अथवामंत्रब्राह्मणादिभागेनत्रिधावेदः। तत्रयो
सौब्राह्मणात्मकोवेदः। सभगवान्मञ्जुश्री। तत्साध्यस्य
कार्यस्यु भगवतेव साध्यत्वात्। तद्रूपेणापि क्वचित्प्र
तिभासते। ब्रह्मा इति। रूपधातौ प्रथमध्यानसमापन्ना
ब्रह्मकायिकाः। तद्रूपेणापिप्रतीतभासमात्रात्॥ ब्रह्मनि
र्वाणमिति। ब्रह्मणोनिर्वाणं ब्रह्मनिर्वाणं तच्चान
न्दं। तथाचोक्तं॥ आनन्द ब्राह्मणोरूपं नीतनेतिप्र
उच्यते॥ तद्रूपेणापि भगवानेव। आत्रेवानिति। अ
विसंवादिकआप्तः। तथाचोक्तं। मित्रमित्रादिरूपः

स्याऽऽकारणाः क्वचित् ॥ सर्वज्ञे । द्वि मीमार्थेमुक्तिः
श्वेत्यधक्रतिमिति ॥ मुक्तौ श्रवणादिसमाप्तौ ज्ञा
नानुग्रहकार्याभ्यां योयान् परमज्ञानः संविद्यते
यस्यसऽज्ञवान् ॥ तत्रमुक्तिरिति । भूत्यतादर्शनं
तथाचोक्तं मुक्तिस्तु भूत्यता दृष्टिस्तदर्थोशेषभावनेति
तत्रश्चभगवानेवमुक्तिः । भूत्यताविनिर्भागवर्तित्वात्
।मोक्षइति । विरागप्रतिपन्नस्ययोगिनस्तस्यार्थअ
प्रतिसंवेदिनाचोत्पद्यते ज्ञानमोक्षं । प्रमुदितप्रीतिर्जा
यते ॥प्रीतिमनसः कायः प्रश्रभ्यते । प्रश्रब्धश्चकायः
सुखंवेदयति । सुखिनस्यचित्तं समाधीयते । समा
हितचित्तो यथाभूतंप्रजानाति ॥ यथाभूतंपश्यति । य
थाभूतंप्रजानन् । यथाभूतंपश्यन्निर्विद्यते । निर्वि
द्यविरज्यते । विरक्तोविमुच्यते इत्येवं यथाभूतंपश्य
तोविमुक्तिचित्तता व्यवस्थापिता भगवतातत्त्वभूत
दर्शित्वात् ॥ तथाचोक्तं । संसंलीनेनकार्येन वेदनामे
धिवासयेत् । प्रद्योतस्येवनिर्वाणं विमोक्षस्तस्येवत
दिति ॥ कस्मात्तार्थेणोक्तं । रागादिमलिनं
चित्तं संसारस्यहिवृद्धता । संक्षेपात्कथितोह्येषः

प्रहीनाचरणेर्जिने रिति॥ तदेवंविधः। श्रावकादीनां मोक्षमार्गे भगवतव्यवस्थापितः। सचभगवान् मंजुश्रीरेवंवेदितव्यः॥ तस्यसर्वगतत्वात् विमोक्षांग इति। विमोक्षस्यांगानि विमोक्षांगानि विमोक्षोवो धिः तस्यांगानि सप्तबोध्यंगानि। अष्टौमार्गांगानि च। यदुत॥ स्मृतिसम्बोध्यंग १ धर्मप्रविचयसंबोध्यंग २ प्रीतिसम्बोध्यंग ३ प्रस्रब्धिसम्बोध्यंग ४ समाधिसम्बोध्यंग ५ वीर्यसम्बोध्यंग ६ उपेक्षासम्बोध्यंग७ इति ७ एतानि सप्तबोध्यंगानि अक्षयवभूतानीति। बोध्यंगानि। एतेभ्यःक्लेशावरणप्रतिपक्षभूतेभ्यो ज्ञेयावरणप्रहाणाय भावनायाप्रभावितान्यष्टौमार्गांगानि। यदुत। सम्यग्दृष्टि १ सम्यक्संकल्पः २ सम्यग्वाक ३ सम्यक्कर्मान्त ४ सम्यगाजीवः ५ सम्यग्व्यायामः ६ सम्यक्स्मृतिः ७ सम्यक्समाधिश्च ८ सएवनंदर्शनमार्गो भावनामार्गश्च। विमोक्षस्य बोधेरंगानीतिकृत्वा सोभगवान् मंजुश्रीर्विमोक्षांग इत्युच्यते॥ मया तत्त्वभावत्वात्। विमुक्तिरिति। एकादिभ्यो बन्धनादि

भ्युक्तथाच त्रीणि बन्धनानि ॥ रागबंधनं द्वेषबंध
नं मोहबन्धनंचेति ॥ एतै र्बंधनैर्बद्धात्कारण
निरूपाद्बन्धनानि ॥ त्रैधिक्यत्वात् । विमुक्तिरि
त्युच्यते ॥ तथाच वक्ष्यति संसार्यविमुक्तिः सदेव
मनागमिति ॥ शान्तेतिः सर्वचित्तोपज्ञवाचां या
ग्राह्यग्राहकादिविकल्पानां शान्तत्वात् शान्तेत्यु
च्यते ॥ शिवइति निरोधादिभिरष्टाभिर्विवादास्प
देर्विनिर्मुक्तायः प्रतीत्यसमुत्पादः ॥ सर्वप्रपंचो
पशमलक्षणात्शिवः ॥ सभगवान्सर्वतथागत
ज्ञानसत्वः ॥ शून्यताज्ञानस्वभावत्वात् शिवइत्यु
च्यते ॥ तथाचोक्तमाचार्यपादैः । अनिरोधमनुत्पा
दमुच्छेदमशाश्वतं । अनेकार्थमनानार्थमना
गमननिर्गमं ॥ यः प्रतीत्यसमुत्पादं प्रपञ्चोपशमं
शिवमित्यादि ॥ १९ ॥

निर्वाणोनिर्हेतिः शान्तिः श्रेष्ठोनिर्याणमनगः ।
सुखदुःखान्तकृन्निष्ठा वैराग्यमुपधिक्षयः ॥ २० ॥
नवनिर्वाणमित्युद्देशः शेषाणि पदानि कलभेदेन त
स्य व्याख्यानानि ॥ निर्वाणस्य स्वरूपमाह । उक्तंच

त्वात्वां ॥ नचाभावेपिनिर्वाणं अनस्वाभावना
भावाभावपरामर्षक्षयोनिर्वाणमुच्यते इति ॥ निर्दृ
तिरिति । निर्वाणनिर्वृतिः । साचवाक्यानां तेषां तन्मा
त्रावसन्नत्वात् । शान्तिरिति शमनं शान्तिः । साच
भावकानां । श्रेयोनिर्याणमिति निश्चयेन यानं नि
र्याणं । श्रेयसांनिर्याणं श्रेयोनिर्याणं । प्रत्येकबुद्धानां
अस्तंग इति अस्तं विनाशंगच्छति यातीति । अस्त
गो अक्षोभ्यः । हेयचरितानांसत्वानां स्वविमोक्षस्य
क्षेमसंशोधनात् । जखडः खान्नकरणात् । रत्नसम्भ
वः । मात्सर्यचरितानांसत्वानां दानविभुक्षिप्रदा
नलाभेन तेषां जखडः खान्नकरणात् । निष्के
तिरत्नकेतुः ॥ रागचरितानांसत्वानां रागविभुक्षि
धर्मतात्रकाशनशरेण प्रसवेक्षणाज्ञानस्थितिग
मनात् । वैराग्यमित्रमोघसिद्धः । कौशीद्यचरि
तानांसत्वानां विमोक्षरूपेण तेषां वैराग्यमुत्पाद्य
कुशलपक्षेचित्तंविमोच्य निर्वाणपदप्रकाश
नादुपधिक्षय इति । वैरोचनः ॥ उपधिवासिना
मस्कन्धयोविनाशनादुपधिक्षयः ॥ मोहचरिता

नांसत्त्वानां यथाभूतधर्मप्रकाशनमुखेन त्रिविधु
द्धधर्मज्ञानाद्योतनात्तत्त्रिविधो हि मोक्षस्त्रयो
पधिशेषनिरुपधिशेषश्च ॥ तत्त्रयाणां श्रावकादी
नां सोपधिशेषः । सम्यक्संबुद्धानां निरुपधिशे
षः । अतस्त्रयोक्तां सवासनाश्चतेषां नसन्त्येवा
स्मतायिन इति ॥ तत्रश्रीमत्यनिर्वाणस्वभावेना
पि सत्त्वभगवान्प्रभुश्रीरंगंतव्य इत्यनआह ॥
निर्वाणमित्यादि ॥ २० ॥

अजयोऽजपोऽव्यक्तोनिराभासोनिरंजनः ।
निष्कलः सर्वगोव्यापि सूक्ष्मो बीजमनाश्रवः ॥ २१ ॥

तत्राजयेति । परनाडीयत इति अजयः । अज
प इति उपमारहितत्वात् । अव्यक्त इति व्याप्ति
रूपाभावात् निराभास इति आभासरहितत्वात्
निरंजन इति । निर्मल इति ॥ यतः सत्त्वभग
वान् परमार्थस्वभावत्वात् । पञ्चभिरेभिर्विशेष
णैर्विशेष्यते ॥ तत्रनिष्कल इति । कल्पित
हितत्वात् । सर्वग इति सर्वगतत्वात् । व्यापीति
स्थिरचरपदार्थस्वभावत्वात् । सूक्ष्म इति । अ

लोभक्रोधिप्रणीतानांभक्तः। बीजमिति। धर्माध
र्मनिलयवासना बीजलेपेन मलस्य विज्ञानं अना
श्रवइति। मार्गस्यस्वभावत्वात्। चतुर्विधासंक्ष्ट
स्वभावत्वाच्च। नचतुर्विधं आकाशं। प्रतिसंख्या
निरोधः। अप्रतिसंख्यानिरोधः। तथताचसएव
भगवान्। तत्त्वभावत्वात्॥ २१॥

अजोविजोविमलो वान्तदोषोनिरामयः॥
सुप्रबुद्धोविशुद्धात्मा सर्वज्ञःसर्वविप्रः॥२२॥

नजात इति। एगादिरजो गमत्वात्। विर
इति। तथताविशुद्धः स्थित्यन्यथात्वाभावात्। वि
मलइति। धर्मिणांभ्रान्तता। मलानां मार्गजत्वा
त्। सएवभगवान् विमलइत्युच्यते। वान्तदोष
इति। वान्तानि क्षीणानि दोषा रागादिर्येन सवान्तदो
षः। अतएव निरामय इति। निर्गतआमयो
व्याधिर्यस्यस निरामय इति। एवंगुणविशिष्ट
स्यच सएवभगवान्। सुप्रबुद्ध इति। सुष्ठुप्र
बुद्धेनबुद्धः सुप्रबुद्धः। यथावस्थित पदार्थाऽवि
परीतावबोधात्॥ श्रावकादिभ्योविशेषणार्थो

विशुद्धः। तस्यात्माशून्यतास्वभावः॥ सएवयस्यासौ विशुद्धात्मा॥ सर्वज्ञइति. सर्वे निरवशेषं ज्ञेयंजानातीति सर्वज्ञः॥ सर्वविदिति. सर्वसत्वानां चित्त चरितमाशयानुशयंच वेत्तीति सर्वविद्॥ अत एवपरमुत्कर्षगतोसौ भगवान्॥ २२॥

विज्ञानधर्मतातीतोज्ञानमद्वयरूपधृक्।
निर्विकल्पोनिराभोगस्तिष्ठत्वंतर्हकार्यकृत्॥ २३॥

तत्रविज्ञानधर्मतातीतइति। विज्ञानमिति। चक्षुरादिव्यतिरिक्तमालयविज्ञानमिति। तदेवचसर्ववीजकं। नचक्षुविज्ञानमिति. अनएतत्॥ आगमायुक्तिसश्चातत्रयुक्तिरमकमुखेन सविस्तरायत्नप्रतिपादितीतिनेहप्रतन्यते॥ आगमस्तुविवादास्पदरहितत्वात्। अल्पवक्तव्यत्वाच्च। वक्तव्यस्तत्आह॥ तथाचोक्तमभिधर्मसूत्रे इति। अनादिकालिकोधातुस्सर्वधर्मसमाश्रयः। तस्मिन्सतिगतासर्वा निर्वाणाधिगमोपिचेति॥ तस्यधर्मतातावि ज्ञानधर्मतानयातीतोतिक्रान्तस्तस्माप्यनुपल

क्षः ॥ ज्ञानमिति । सर्वज्ञत्वाधिपत्यप्रभावित्वात् । सर्व
ज्ञेयधर्मतज्ज्ञानं अतएवअद्वयरूपत्वमिति ।
औदार्यगाम्भीर्यात्मकत्वात् ॥ तत्रनिर्विकल्प इति
परमार्थविकल्पेपि अनवकल्पत्वात् ॥ तथाचोक्तं
। परमार्थविकल्पेपि नावलीयेतपण्डितः ॥ कोहि
सदाविकल्पस्यभेदाभ्यांभेदेपिच ॥ अतश्च
सदाभगवान् निर्विकल्पः ॥ निराभोग इति । निर्
भिसंस्कार इत्यर्थः । विगताआभोग निराभोगं । ततश्चा
यमर्थोभवति ॥ पूर्वाभिसंस्काराभिसंस्कारो वाहिनिप्रय
त्नाचारैर्यत्प्रयत्नाहितं चिन्तामणिवदविकल्पस्यापि
मम्यथाभवं सत्वार्थोभविष्यतीति । तत्पूर्वप्रणिधा
नं । तेनाहितमाक्षिप्तं । सततंनिप्रयत्नमनाभोगं प्रय
त्नरहितं परकार्यायसर्वतथागतज्ञानकायस्यासौ
निराभोगइत्युच्यते ॥ आभ्यांपदाभ्यांप्रज्ञोपायात्म
कः । भगवानित्युक्तंभवति ॥ तथाचोक्तं ॥ पूर्वप्रणि
धानाहितज्ञततानाभोग परकार्य इति ॥ अथेसंभु
ञ्जकार्यमृद्धिरिति । विशुअर्थसंभोगाख्यश्चस
म्भोगेनसर्वकार्याणिअर्थसम्भोगकार्याणि ॥

नानिकरोतीति स्वयंसम्बुद्धकार्यकृते सच्चभगवा
न्॥ २३॥

अनादिनिधनोऽग्र्यो आदिरजो निरत्ययः।
ज्ञानेकचक्षुरमलो ज्ञानमूर्तिरयोगतः॥ २४॥

तत्रभगवानादिनिधनश्चेति। आदिश्चनिधनश्चआदिनि
धनः। नविद्यतेआदिर्निधनोयस्यसावनादिनिधनः
॥उत्पादनिरोधाभावात्तस्यभगवतः अज इतिभ
वतिव्याख्यातं। इतरत्तुवक्ष्यतेव्याख्यास्यते। कथंनस्याद्बुद्धि
ज्ञानार्थत्वात्। तथोक्तं। भावकर्मणोरयोगेऽजः
।ऊर्ध्वंदेवलोकभावे। अधीतंऊर्ध्वशास्त्रंदेवलोकेनेति
।कर्मणिवाऊशब्दइष्यते॥ इतरेऊर्ध्वभगवान् सर्व
धर्मेभ्योति। कर्मोर्ध्वः सकलपदार्थावबोधिर्नऽधि
रस्मिति। आकारोमत्वर्थीयोति शयार्थः। अथवाऊ
र्ध्वंगमनार्थत्वात्। अथगमनंचगतिः। गत्यर्थेभ्य
श्चर्लोभावकर्तृप्रभवतीति। कर्तृर्यङ्लुसर्वधर्मान्
स्वलक्षणसामान्यलक्षणतोऽवबोधतीतिऊर्ध्वः। सभ
गवान्भादिऊर्ध्वइति। आदावेवऊर्ध्वआदिऊर्ध्वः स
चपश्चज्ञानात्प्रबुद्धः। कथमितिचेत्। अतआह बल

प्रतीत्यसमुत्पादज्ञानं तत्त्वबलानि पञ्च। श्रद्धाबीर्यस्मृति
समाधिप्रज्ञोपलक्षितानि। तैः प्रोच्यत्वात्। भूतको
त्पत्तदधिगमोत्कर्षे। ततोवैशारद्यलक्षणे समवधा
नं। तत्रैवैशारद्यानि। ज्ञानवैशारद्यं प्रहाणवैशार्द्य
सङ्केशहेतूपदेशवैशारद्यं व्यवदानहेतूपदेशवैशार
द्यंचेति॥ ततश्चतुर्विधवैशारद्यैः समताज्ञानलाभा
त्। अतिमिश्रेनसूक्ष्मकल्पनाविशुद्धं॥ अतःप्रति
सम्वित्त्वभावं प्रत्यवेक्षणाज्ञानं॥ ततश्चतुःप्रतिस
म्विदः॥ अर्थधर्मनिरुक्तिप्रतिभानयोगात्॥ तासिः
प्रत्यवेक्षणाज्ञानलाभात्। धर्मधातुना सर्वधर्मसारता
मधिगमाश्रयत्वंच। ततोमैत्रीकरुणाकारैकल्पानु
ष्ठानांसर्वाधिपत्यसिद्धित्वात्। अविभक्तधर्मधातुजा
नमिति॥ एवंपञ्चज्ञानात्मकः पञ्चवर्णाश्चासौभगवा
न्॥ सर्वधर्मसमताप्रवेशेनैकालम्बनत्वेऽक्षयः॥ सच
मञ्जुश्रीरनश्वासौ निरन्वयइति॥ अन्वयःक्षयः॥
नहिक्षतेऽन्वयःक्षयस्यसनिरन्वयः॥ उत्पाद
निरोधाऽभावेति॥ तत्रज्ञानेकचक्षुरिति। ज्ञानमे
वैकचक्षुर्यस्यसज्ञानचक्षु अतस्वअमलइति॥

रागादिमलाभावात् ज्ञानमूर्त्तिरिति ज्ञानमेव मूर्त्तिर्न कर्पादिर्यस्यासौ ज्ञानमूर्त्तिः ॥ सन्वचनथागतइतिगतार्थः ॥ २४ ॥

वागीश्वरो महावादी वादिराड्वादिपुंगवः।
वदतांवरो वरिष्ठो वादिसिंहोऽपराजितः ॥ २५ ॥

वागीश्वरेत्यादि। तत्रवागीश्वरादीनां महतांपदानां हेतुहेतुमद्भावेन व्याख्येयं। तत्राह। वागीश्वरइति वाचामीश्वरो वागीश्वरः। अतएव वदतांवरो भवति। महावादीति महांश्चासौ वादी च महावादी। अतएव वरिष्ठः॥ वादिराडिति। राजतइति राट् अतएव वादिसिंहइति॥ वादिपुंगवइति वादीनां पुंगवो वादिपुंगवः॥ अतएव अपराजित इति॥ परैरजीयत इति। अपराजितः॥ स एवंगुणविशिष्टो भगवान्मञ्जुश्रीरिव॥ २५ ॥

समन्तदर्शीप्रामोद्य तेजोमासी सुदर्शनः।
श्रीवत्सः सुप्रभो दीप्रि भीभासुरकरः शुचिः॥ २६॥

तत्र समन्तदर्शीति। समन्तात्सुष्ठु शीलं यस्यासौ समन्तदर्शी। समन्तभद्रज्ञानलाभात्। अतएव भ

गवान्समन्तात्करणादिति रश्मयोऽस्येति । अर्थवर्मप्रतिसं
वेदित्वात् । तेजोमालीति । तेजसां रश्मीनां मालाऽस्यास्तीति तेजो मा
ली । सविद्यते यस्य स तेजोमाली ॥ सुदर्शन इति । शोभनं
दर्शनं यस्य स सुदर्शन ॥ सोभनमिश्चिऽकि०ऊकारात् ॥
नवश्रीवत्सीति । सर्वतथागतानां हृदये श्रीवत्साकारं स
र्वभावकाश्यसाधारणा सर्वज्ञतावीजप्ररोहभूतं सकलज
गदुत्पत्तिकारणं तथागतलक्षणमस्ति । सर्वोत्साधारणात्वा
त् ॥ भगवान्सर्वतथागतज्ञानसत्वस्य । तेन दृश्यविलक्षणा
त् ॥ सुप्रभ इति । शोभना प्रभा अस्य प्रभा-प्रभामण्डलयो
गेनवस्थानात् । शीतरश्मिरिति । अशीतानवशीतलोकधात्व
वभासनात् । भास्वरकरप्रभुतिरिति । भास्वरो रश्मिप्र
योग आकारोऽस्यास्ति । भास्वराश्च करा श्च भास्व
कराः ॥ ऊर्ध्वदिग्विनयः भास्वांभास्वरकरः तेषां प्रभा
स्वरकरप्रभुतिः ॥ ततश्चऊर्ध्वदिग्विनयानां सत्वानां तदाकार
रश्मिसंदर्शनेनऊर्ध्वदिग्विनयार्थं सत्वभगवान् भास्वरक
रप्रभुतिरित्युच्यते ॥ २६ ॥

महाभिज्ञावरोभेदः शास्ताहर्ता निरुत्तरः ॥
अशेषमेवज्ञयतत्त्वः क्षेत्रज्ञाधिपतिर्विभुः ॥ ३ ॥

तत्त्वमसीत्यर्थः॥ महाभैषज्यमहाभिषक्। महावैद्यराजस्तत्समर्थः॥ रागादिसर्वव्याधीनां निर्मूलनत्वात्। वरेति-अज्ञानव्याधिप्रशमनार्थमविपरीतोपदेशदानात् वरेत्युच्यते॥ अतएवश्रेष्ठः सकलजगदभ्युद्धरणात्। शल्यहर्त्तेति-शल्यानां हर्त्ता शल्यहर्त्ता-हरणशीलः सर्वसत्त्वानां रागादिदुःखशल्यापनयनात्॥ यथाभूतसद्धर्मनिष्कर्षधर्मतत्प्रकाशनतया॥ अतएव निरुत्तरोसौ भगवान्सद्धर्मः॥ तत्राशेषभैषज्यतरुरिति-अशेषाणिरवशेषाणि भैषज्यानि अशेषभैषज्यानि तेषां तरुः अशेषभैषज्यतरुः। यतोऽसौभगवान् सकलजगदुपग्रहार्थं महाभैषज्यराजभूतः॥ क्लेशव्याधिमहाव्याधिरिति। क्लेशारागादय एव व्याधयः क्लेशव्याधयः। तेषां महारिपुः [illegible] नि॥ प्रकाशकत्वात्॥ ३७॥

त्रैलोक्यतिलकः कान्तः श्रीमान्नक्षत्रमण्डलः॥
दशदिग्व्योमपर्य्यन्तधर्मध्वजमहोच्छ्रयः॥ २८॥

त्रैलोक्येत्यादि॥ सकलजगदसाधारणत्रैलोक्यपूज्यत्वात्। सतांश्रेष्ठ भगवान्इतिसिद्ध्यर्थः॥ श्रीमानिति-तत्रैवनक्षत्रमण्डलइति-नक्षत्रा

णां मराउलं नक्षत्रमराउलं । तदेवकरुणं यस्य स भगवान्तन
क्षत्रमराउलः । तत्स्वभावत्वात् ॥ तत्रदशादिग्भ्योनपर्य
न्तइति । दशादिग्भ्योम दशादिग्भ्योम तस्य पर्यन्तः ॥
धर्मध्वज इति धर्मस्यध्वज धर्मध्वजः ॥ महोच्छ्रय इ
ति महच्चासौ उच्छ्रयश्च महोच्छ्रयः ॥ तत्तथाचायमर्थः ॥
दशादिग्भ्योनपर्यन्तेषु धर्मध्वजरूपेण मेरुमहोच्छ्रयो यथा
सौ प्रतीयेतः ॥ सर्वलोकस्यपुरुषज्ञानमभिभूय ध्वजस्य
सोच्छ्रयत्वात् ॥ २८ ॥

जगच्छत्रैकविपुलो मैत्रीकरुणमराउलः ॥
नमननेमेरुः श्रीमान्रत्नछत्रो महाविभुः ॥ २९ ॥

तत्रजगच्छत्रैकविपुलइति जगतां छत्रं जगच्छत्रं ए
कयोक्तिनीयं । विपुलंविस्तीर्णं यस्यभगवान् जगच्छ
त्रैकविपुलः । सर्वक्लेशानां पापहरणात् । मैत्रीकरुणा
मराउलइति मैत्री करुणाच्च मैत्रीकरुणा तयोर्म
राउलः । तत्तोलदानात् ॥ तत्रपप्रनेमेरुरिति प्र
धानः समाधिर्गर्भे भगवानेव श्रीमानिति गतार्थः
रत्नछत्रइति सर्वरत्नमयत्वात् । महाविभुरिति म
हांश्चासौविभुश्च महाविभुः ॥ सर्वभावस्वभावत्वात् ।

२९॥

सर्वेऽद्य महाराजः सर्वेऽद्यात्मभावधृक्।
सर्वेऽद्य महायोगः सर्वेऽद्यैकशासनः॥३०॥

सर्वेऽद्य महाराज इति. महांश्चासौ राजा च महाराजः सर्वेऽद्यानां ऊर्ध्ववर्तिनां महाराजः सर्वेऽद्य महाराजः वैधिचित्तवज्रस्वभावत्वात्॥ सर्वेऽद्यात्मभावधृगिति सर्वेऽद्यानामात्मा सर्वेऽद्यात्मा सर्वधर्मशून्यताज्ञानस्वभावः सत्तांधारयतीति सर्वेऽद्यात्मभावधृक्॥ तत्र सर्वेऽद्य महायोग इति। महांश्चासौ योगश्च महायोगः॥ सर्वेऽद्यानां महायोगः सर्वेऽद्य महायोगः। तथाहि। महायोगोऽहिभगवान् वज्रसत्त्वस्तथागत इति। सर्वतथागतहृदयविहारित्वात्। सतथोक्तः। सर्वेऽद्यैकशासन इति. सर्वेऽद्यानामेकमेव शासनं यस्यस सर्वेऽद्यैकशासनः॥ तथाहि। एकमेवयानं यदुत महायानमिति वचनात्॥ ३०॥

वज्रत्वाभिषेकश्रीः सर्वरत्नाधिपेश्वरः।
सर्वलोकेश्वरपतिः सर्ववज्रधरेश्वरः॥ ३१॥

वज्रत्वाभिषेकश्रीरिति. वज्र एव इत्यस्योत्पत्तिः

ष्याभिषेकश्रीः सत्त्ववज्री। सर्वरत्नाधिपेश्वर इति सर्वर
त्नो रत्नसम्भवः तस्याधिपेश्वरः रत्नवज्री॥ सर्वलोकेश्व
रपद्मेति। सर्वलोकेश्वरोऽमिताभः। तस्यपतिरिति धर्म
वज्री। सर्ववज्रधरोऽधिष्ठान इति। सर्ववज्रधरोऽमोघसिद्धि
स्तस्याधिपतिः कर्मवज्री॥ ३१॥

सर्वओङ्ग महाचित्तः सर्वओङ्ग मनोगतिः॥
सर्वओङ्ग महाकायः सर्वओङ्ग सरस्वती॥ ३२॥

सर्वओङ्ग महाचित्तइति। सर्वओङ्गो वैरोचनः तस्य महाच
त्तइति वज्रधात्वीश्वरी। तत आर्यमर्थो भवति॥ वज्र
रत्नादीनां पञ्चतथागतानां सम्बन्धिनो योऽयं पञ्च
आत्मात्मत्वभावोभगवान्। मञ्जुश्री वज्रसत्त्व प्र
विभक्तकुलजाः॥ सर्वओङ्ग मनोगतिरिति चित्तत्व
भावत्वात्। सर्वओङ्ग महाकायइति कायात्मकत्वात्
सर्वओङ्ग सरस्वती इति वाक्स्वभावत्वात्॥ अतएव
श्रीसमाजे आह। सर्वतथागत काय वाक्चित्त वज्रइति
। सत्त्वभगवान् सर्वतथागतज्ञान सत्त्वः॥ ३२॥

वज्रसत्त्वो महालोको वज्रेन्दुर्विमलप्रभः।
विश्वादिर्महाग्नेयो विश्वधर्मेश्वरप्रभः॥ ३३॥

नत्र बुद्धकर्मणां लोक इति। चक्रसूर्य्यस्य ज्ञानमण्डलस्य
मण्डलोकः सकलज्ञेयतत्त्वावभासनत्वात्। सनाथोक्तः
केनचिद्विमलत्रभृति। केनचिज्ञानेन। तस्यविमलता
सर्वक्लेशवासनादिदोषागमनात्। प्रभारश्मिरित्यर्थः
लोकधातावभासनत्वात्। चक्रसनाथोक्तः। अनेन
नत्रयदृश्येन नाथकं भवति॥ मंत्रमुखचर्यावारिजे
लक्षादिकः सहदिसर्व्यमण्डलं चक्रमण्डलोवा
स्थितिक्रमेण उपरि अकारं विचिन्त्य प्रत्येकं वाक्य
तमं नामार्थमभिमुखीकृत्यार्थनामसंगीतिपेठादि
स्याम्नायः॥ नत्रविघ्नादिमण्डलमिति। अनेन
योगिना स्वभावभेदमाह। वैरोचनप्रतिपादकः पर
मिताभारी। मंत्रमुखचर्यावारिजस्वभावः सएव
भगवान् विश्वचरणोज्वलप्रभ इति। विश्वचरणो
ऽनेकोरवर्णविश्वचरणः तस्योज्वलाप्रभा सर्वत
मोन्धकारविधमनादीप्रियेस्यासो सनथा॥ तथा
हिभगवान्। अत्रएव मञ्जुश्रीनामसंगीतिमुखे नी
लादिलोकधातु संनिपतितानां अपिवेनयानां नाना
गोत्राशयचरितादिमुक्तिक्रियाणां एकक्षिप्तेव

ऋो। अनित्यदुःखानात्मादिशानित्र क्लेशनि
र्वाणादिभेदेन स्कन्धधात्वायतनप्रतीत्यसमुत्पादार्य
सत्यादिभेदेन सत्युपस्थान सम्यक्प्रहाणाऋिपादे
ऋियादिभेदेन। दशबलवैशारद्यादिबुद्धधर्मभेदे
न नानाधामाभिर्नानाबुद्धैर्नानाभिज्ञाभिर्नानाधि
मुक्तिभिर्नानाधातुभिर्नानाक्षेत्रस्थानैर्नानाप्रदेशैर्नाना
यानैर्नानाफलाधिगमैस्तावन्तैरक्षरोत्पर्कैकव
देशनाज्ञानेन धर्मप्रकाशयतीत्यत आह॥ विश्व
वर्णोज्वलप्रभइति। अस्यनाम मंत्रपदस्य चथा
स्थानरूपदेशात्॥ भगवति सर्वतथागत
ज्ञानसत्त्वयोजनोद्यमिनि॥ ३२॥

संबुद्ध वज्रपर्य्यङ्को बुद्ध संगीतिधर्मधक।
बुद्धपुत्रोद्भवः श्रीमान्सर्वज्ञज्ञानबोधक॥३४॥

तत्रसंबुद्ध वज्रपर्य्यङ्कइति। सम्बुद्धस्यभगवतः शा
क्यमुनेर्वज्रपर्य्यङ्कः सम्बुद्ध वज्रपर्य्यङ्कः येनासौभ
गवान् चतुरोमारान्सएजिस्यक्षयानुत्पादज्ञानेसा
क्षात्कृतवान्। सच्चभगवान्नेव। बुद्ध संगीतिधर्म
धकइति। संगानं संगीतिः बुद्धानांसंगीतिर्बुद्ध

संगीति॥ तथाहि संगायिष्यामो नर्विद्यामवचना
न्। सैव धर्मसंधारयतीति ॐ संगीति धर्मधक्
सर्वभगवान्। ॐ पद्मोद्भव श्रीमान्सर्वज्ञज्ञानको
शधीति। सर्वज्ञस्यज्ञानं। सर्वज्ञज्ञानं तदेवकोशो
भाण्डागारं तद्धारयतीति सर्वज्ञज्ञानकोशधृक्॥

॥ ३४॥

विश्वमायाधरोराजा ॐविद्याधरो महान्।
वज्रतीक्ष्णोमहावज्रोविभुः परमाक्षरः॥ ३५॥

तत्रविश्वमायाधर इति। विश्वमायां नानाप्रकारैर्नि
र्माणं तद्धारयतीति विश्वमायाधरः। राट् इति। रा
ज्ञःशुभकर्मपथदेशनाभाविते लोकं रंजयतीति
राजा सर्व ॐविद्याधर इति। ॐक्षानां विद्याना
ॐविद्याचनस्तोधारणः धर्मार्थमंत्रज्ञानिलक्षणा
नं धारयतीति ॐविद्याधरासो॥ महानिति सर्व
गतत्वात्॥ तत्रवज्रतीक्ष्णाइति। महामुद्रारूपेण
महावज्रं इति कर्ममुद्राखभावेन। विभुः इति
प्रज्ञापारमिताप्रलकः। सचसर्वमुद्राद्वारेण
परमाक्षर इति धर्ममुद्रामुखेन। तत्रश्चार्यभ

गयात्रादिऽऽद्यवचनर्मऽऽमऽद्रितो वज्रतीक्ष्णाऽसुख
ते॥ ३५॥

ऽऽःखछिद्महायानोवज्रधर्ममहत्युधः।
जिनजिनवज्रगाम्भीर्यो वज्रवद्भिर्यथार्थीवित्॥३६॥

ऽऽःखछिदीति। तत्रऽऽःखपञ्चोपादानस्कन्धाः तेषांछिदः
ऽऽःखछिदः सर्वयानं मार्गसत्यत्वात्। वज्रधर्म
महत्युधऽइति। तत्रवज्रधर्मोज्ञानधर्मः सर्वसंदिग्ध
पक्षधर्मोछेदनात्। महत्युधवस्यसऽऽःखछिदम
स्यान. वज्रधर्ममहत्युधऽइति. भगवान्॥ तत्रजिन
जिनिति। जिनाअक्षोभ्याद्यस्तथागतास्तांजय
त्याधिपत्येनेतिजिनजिभगवान् वैरोचनः सर्वब
गवान्मञ्जुश्रीः॥ वज्रगाम्भीर्यऽइति. वज्रस्यज्ञानस्य
गाम्भीर्यं वज्रगाम्भीर्यं। गाम्भीर्यंपुनः ग्राह्यग्राह
काद्यविकल्पविरहः प्रज्ञास्वभावोयस्यासौ तथो
क्तः। वज्रवद्भिरितिः वज्रमिवाभेद्योवद्भिर्यस्यासौ
वज्रवद्भिः॥ सर्वग्राह्यग्राहकादिविकल्पसम्बन्धेर
भेद्यत्वात्॥ यथार्थवित्ऽइतिः यथावस्थितपदार्थवे
त्तेति यथार्थवित्ऽइति॥ ३६॥

सर्वपारमितापूरी सर्वभूमिविभूषणाः।
विशुद्धधर्मनेरात्म्यसम्यग्ज्ञानेन्दुरुत्तमः॥३७॥

तत्र सर्वपारमितापूरीति। सर्वपारमिताददा-
तीं पूरयितुं शीलं यस्य स तथोक्तः। सर्वभूमिविभू
षणेति। सर्वभूमयः प्रमुदितादयस्ता एव भूम्य
लंकरणानि भूषणानि यस्य स तथा॥ विशुद्धधर्मनैर
त्म्येति। विशुद्धधर्मस्य चित्तप्रतिवेधलक्षणप्रज्ञा
धानस्य नैरात्म्यनिरवभासीकरणं। सम्यग्ज्ञानं त
देवेन्दुः समन्तभद्रचित्तोत्पादः सर्वतथागतज्ञान
कायत्वात्। सम्यग्भगवान् हृदिचन्द्रमण्डलाका
रप्रकृतिप्रभास्वरज्ञानं यस्य स तथा॥३७॥

मायाजालमहोद्योगः सर्वतंत्राधिपः परः।
अशेषवज्रपर्यंको निःशेषज्ञानकायधृक्॥३८॥

तत्र मायाजालमहोद्योगइति। मायाजालस्यनिर्मा
णसमूहस्य महानुद्योगोयस्य स तथा। सर्वतंत्राधि
पःपरइति। सर्वतंत्राणां अधिपतिः रा-
धिपः प्रधानमित्यभावात्। परइति गणार्थः
॥अशेषवज्रपर्यंकेति। अशेषनिरवशेषस्य

स [illegible] वज्रसमयपर्यंको यस्मात्सोऽज्ञेयवज्रपर्यंकः। अतएव निःशेषज्ञानकायश्चेति। निःशेषाणि पंच ज्ञानान्येवकायो निःशेषज्ञानकायः। तद्धारयतीति निःशेषज्ञानकायश्चेति॥ ३८॥

समन्तभद्रः सुमतिः क्षितिगर्भो जगद्धृतिः।
सर्वेऽहमहागर्भो विश्वनिर्माणचक्रधृक्॥ ३९॥

तत्र समन्तभद्र इति। समन्तो भद्रो कल्याणं यस्मात्सो समन्तभद्रः। वोधिचित्तवज्रात्मकत्वात्। सुमतिरिति। शोभनोमतिः सुमतिः सर्वविकल्पमलाभावात्॥ क्षितिगर्भ इति। क्षितिः पृथ्वी भोजनलोकस्तस्य गर्भ उत्पत्तिकारणोपायः क्षितिगर्भः। जगद्धृतिरिति। जगदिति सत्वलोकः तस्यधृतिः धारणंजगद्धृतिः। सकलजगत्धार इत्यर्थः॥ तस्यसर्वेस्थिरत्वसभावत्वभावत्वात्॥ तत्र सर्वेऽहमहागर्भइति। सर्वेतथागतानां अक्षवर्तिनो उत्पत्तिहेतुत्वात् यस्मादसौभगवान् वोधिचित्तवज्रात्मकत्वात्॥ सर्वेऽहमहागर्भ इत्युच्यते॥ अतएव विश्वनिर्माणचक्रधृक्। विश्वनानाप्रकारलौकिकलोकोत्त

रदेवकः संदर्शनं निर्माणं विश्वनिर्माणं तस्य चक्रं वि
श्वनिर्माणचक्रम् यद्यत् तत्तारयतीति विश्वनिर्मा
णचक्रधक्॥ ३९॥

सर्वभावस्वभावात्मः सर्वभावस्वभावधक्।
अनुत्पादधर्मविभ्यार्थः सर्वधर्मस्वभावधक्॥४०॥
तत्र सर्वभावस्वभावात्मप्रकृतिः। सर्वे च तेभावा श्च
सर्वभावस्वभावात्मः। अनश्रुतिश्चेत्। शून्यकोटि
परिशुद्धे यथागतज्ञानकायस्वभावत्वात्। तस्य भ
गवतः सर्वभावस्वभावधर्मिति॥ अतएव सर्व
भावस्वभाव सर्वधर्मनैरात्म्यं विभर्तीति धारयती
ति सर्वभावस्वभावधक्। सर्वाकारमहाशून्य
तारूपत्वात्॥ अनुत्पादेति तत्र अनुत्पादो
निःस्वभावो धर्मोयस्यासावनुत्पादधर्मपर
मार्थतः विभ्यार्थ इति। सदत्यासकलजगद
नुग्रहार्थं समुदाहरत्वात्। सर्वधर्मस्वभावधीग
ति। तत्र सर्वधर्मकर्मे। यदुत स्कन्धधात्वाय
तनप्रतीत्यसमुत्पाद पारमिताभूमि शून्य
ता बोधिपक्षा सत्यभाना प्रमाणरूप समाप

त्रिविमोक्षमुखाभिज्ञासमाधिधारणीबलवैशारद्य
प्रतिसंविन्महामैत्रीमहाकरुणावासिकाकृष्णध
र्मआवेणिकफलसर्वाकारज्ञानयथाभूतकोट्यनिभि
न्नधर्मधातवश्चेति॥ सर्वधर्माणांसर्वाकारोभावः सर्वध
र्मस्वभावः। सचयथाभूतंपरिज्ञानंनकारयतीतिस
र्वधर्मस्वभावधकः॥ तथोक्तंज्ञानपरिवर्ते॥ सम्यो
धिचित्तमुत्पाद्यमहामैत्रीप्रयोगतः। सर्वधर्मानि
राभासानिर्ज्ञात्वाविमुच्यतेक्षणे॥ ४०॥

एकक्षणामहाप्राज्ञः सर्वधर्मावबोधकः।
सर्वधर्माभिसमयो भूत्वाबुद्धोमुनिर्यथा॥ ४१॥

एकक्षणेतिनिपातनात्रएकश्चासौक्षणश्चैकक्षणः
महांश्चासौप्राज्ञश्चमहाप्राज्ञः सर्वधर्मविवेकात्मकः॥
ननश्चायमर्थःसंपद्यते। एकेनैवज्ञानेनमहाप्राज्ञ
याथोक्तंसर्वधर्मावबोधवान्। एकक्षणामहाप्राज्ञः
सर्वधर्मावबोधकश्चकारयतीति एकक्षणामहाप्रा
सर्वधर्मावबोधकः॥ तत्रसर्वधर्माभिसमयइ
ति। सर्वधर्माणामभिसमयःसर्वधर्माभिसमयः
समयावबोधोयस्यससर्वधर्माभिसमयोभूत्वा

समाधिरिति। भूतं सत्यं तथ तेनियावत्। तस्माद्भू
तात्। सचासौ मुनिश्च भूतात्मुनिः। अतएवा
ह्वीः। भूतार्थभावप्रकर्षपर्यन्तगमनात्। यो
गिज्ञानस्य॥ ४१॥

स्तिमितः सुप्रशान्तात्मा सम्यक्संबुद्धबोधिचक्र।
प्रत्यक्षः सर्वज्ञानां ज्ञानार्चिः सुप्रभास्वरः॥४२॥
प्रत्यवेक्षणाज्ञानगाथा द्वाचत्वारिंशत्॥ ॥

स्तिमितः इति। तयौद्धत्याभावात्। अतएव
सुप्रशान्तात्मा समाधिरिति। स्थिरचित्तात्मयोभा
वात्। सम्यक्संबुद्धबोधिचक्र। अनुत्तरसम्य
क्संबोधिधारणत्वात्। भगवान्सम्यक्संबोधि
रित्युच्यते। प्रत्यक्ष सर्वज्ञानामित्यादि। तत्र
प्रत्यवेक्षणाइति। स्वसंवेद्यलक्षणत्वात्। सर्वज्ञ
ज्ञानं प्रत्यक्षं वर्त्तते। ज्ञानार्चिरिति। प्रज्ञाप्रदी
पः। सुप्रभास्वर इति। अनभिलाप्यानभि
लाप्यज्ञेयावभासनत्वात्। अतएवासौ
सर्वतथागतज्ञानकायो भगवान्। जगद्धित
स्वभावेनापिविनेयानां सर्वसत्वानां सुख

भाधिमात्रेंद्रियाणामनुग्रहकामः। सर्वलोकिकलो
कोत्तर समाधिसंदर्शनमुखेनबुद्धज्ञानसंभारभू
मिपारमिताफलंप्रपूरणार्थं नानारूपं संदर्शय
ति स्म॥ तत्रमृदिंद्रियाणांविनेयानांसत्वानांक
चिद्भातिरूपेण। मध्येंद्रियाणां श्रावकप्रत्येकबु
द्धगोत्राणामनुग्रहार्थं कचिन्न रूपेण। अ
धिमात्रेंद्रियाणां बोधिसत्वगोत्राणां बोधिसत्व
संभारभूमिपारमितादिक्रमेण कचिद्दात्मभा
वसंदर्शनात्। कचित्सम्यक्संबुद्धस्वभावेना
कचित्लोकिकलोकोत्तरज्ञानात्मना। कचिद्वि
नेयसत्वानामनुग्रहार्थं भद्रघटादिरूपेण। क
चित्महाव्याधिपरिपीडितानां सत्वानां महाभै
षज्यादिरूपेणौषधादिभिः स्थिरचलसर्व
स्वभावैर्जगदनुग्रहार्थं मनुविधस्य नाममंत्राक्ष
रपदानि पंचसप्तनिशतद्व्यानि संस्कार्यंत
त्रजलभेदेन पंचधाप्रविभज्य एके कस्मिंश्चलो
पंचपंचाशत नाममंत्राक्षराणि सप्तत्रिंशत्पदानि
च नाममंत्राक्षराणि दशोद्गतनाम्पर्यनुद्ध

दे उद्धरिणगत्वा सर्वतथागत हृदय मुद्रविधाय सर्वतथाग
तवर्ण वोधिसत्वादि पर्षदंवाच भाषा रागचरिणा
कृत्वा मुद्रिमोक्षमुपेत्य संशोध्य स्वकलशेषि
क्षिप्तानि उन्नगत्य वज्रधातु महामण्डलस्य
दक्षिणतीय चक्रे यथाक्रमनोम व स्थानि पक्षे
त्॥ ततोमंत्रमुच्चार्य्योचारी कलशेनोवा कलश
उद्धितोवा उदकाश्रीत पादिनं॥ त्रिविधं कृत्वात्मा
नं मालाम्बार्य नामसंगीति पठन् यत्र थोक्तान्॥ गान
वाद्योपशोभाय:॥ गाथा द्वात्रिंशत्॥ नाम संघा
क्षणि कृत्वा सप्रति ज्ञातव्य मङ्कतोपि॥ ७५॥
आर्य्यावलोकितेश्वरस्य नाम संघार्थो वली
कित्यां प्रसवेक्षणाज्ञान मुद्रिन मुत्पादिकोऽष
मः॥ ॥ गाथा द्वात्रिंशत्॥ ॥
इत्यार्य समता ज्ञानसंखेन भगवत्सर्वतथा
गतज्ञानकायस्य मञ्जुश्रीज्ञानसत्वस्य ललितमाधि
कल्पाह॥ ॥
इत्यर्थ साधकः परः सर्वमायाविशोधकः॥
सर्वमन्त्रोत्तमोनाथः सर्वसत्व प्रमोचकः॥ १॥

नत्वइत्यर्थः। अर्थन इत्यर्थः। इशासार्थश्च इत्यर्थः। नस्यसाधकोनिष्पादको रत्नत्रयस्यभवमात्मनो भिक्षूणांवाऽनादिकुबोधेनसंशोधनात्॥ अतएवपरः॥ विशेषेणशिक्षादानप्रदत्वात्। सर्वोपायविशोधकइतिः सर्वोपायेभ्योनरकेतिर्यंचेषांविशोधकः॥ नत्वस्वकीयकर्मसंशोधनेनतदुपायहारिणां विशोधनात्॥ अतएवसर्वसत्वानामइति। अतएवसर्वसत्वानामुत्तमः परमार्थकदर्शनसुखदत्वात्॥ नत्वश्रावकाद्यार्यसत्वानांनाथइत्युच्यते। सर्वसत्वप्रमोचकइति। विनेयानांगोत्रचरिनाशयानुशयाविधिमुक्तीन्द्रियाणांश्रावकादिबोधिमार्गोपदेशप्रदानमुखेनप्रमोक्षणात्वात्॥ ७॥

केशसंग्रामभूरेकअज्ञानरिपुदर्पहा।
भीःभूल्लाधरःश्रीमान्वीरवीभत्सकृत्थकः॥ २॥

नत्वकेशसंग्रामभूरेकइति। केशारागादयस्तेषांसहसंग्रामःकेशसंग्रामः। तस्मिन्भूरिःएकएवाद्वितीयः। सर्वक्लेशोपक्लेशशमनपरिकरणेसमर्थीकरणात्। अतएवअज्ञानरिपुदर्पहा॥

अज्ञानमोहः सत्यादिज योविनति नदेवरिपुः।ऊश
नपक्षप्रतिवन्धकत्वात्॥ तस्य दर्पोहंकार तं हन्ती
ति अज्ञानविषुदर्पहा॥ श्रीमिति आदिउद्धस्योप
निवीजं सत्वभृङ्गारधर इति।भृंगं भृङ्गं।आ
समन्ताक्षरत्यनीति भृङ्गारधरः। सत्वेऽस्य व्याप
कत्वात्॥ तंधारयतीति स यथा। श्रीमान्निगि
नार्थः॥ वीरवीभत्सरूपधरीति।वीररसेनिता
वीभत्सरसोपेताश्च येक्रोधविशेषा स्तेषांरूपं वी
रवीभत्सरूपं तद्धारयतीति वीरवीभत्सरूपधृ
क्॥ २॥

वाहुदण्डशलाक्षेपः पदनिक्षेपनर्तनः॥
श्रीमच्छन्नभुजाभोगो गगनाभोगनर्तनः॥३॥
तत्र वाहुदण्डशलाक्षेपइति। वाहुदण्डश
लाक्षेपे वहिर्गतनर्तनं पदं स्थानमालीढादि न
स्यनिक्षेपः पञ्चवितत्यादिः आभ्यां वाहुदण्ड
शलाक्षेपपदनिक्षेपाभ्यां नर्तन गात्रविक्षेपो
यस्य सतथोक्तः। भूमिचर्मानतं दर्शयित्वाभूमो
व्याकाशचर्म्मानतं दर्शयितुमाह॥ श्रीमच्छन्ने

भुजभोगोगगनाभोगगर्जन इति। श्रीमान्यन्नत्यभ
र तस्यशतभुजाः श्रीमच्छतभुजाः तासामाभोगः
सोऽवं श्रीमच्छतभुजाभोग स्तेन गगने आकाशे
आभोगपरिवर्जनं। अजशतानां यस्मात्सो सतथोक्तः
॥ ३ ॥

एकपादनखाक्रान्त महीमराद्रिनलोत्थितः।
ब्रह्मराजशिवराक्रान्तः पादाङ्गुष्ठनवेत्थितः॥ ४॥

एकपादनखाक्रान्तेत्यादि। पादस्यांगुष्ठः पादांगु
ष्ठः तस्यनवः पादाङ्गुष्ठनवः। ब्रह्मराजस्यशि
वरं ब्रह्मराजशिवरं तेनाक्रान्तं पादाक्रान्तनवे
त्थितः। यस्यस ब्रह्मराजशिवराक्रान्त पादांगुष्ठन
वेत्थितः। अनेनचपरब्रह्मेतहिप्रकीर्तिता तस्यभ
गवत स्तद्विनेयनार्जनार्थं॥ ४॥

एकार्थोद्वयधर्मार्थः परमार्थोविनश्वरः।
नानाविज्ञप्तिरूपार्थश्चित्तविज्ञानसंततिः॥ ५॥

तत्रएकार्थइति। परमार्थस्वभावत्वात्। अतस्त
द्वयधर्मार्थरतिर्याह्य याह्यकाग्रपञ्चः। पर
मार्थइति। अर्थप्राप्तिप्रीतिपत्तिभेदात्त्रैधापरमा

र्थः। अविनश्वर इति। आकाशतुल्यत्वात्। नाना विज्ञप्तिरूपार्थ इति। षड्प्रवृत्तिविज्ञानानि। चित्त मित्यालयविज्ञानं विज्ञानमितिलिङ्गमनः। तत्रार्थ कर्मोभवति। चित्तादालयविज्ञानलक्षणात् लिङ्गं मनः। मनस्तत्रप्रवृत्तिविज्ञानानिविषयविज्ञप्ति लक्षणानि। नश्यतश्च पुनरालयविज्ञान वासिना श्रालयविज्ञानात्पुनः। किङ्गमनः तस्माच्च पुनः प्रव र्त्तविज्ञानीत्येवं प्रवृत्तीनाम् समुत्पादस्वरूपं परिदी पितं। तथाचोक्तं। विज्ञानकोमनसाश्च विज्ञप्तिविष यस्यचेति। अनश्यकिमुक्तं भवति। यानिषड्विज्ञ यविज्ञप्तिलक्षणानि। नश्चित्तं यल्लिङ्गं मनस्तत्स र्वमस्वभावात्॥ ५॥

अशेषभावार्थरीतः सूत्रतारीत एवमीः।
भवरागातीतश्च भवत्यमहारतिः॥ ६॥

तत्राशेषभावार्थरीतिरिति। अशेषाणिनिरवशेषा येभा वार्थास्तेषुस्थित्यादिषु रीतिःप्रीतिर्लोकव्यवहारवशा त्। तथाचोक्तं नागार्जुनपादैः। स्थितेसमुत्पादभङ्गेस दृसङ्गमंसमं विशिष्टंबालोकव्यवहारवशाद्वदन्ति॥

ऊर्ध्वमनत्वदशादिति। भूम्यनारतिरिति। भूम्यनाद्यारतिः
प्रीतिः भूम्यनारति सर्वत्रभाव भावत्वात्॥ परमार्थ
तस्तु नास्याभ्यनुज्ञत्वे॥ अतस्त्रयधीः। भवत्रया
धीनइति। नत्रकामभव रूपभव आरूप्यभवेति॥
त्रैधातवाः। कामधातौ कामरागः। रूपारूप्यो भव
रागस्तु नकामरागः। तथाचोक्तमभिधर्मे। भवरागा
द्विधाजइति। नदेवकामरागादिभिरतीतो ऽऽज्ञानी
भवरागात्ततीत उत्कुष्यते॥ सत्वभगवान् मञ्जुश्री भ
वत्रयमहारतिरिति। तथापि भवत्रये कामधात्वा
धिनभूमिजानां देवत्रासानुग्रहार्थं तत्र तत्र ज
न्मसंदर्शनात्। भवत्रयमहारतिरिति॥ ६॥

अदभ्रोध्रध्वलः शस्त्रकंठश्रवः॥
बालार्कमण्डलच्छायो महारागनरप्रभः॥ ७॥
इन्द्रनीलाग्रसच्छीरो महानीलकचाग्रधक्॥
महामणिमयूखश्रीर्ब्रह्मनिर्माणभूषणः॥ ८॥

नत्वदभ्रोध्रध्वलेत्यादिना महारागनरप्रभोपि
र्यंतं गमं॥ ७॥ इन्द्रनीलाग्रसच्छीरो महानीलक
चाग्रधक्। महामणिमयूखश्रीर्ब्रह्मनिर्माणभूषणइति

तत्रऽऽह इति। अविदितसकलविषयमात्। प्रज्ञालोकानुवर्तिनः सर्वतथागतज्ञानकायस्यादि। योगव्याख्यातात्मवशिनिष्पादनीति तेनाभिधीयते॥ ७॥ ८॥

लोकधातुशतसहस्रीकृद्धिपादपराक्रमः।

महाभ्रमिधरस्तत्व श्रवणस्मृतिसमाधिरा॥ ९॥

तत्रलोकधातुशतसहस्रीति। लोकधातवां शतानि लोकधातुशतानि। कम्पयितुं शीलं यस्य स लोकधातुशतसहस्रीकृत्। एतच्चप्रमुदितायांभूमौ व्यवस्थितस्य बोधिसत्वस्य हि माहात्म्यं संदर्शयति॥ तथाहीयं चक्रवर्तिनिदेशः। जानुकेवो भवन्तिवेम तथागतानां संयोजनत्रयमपि क्षतमस्य सर्वमोदधिभवति च परंतु हि बोधिसत्व आलोकधातुशतसहस्रीकृत्वा जानुकेवो भवति॥

ऋद्धिपादमहाक्रम इति। कायवाङ्मनोविवेकमात्मविपक्षप्रणिधिसंनिश्रया नभिसंस्कारमुद्गृह्य पर्यवसाना श्रुत्वा ऋद्धिपादाः॥ तेषामृद्धिपादानां महाक्रमः। पराक्रमोयस्यस ऋद्धिपादमहाक्रमः॥

महास्मृतिधर इति। महती स्मृतिः। साच मंसुते वस्तुतत्समयोपलक्षणा नो धारयतीति सतधानत्वइति॥

कल्पितपरतंत्रपरिनिष्पन्नस्वभावत्वात्। किमत्र स्व
भावत्रयतत्त्वमिष्यते। असच्चनित्यं सच्चाप्यतत्त्वतः। स
दसत्तत्त्वश्चेति। स्वभावत्रयइष्यते॥ परिकल्पित
लक्षणनित्यं तन्निषेधि। एतत्परिकल्पितस्वभावेन त
त्त्व मविपरीतस्वभावत्वात्। परतंत्रलक्षणंसच्च न
यतत्त्वतः। भ्रान्तिमात्रत्वात्। तत्परतंत्रस्वभावेन तत्त्व
परिनिष्पन्नलक्षणं। सदसत्तत्त्वतश्चेति॥ एत
त्परिनिष्पन्नस्वभावेन तत्त्वमिति। त्रितत्त्वयोगात्।
सएवभगवान्तत्त्वइत्युच्यते॥ चतस्रःस्मृतिसमा धि
यइति। चत्वारिस्मृत्युपस्थानानि तद्यथा। काय
स्मृत्युपस्थानं नानानिदेशमात्रमयं कायोग्राह्यादि
विकल्पलक्षणश्चेति। स्मृतिरुपस्थानं। एववेदना
स्मृत्युपस्थानं। चित्तस्मृत्युपस्थानं। धर्मस्मृत्युपस्था
नं॥ चतस्रश्चबीर्य समाधिस्मृति संप्रजन्य योगा
न्। एजनइतियाह। समाधिश्चित्तैकाग्रतानियाह
समाधिरुच्यते। स्मृत्युपस्थानानां समाधिरुच्यते। चतु
स्मृतिसमाधिरुच्यते। सएवभगवान्मञ्जुश्रीः॥ ९॥

बोधकुसुमामोदसभागतगुणोदधिः।

अष्टाङ्गमार्गनयविदित्यम्यक्त्वसुद्धमार्गविदित्यर्थः॥
सत्त्वोधंगकुसमोदइति। अनभिसंस्कारवाहि
भ्योऽग्रधर्मेभ्यः श्रद्धादिभ्यो दर्शनमार्गपर्यापन्नाभि
धर्मधातुगोचरेभ्यः सत्त्वोध्यङ्गसुकुलक्षणानि
नान्येवकुसुमानि भावनामार्गफलस्पर्शनभूतत्वाद्बो
ध्यंगकुसुमानीत्युच्यते। तेषामामोदः श्रुतमयेन
ज्ञानेनाधिगम्यमायामरीचिस्वप्नगन्धर्वनगर
कारप्रतिभासलक्षणात्सर्वजगतस्तत्त्वदर्शनमार्गसाक्षा
त्करणात्। महामामोदइत्यचिन्त्यस्यभवतीतिबो
ध्यंगकुसुमामोदइत्युच्यते॥ तथागतगुणोदधि
रिति। तथागतानांगुणास्तथागतगुणाः। अष्टादशा
वेणिकादयोऽष्टमार्गास्तत्स्वरूपंतदधयः। प्रभू
तत्वात्। अन्येषांचगुणरत्नानांआकरत्वाच्च तथाग
तगुणोदधिर्भगवान्। अष्टांगमार्गनयविदिति।
भावनामार्गेप्रभावितानांक्षेमार्गाणांनिर्वाणप्रा
दितानि। तेषांनयोमार्गः उपाय इतियावत्। तं
वेत्तिजानातीति अष्टांगमार्गनयवित्। सम्यक्स
म्बुद्धमार्गविदिति। सम्यक्संबुद्ध इति स्वयमप

रोपशादिरत्नत्वावधाच्च । सम्यक्सम्बुद्धसमार्गो धर्म
धातु स्तद्धारयतीति सम्यक्सम्बुद्धमार्गवित्सर्वभ
गवान् ॥ १० ॥

सर्वसत्वमहासंगो निःसङ्गो गगनोपमः ।
सर्वसत्वमनोजातः सर्वसत्वमनोभवः ॥ ११ ॥

तत्र सर्वसत्वमहासंग इति । महांश्चासौ संगश्च म
हासंगः । सर्वसत्वानां महासंगः सर्वसत्वमहासङ्गः
। तत्र चत्वारि संग्रहवस्तूनि । दानप्रियवचनअर्थ
चर्या समानार्थतेति ॥ दानेनार्थज्ञः प्रियवचनेन का
लज्ञः अर्थचर्यायाप्रवेत्तः समानार्थतया धर्मज्ञः स
त्वपरापरज्ञतयानित्यादितानि संग्रहवस्तूनि ॥ एभिः
संग्रहवस्तुभिः सर्वसत्वानात्मसाक्षात्करोतीति सर्वस
त्वमहासंग इत्युच्यते । संक्षिप्तः सएवभगवान् । प
रमार्थतस्तु भगवान्निः संग शून्यता स्वभावत्वात् । अ
सएवगगनोपमः प्रज्ञापारमितात्मकत्वात् । सर्वस
त्वमनोजानातीति । मनसिजातो मनोजातः सर्वसत्व
मनोजातः । तथाचोक्तं । सर्वे तथागतगर्भाः सर्वस
त्व इति मनोजव सर्वतथागतवेगउच्यते ॥ सर्वस

त्वानांमनोजवः सर्वसत्वमनोजवः। सर्वसत्वचारि ता
नुवर्त्तित्वात्॥ ११॥

सर्वसत्वेन्द्रियार्थज्ञः सर्वसत्वमनोहरः।
पञ्चस्कन्धार्थतत्वज्ञः पञ्चस्कन्धविशुद्धकृत्॥१२॥

तत्रसर्वसत्वेन्द्रियार्थज्ञ इति। सर्वसत्वानामिन्द्रियो
णिमृदुमध्याधिमात्राणि तेषामर्थं सर्वसत्वेन्द्रिया
र्थं जानातीति सर्वसत्वेन्द्रियार्थज्ञः सत्वभगवान्
सर्वसत्वमनोहर इति। सर्वसत्वानां मनांसि चित्तानि यथा
भव्यतया धर्मदेशनास्वरेन हरतीति सतथा। पञ्चस्कंध
र्थतत्वज्ञ इति। तत्रपञ्चस्कंधा रूपवेदना संज्ञा संस्का
रविज्ञानलक्षणाः। तत्ररूपस्कन्धश्चक्षुश्रोत्रघ्राण
जिह्वाकायरूपशब्दगंधरसस्पर्शविज्ञप्तिलक्षणः। वे
दनास्कंधः सातासातोभयस्वभावः। संज्ञास्कन्धोवि ष
यनिमित्तोग्रहणात्मकः। संस्कारस्कंधः सचित्तसंप्र
युक्तविप्रयुक्तरूपः। अष्टौविज्ञानकायो विज्ञानस्क
न्धइति॥ एतेपञ्चस्कन्धा सेषामर्थः पञ्चस्कन्धार्थः
पंचरूपार्थं तस्यतत्वविवेकार्थावबोधः। तत्रपञ्च
स्कन्धार्थतत्वं एकत्वादि यात्मनि वृत्तिलक्षणं। तत्र

निर्हेतिनैरात्म्यं तस्मा चात्मपरिग्रहेनिर्वाणाच्चाभिरिति
॥ तदेवभूतं पञ्चस्कन्धार्थतत्त्वं जानातीति पञ्चस्कंधा
र्थतत्त्वज्ञः सर्वज्ञभगवान्। तथाचोक्तमाचार्यवसु
बन्धुपादैः॥ धर्माणांप्रतिविषयमन्तरेणा नास्ति
क्लेशानांयतश्चपञ्चानामेषुपाय इत्येवमादि। प
ञ्चस्कंधविशुद्धगिति। पञ्चस्कन्धाश्चपञ्चस्कंध
विशुद्धाः शीलसमाधिप्रज्ञाविमुक्तिविमुक्तिज्ञान
दर्शनलक्षणाः तांधारयतीति पञ्चस्कन्धविशुद्ध
धृक्॥ सर्वज्ञभगवान्॥ १२॥

सर्वनिर्याणकोटिष्ठः सर्वनिर्याणकोविदः।
सर्वनिर्याणमार्गस्थः सर्वनिर्याणदेशकः॥
॥ १३॥

तत्रसर्वनिर्याणकोटिस्थ इति। यानिकानिचि
त्लोकिकनिर्वाणानि तेषांकोटिनिष्ठा तत्रति
ष्ठतीति सर्वनिर्याणकोटिस्थः। सर्वनिर्याणको
विद इति। श्रावकानां निर्वाणकोविदानिपुनः
सर्वनिर्याणकोविदः। सर्वनिर्याणमार्गस्थ
इति। प्रत्येकबुद्धानां निर्वाणमार्गेस्थितः। स

वैनियोगमार्गस्थितः। सर्वनिर्याणादेशकइति। सम्यक्सं
बुद्धनांतिर्वाण सर्वनिर्याणां तस्यदेशकः प्रकाशकः
खल्वभगवान्॥ १३॥

द्वादशांगप्रवोत्तवातो द्वादशांकास्त्रबंधकः।
चतुःसत्यनयाकारो अज्ञानावरोधबंधकः॥१४॥

तत्रद्वादशांगप्रवोत्तवातइति। द्वादशांगानि। तद्यथाअ
विद्यासंस्कारविज्ञाननामरूपषडायतनस्पर्शवेद
नातृष्णाउपादानभवजातिजरामरणानि। तत्व
छादनाविद्यायथाभिदर्शननिवंधनात्। रोपनात्सं
स्कारेविज्ञाने कर्मवासनायाःप्रतिस्थापनात्। नय
नाद्विज्ञानेनोत्पत्तिस्थानप्रापणात्। संपरिग्रहात्।
नामरूपेनामभोक्तृपूरणात् षडायतनगृहि
परिछेदात्। स्पर्शेनउपभोगात्। वेदनयाकर्म
फलचेतनायाकर्माक्षिप्तस्योनर्भवस्यनिवन्धना
दुपादानेविज्ञानस्योपपत्तावकुलेषुकामाधिष्ठ
आभिमुखात्॥ भावेनकृतस्यकर्म्मणाउनर्भवे
विपाकदानायाभिमुख्यकरणात्॥ उःखकर
णाच्च आत्माजरामरणेनचनदेभिर्द्वादशाङ्गैः

प्रतिलोमनिर्भेदः। पंचोपादानलक्षणाः उत्खात उन्मूलितोयेनसद्भादग्राह्यभोक्तृतउच्यते। तथा चोक्तं मध्यान्तविभागे। छादनाद्भोपनाच्चैव नयनात्प्रेरणात्। पूरणाच्चिपरिक्षेपात्पञ्चोपभोगाच्चकर्मणात्। निबंधनादभिलक्ष्या दुःखनात्किञ्चपतेज गत्। द्वादशाकारणि द्वादशायतनानि। तानिचभूतानि ग्राह्यग्राहकाकारविविक्तत्वात्। नांधारयतीतिद्वादशाकारअद्वयक। चतुः सत्यनयाकारइति। दुःखसमुदयनिरोधमार्गरियानि चत्वार्यार्यसत्यानि। तेषांचतुः सत्यानांनयोमार्गः सएवाकार आकृतियस्यसचतुः सत्योनयाकारोभगवान्। अद्वयज्ञानावबोधइगिति। तत्राहोज्ञानानि। यदुतधर्मज्ञानमन्वयज्ञानंदुःखज्ञानं समुदयज्ञानं निरोधज्ञानं मार्गज्ञानं क्षयज्ञानंअनुत्पादज्ञानमिति॥ तेषामवबोधः साक्षात्कररणात् नंधारयतीतिअद्वयज्ञानावबोधइम्। सर्वधर्मज्ञानमञ्जुश्रीः॥ १४॥

द्वादशाकारसत्यार्थः षोडशाकारतत्ववित्।
विंशत्याकारसम्बोधिर्द्विकृतः सर्वविस्तरः॥ १५॥

नत्रशदशाकारसत्यार्थ इति। सत्यानामर्थः सत्यार्थः तं
शदशाकारैः प्रविभक्तत्रिपरिवर्त्तशदशाकारधर्म
चक्रं। यदुत। अनित्यतोऽदुःखतः शून्यतोऽनि
त्यदुःखसत्यस्य हेतुतः समुदयतः प्रभवत इति समु
दयसत्यस्य। निरोधतः शान्ततः प्रणीततः इति नि
रोधसत्यस्य॥ मार्गतोन्यायतः प्रतिपत्तिरिति मार्ग
सत्यस्य। तदेवं भूतं तथा। भव्यतया शदशाका
रसत्यार्थः धर्मचक्रप्रवर्त्तनादसौभगवान् शद
शाकारसत्यार्थ इत्युच्यते। षोडशाकारत्वविधि
रिति। नत्रकामावचरदुःखसत्यं। अनित्यतोदुःख
तः शून्यतोऽनात्मतश्च। मनसिकुर्वतः दुःखेन
धर्मक्षान्ति धर्मज्ञानंचोत्पद्यते। ताभ्यां दशाप्ये
ते कामावचराः क्लेशाः प्रहीयन्ते। रूपारूप्यावचरदुःख
सत्यं तथैवमनसिकुर्वतः दुःखे अन्वयज्ञानक्षान्तिर
न्वयज्ञानं चोत्पद्यते॥ ताभ्यां तेएव प्रतिसंवर्जिता न
रूपावचरानवचोरूपावचरा इत्यस्मादशप्रहीय
न्ते इत्येवं त्रैधातुकदुःखसत्याभिसमये नचतुसत्य
र्मान्वयक्षान्तिलक्षणे रक्षाविंशति रत्नशयादुःखद

शैनाप्रहीयन्ते । एवमेव दर्शनमनुशयानांसत्कायदृष्टिम
न्यारुढग्राहशीलव्रतपरामर्शमुक्तानन्ते सप्तानुशयाः ॥ ष
ण्णामधातोःकामावचरैःसमुदयसत्यदर्शनतः समुदयतःप्रभव
तःप्रत्ययतश्च मनसिकुर्वतः ॥ तस्यैवसमुदये धर्मज्ञा
नक्षान्तिज्ञानाभ्यांप्रहीयन्ते ॥ तत एवप्रतिघसंयोजनवर्जितधा
तुद्वयेदशानुशयारूपारूप्यावचरैः समुदयसत्यद
र्शनात् । समुदये चयज्ञानक्षान्तिज्ञानाभ्यांप्रहीयन्तइत्ये
कोनविंशतिरनुशयाः समुदयसत्यदर्शनात्प्रहीयन्ते
॥ तथाकामावचरैर्दुःखनिरोधसत्यंनिरोधज्ञानप्रीत
निःसरणाकारैश्चतुर्भिर्मनसिकुर्वतः ॥ समुदयाक्षा
न्तिरेवानुशयानिरोधधर्मक्षान्तिज्ञानाभ्यांप्रहीयन्ते ॥ तथा
कामावचरैर्दुःखनिरोधगामिमार्गसत्यं मार्गन्यायप्रतिपत्ते
र्यानिकाकारैश्चतुर्भिर्मनसिकुर्वतः ॥ मार्गधर्मक्षान्तिज्ञानाभ्यां
पूर्वोक्तमेवसप्तानुशीलव्रतपरामर्शमधिकृत्यावशिष्टा
न्याशेमार्गसत्यदर्शनप्रहीयन्ते । मार्गन्वयक्षान्तिज्ञानाभ्यां
रूपारूप्यावचरा श्चतुर्दशमार्गदर्शनप्रहातव्या ॥ इत्येवं
द्वादशानुशयामार्गदर्शनप्रहेया इत्येवं षोडशभि
राकारैरनुशयसत्यमभिसंबोधयन्तः सेधानुरूपे

शाभावादविपरीतपदार्थावबोधाच्चतत्त्वमुत्पद्यते। तदे
त्रि जानातीति बोद्धृ आकारतत्त्ववित्॥ सएव भगवान् वि
शत्याकारसम्बोधिरिति। एवं लक्षणानां विंशत्याकारत्व
वेक्षणाकारैः सम्यक्सम्बोधिः साक्षात्कर्तव्या॥ यदुत रू
पमात्मा रूपे आत्मा आत्मनि रूपं रूपवान्नात्मा वेदना
आत्मा वेदनायामात्मा आत्मनि वेदना वेदनावान्नात्मा
॥ संज्ञात्मा संज्ञायामात्मा आत्मनि संज्ञा संज्ञावान्नात्मा॥
संस्कारात्मा संस्कारेष्वात्मा आत्मनि संस्कारा संस्कारवा
न्नात्मा॥ विज्ञानात्मा विज्ञानेआत्मा आत्मनि विज्ञानं वि
ज्ञानवान्नात्मा॥ एवंप्रकारैर्विंशत्याकारैः सम्बोधिनि
र्विकल्पज्ञानमधिगतं येनासौ विंशत्याकारसम्बोधिरि
त्युच्यते॥ तथाचोक्तं नागार्जुनपादैः॥ सन्धान्नैव सर्वेषु
नस्यात्मालभ्यते क्वचित्। युक्तविचार्यमाणोसौ तीर्थिकै
यः प्रकल्पितः॥ संधासन्निनित्यासे नचतत्त्वं परमात्मनः।
आधाराधेयभावोपि नित्यानित्ययोः क्वचिन्न इति॥ विबु
द्ध सर्वधर्मेष्वर इति। विपूर्वं मधिगमार्थः॥ ७५॥

अमेयबुद्धनिर्माणः कायकोटिविभावकः।
सर्वक्षणाभिसमयः सर्वचित्तक्षणार्थवित्॥ ७६॥

तज्ञमेयबुद्धनिर्माणा इति। अमेयानांबुद्धानां निर्माणानिअ
मेयबुद्धनिर्माणानि। तेषांकायः संघातः अमेयबुद्धनिर्मा
णकायः तस्यकोटिपर्य्यन्तता यथायथाविनयसत्वप
रिपाकवशादमेयबुद्धनिर्माणकायकोटिविभावयेति। स्फा
रयेति। सएवभगवान्। अमेयबुद्धनिर्माणकायकोटि
विभावक इत्युच्यते॥ सर्वक्षणाभिसमय इति। सर्वेचते
क्षणाश्च सर्वक्षणाः षोऽशात्मकाः। तेषुज्ञानं श्रेष्ठाप
न्नस्याभिसमय उच्यते। सएवभगवान्। तथाचोक्तम
भिधर्मे। आवुपूर्ववनार्योसं इत्यू ग्रवोऽशालक्षरो।
श्रोतआपन्नाऽसुको यत्रहाणं फलंनुतादिति॥ सर्वचि
त्तक्षणार्थविदिति। सर्वसत्वानांचित्तक्षणाः सर्वेचित्तक्ष
णास्तस्यार्थस्तंवेत्तीति सर्वचित्तक्षणार्थविदितिस
एवभगवान्॥ १६॥

नानायाननयोपायोजगदर्थविभावकः।
यानत्रितयनिर्यातएकयानफलस्थितः॥ ७॥

तत्रनानायानेत्यादि। नानाभूतानि यानानि नानाया
नानि आवकादीनि तेषां नयोमार्गः तस्योपायाया
नानायाननयोपायाया अतस्तेर्नानायाननयोपायै

१ प्रतिपत्ति सिद्धिर्नास्ति न दृश्यते

र्जगतामर्थसंविभावयतीति नानायाननयोपायजगदर्थ
विभावकः॥ यानत्रितयनिर्यातइति। यानत्रितयेभ्योनि
र्यातो यानत्रितयनिर्यातः। विनेयवशात्। परमार्थतस्तु
। एकयानफलेस्थित इति। एकमेवयानं एकयानं
तत्फलमनुत्तरासम्यक्सम्बोधिलक्षणा तस्मिंस्थितो
ती एकयानफलेस्थितः॥ तथाहि एकमेवयानंयदु
त महायानमिति॥ तथाचोक्तं कम्बलाचार्यैः। को नाम
उत्सृजगद्व्यनाथमनार्थयानेहिचालभेत। मायाहि
शोभेप्रमदाभिलाषी प्रकाशच शोभरदेशकामीति॥

७॥

क्लेशधातुविशुद्धात्मा कर्मधातुक्षयंकरः।
ओघोदधिसमुत्तीर्णोयोगकान्तारनिष्ठितः॥९८॥

तत्रक्लेशधातुविशुद्धात्मेति। क्लेशात्मका धातवः क्लेश
धातवोरागादयः॥ ततस्तैर्विशुद्धआत्मा स्वभावो यस्या
सौ क्लेशधातुविशुद्धात्मा। कर्मधातुक्षयंकरइति। क
र्मणां शुभादीनां धातवः कर्मधातवः कामरूपा रू
पारूपाः। तेषांक्षयंकरोतीति क्षयंकरविनाश
करइत्यर्थः॥ तत्संवर्त्तनीयकर्मकरणात्। ओघो

धिसमुद्रोर्ण इति। ओघा इति चत्वार ओघाः कामो
घा भवोघा दृष्टोघा विद्याश्रेति॥ तत्रात्मदृष्टिभ्यः का
माश्रवाः एव कामोघाः। एकोनत्रिंशद्व्यानि॥ भ
वाश्रवा एव भवोघा अष्टाविंशतिद्व्यानि॥ त्रैधात्म
को दृष्टोदृष्टोघः। षड्विंशद्व्यानि॥ अविद्याश्रया
एव विद्योघः॥ पञ्चदशद्व्याणि॥ तस्योदययो
वहुत्वात् तेभ्यः ओघोदधिभ्यः सम्पूर्त्तीर्णोयः स
तथोक्तः। सर्वक्लेशोपक्लेशापगत्वात् योगकान्तारनि
श्रित इति। ज्ञानमात्रसमापत्तियोग इत्यभिधीयते
सर्वकान्तारदुरवबोधत्वात्। दुरक्षत्वाच्च। तस्मा
त्रिभूमो निर्गतः॥ अशेषलोकिकलोकोत्तरयोगा
न्वा पर्य्यन्तगमनात् योगकान्तारनिः श्रितः सर्वभ
गवान्॥ ७८॥

क्लेशोपक्लेशसंक्लेशा सुप्रहीनसवासनः।
प्रज्ञोपायमहाकरुणा अमोघजगदर्थकृत्॥ ७९॥
तत्रक्लेशोपक्लेशोत्यादि॥ क्लेशारागादयः षट् उपक्लेशा
क्रोधाश्चत्वारिंशति. संक्लेशाः सप्तदशद्व्याणि तदेतैक्ले

शोपक्लेश संक्लेशा धर्माः सुप्रहीना सवासना यस्यासौ
क्लेशोपक्लेशसंक्लेशसुप्रहीनसवासनउच्यते। अ
थवाक्लेश इत्यविद्यातृष्णोपादानि। उपक्लेशइति
संस्कारभवौ शेषाणिपूर्ववत्। प्रज्ञोपायमहाकरु
णाइति प्रज्ञाचोपायश्च प्रज्ञोपायौ महतीचासौक
रुणाच महाकरुणा। प्रज्ञोपायावेवका महाकरुणा
यस्यसप्रज्ञोपायमहाकरुणा। सएवभगवान्। अ
मोघजगदर्थ इति। अमोघोवशाः सचासौजगद्
र्थश्चामोघजगदर्थ संकरोतीति अमोघजगदर्थ
इति॥ १९॥

सर्वसंज्ञाप्रहीनार्थोविज्ञानार्थोनिरोधकः।
सर्वसत्वमनोविषयः सर्वबुद्धमनोगतिः॥ २०॥

तत्रसर्वसंज्ञाप्रहीनार्थ इति। असंज्ञिसमापत्तौ संज्ञि
कंचनिरोधसमापत्तिश्चरूपधातौ आरूप्यधातौच
प्रथमोपपत्तिस्थानमाकाशानन्त्यायतनं। तदेवंत्रि
प्रकारमपि सर्वसंज्ञाशब्देनोच्यते। ताभिस्त्रिभिः
संज्ञाभिः प्रहीनश्चित्तंचतासिकार्थोयस्यासौ सर्वसं
ज्ञाप्रहीनार्थः सएवभगवान् विज्ञानार्थइति। विज्ञा

न मेवार्थो विज्ञानार्थः। आरुम्भधातावेव। द्वितीयमुपपत्ति स्थानं। विज्ञानमेवायतनं। नमेवालम्बनत्वात् नमेवा र्थो मस्सविज्ञानार्थः। सर्वभगवान्। निरोधधर्मीति अत्रैवचतुर्थमुपपत्तिस्थानं निरोधसमापत्ति र्निरो धउच्यते। तद्धारयतीति निरोधधरः॥ सर्वभगवान्॥ सर्वसत्वमनोविषय इति। सर्वेसत्वा नांमन इति स्सर्वमनः॥ सर्वसत्वमनस्सु देवविषयोगो चोयस्यअविद्यमानसर्वसत्वमनोविषयस्सर्वभगवान्॥ सर्वबुद्धमनोगतीरिति। सर्वबुद्धानांअबुद्धत्वेनांमन अवि ऊर्ध्वमधातुज्ञानं तस्यगतिः सर्वबुद्धमनोगतिः। तथाचोक्तं। संक्लिष्टाचाविशुद्धाच समनानिर्मलाच सा। अधातुकनकाका रुपद्विवक्तुद्विरिष्यते॥ २०॥

सर्वसत्वमनोन्नस्य स्सच्छिन्न समनांगतः॥
सर्वसत्वमनोह्रादीसर्वसत्वमनोरतिः॥ २१॥

सर्वसत्वमनोन्नस्य इति। सर्वसत्वानांमनः छिन्नं तस्या नमंऽतिष्ठतीति सर्वसत्व मनोन्नस्य स्सर्वभगवान्। अतएव तच्छिन्न समनांगत इति। नेषांसत्वानां छिन्नंत छिन्नं तस्य समनता तथात्व भूत्येतिया वत्॥ तथागो

क्रमश्चसाहस्यं ॥ पथक्जनतथतायाश्रावकतथतायाः प्रत्येकबुद्धतथतायाः सम्यक्संबुद्धतथतायाश्चैकैवैषातथतेति ॥ एकयानांतथतां सर्वचित्तसंतानगतःप्राप्तः सतथागतश्च ॥ सर्वसत्वमनोहरीतत्रैवचेतसिविपर्यासबाहत्यतयामहत्सुखज्ञानस्योदयात् सर्वसत्वमनोहरीभण्यते ॥ अतस्त्वसर्वसत्वमनोरतिरिति । सर्वसत्वानांमनस्किंचनः । सर्वसत्वमनस्तदेवविकल्पोगोचरोऽस्यससर्वसत्वमनोविषयः सर्वसत्वमनोरतिः सर्वनयागतंचवीर्यंवंसर्वत्वंनकृत्याध्यवसायसर्वास्थिरत्वलप्रयत्नमनाकुलमित्यनभिसंस्कारस्यानेनाध्यवसायेनदर्शनेः ॥ २१ ॥

सिद्धान्तविभ्रमोपगतः सर्वभ्रान्तिविवर्जितः ।
निःसंदिग्धमतिस्त्वर्थः सर्वार्थद्विगुणात्मकः ॥ २२ ॥

तत्रसिद्धान्तविभ्रमोपगत इति । सिद्धान्तारब्धान्तेऽतिविभ्रमोनिश्चितमतिः । सोऽपगतोयस्यसिद्धान्तविभ्रमोपगतः ॥ अतएवसर्वभ्रान्तिविवर्जितः ॥ यथावस्थितसमयपरिज्ञानात् । ततश्चनिःसंदिग्धमतिरिति । निःसंदिग्धमतिर्यस्मात्सो निस्संदिग्धमतिः । सर्वलौकिकलो

केनान्तरसिद्धान परिज्ञानात्। अर्थ इति अतीतानागतवर्त्त
मानार्थत्वात्। सर्वार्थ इति। स्थिरचलपदार्थस्वभावत्वात्।
त्रिगुणात्मक इति। सत्वरजस्तमोद्रव्यत्वात् तथाचोक्तं॥
सर्वेऽपि सत्वरजस्तमोवपि सत्वार्थाऽवतेयतः। समत्वभङ्गे
नाहं वोधिचर्यायथावत्गेति॥ २२॥

पञ्चस्कन्धार्थत्रिकालः सर्वक्षणविभावकः।
एकक्षणाभिसंबुद्ध सर्वज्ञत्वभावद्धकः॥ २३॥

तत्र पञ्चस्कन्धार्थत्रिकाल इति। पञ्चस्कन्धानांअर्थ
त्रिकालपर्यायात्मकत्वात् पञ्चस्कन्धार्थत्रिकालः।
तथाचोक्तमभिधर्मे। नैपुनःसंस्कृता धर्मा रूपादिस्कंध
पञ्चका। नश्वार्थाकथावस्तु सनिरासाः सवस्तुकाः॥
ये साश्रवाऽपादानस्कंधासत्रुरणाअपि॥ दुःखसमु
दयोलोकोहिस्थानंभवश्चत इति। सर्वक्षणविभा
वकइति। हेत्ववस्थायां सर्वकुशलभूतेषु दानपारमि
तादिषु वा अनवरतकुशलधर्मा पार्जनतया श्रुतचिं
तनाभावनामप्राप्तया सर्वधर्माधिगमात्। सर्वक्षरा
विभावक इत्युच्यते॥ फलावस्थायांतु एकक्षणा
भिसंबुद्ध इति। एकश्चासौक्षणश्च एकक्षणः। ए

कस्मिन्नेवक्षणे क्षयानुत्पादज्ञानं समन्तभद्राभिधान
साक्षात्कृतेयेनसावेकक्षणाभिसंबुद्धः। सर्वबुद्धस्वभा
वधर्मिति। सर्वबुद्ध ..... अयमेवस्वभा
वो यदुतैकक्षणाभिसंबोधनाम तंधारयतीति सर्वबुद्ध
स्वभावधर्क। तथाचोक्तं। संभारधर्मकायाभ्यांज्ञान
श्चार्थचर्य्ययो। समतासर्वबुद्धानां नायूनातिप्रसाद
इति॥ आदिः॥ २३॥

अनङ्गकायः कायाग्रः कायकोटिविभावकः।
अशेषरूपसंदर्शी रत्नकेतुर्महामणिः॥ २४॥

समताज्ञानगाथा चतुर्विंशतिः॥

तत्रानंगकाय इति। नांगोऽनङ्गः नविद्यमानांगः का
यो यस्य सोऽनंगकायः। धर्मधातुस्वभावत्वात्। तत
एवकायाग्र इति। कायानां सांभोगिकानां सर्वेषां अग्रःश्रे
ष्ठ इत्यर्थः। कायकोटिविभावक इति। कायानामलक्षा
णांकोट्यः कायकोटयः। असंख्य कायानाविभाव
यति स्फारयति इति कायकोटिविभावकः। अत
एवाशेषरूपसंदर्शी। अशेषोनिरवशेषोमणिरूपा
णि विनेयानां सम्यक्प्रदर्शयितुं शीलं यस्यासावशे

वरूपसंदर्शी॥ सएवभगवान्॥ रत्नकेतुरिति॥ सर्वजनरंज
नार्थेनरत्नैरत्नाकिलेकेतुः सएवमुद्धानद्वारकोपिभग
वान्॥ दानपारमितयासर्वाशापरिपूरणात्॥ सर्वतथाग
तानांरत्नपारमितायांनियोजनाच्चरत्नकेतुमंजुश्रीः॥
इदानींरत्नसंभवस्वभावनास्यासौभगवानिति॥ संदर्शीपसंहर
व्याह॥ महारत्नगिरिरिति॥ सर्वतथागतानन्तनयात्॥ एतदुक्तंभवति
॥जनन्ततथागतमहारत्नप्रभावत्वात्॥ समताज्ञानस्य॥ तेनहि
सर्वतथागतानांअभिसंबुद्धानांसमुद्रयंत्रैधातुकधर्मराज्या
भिषेकोदीयतेयतस्मान्महारत्नगिरित्युच्यते॥ भगवान्मंजुश्रीः॥
अथेदानींआकाशगर्भसमाधिस्थोभगवान्मंजुश्रीर्दश
दिगनन्तापर्यन्तानिबुद्धक्षेत्राणिगत्वामात्कर्योपहतान्स
त्वधातून्स्वविमोक्षमुखेनसंशोध्यानिचतुरशीतानि
नामसंघाक्षरपदानितानिपंचधाप्रविभज्यशास्त्रतानि
कुलभेदेनएकैकस्मिन्कुलेपंचविंशतिर्नामान्यनुवि
धाय॥ तेश्चबुद्धक्षेत्रंकृत्वापुनरागत्यवज्रधातुमहाम
ण्डलस्यबहिश्चतुर्थेचक्रेस्ववर्णोपरंजितान्यक्षराणि
भूत्वायथापरिपाट्योवस्थितानि॥ ततश्चपूर्वोक्तंत्रैधा
तुकंस्वमात्मानमवलंब्यमंत्रमुखचर्याचारिकुलपुत्री

वाकुल दुहिता वा आर्यनाम संगीतिं पठन् पूर्वोक्तान्येव गुणा
नाप्नोतीत्याम्नायः॥ आर्य[illegible]नाम संगीतिरीकायानाम आर्थो
वलोकितो समताज्ञानस्वभावेन स्वत्यधिकारो नवमः॥
गाथा चतुर्विंशतिः॥ २४
नाममंत्रा क्षराणि चतुरुत्तरशतं चेति॥ अंकतोपि॥१०४
सर्वसंबुद्धबोधयो बुद्धबोधि रनुत्तरः॥
अनक्षरो मन्त्रयोनि र्महामंत्र कुलत्रयः॥ २४॥
तत्र सर्वसंबुद्धबोधयश्चेति॥ यैश्च वर्णैः सर्वसंबुद्धै
र्बोधयो ज्ञातव्याः साक्षात्कर्तव्याः॥ स एव भगवानिति॥
सर्वसंबुद्धबोधयः॥ तथा चोक्तं श्रीतत्वसंग्रहे॥ त्वद्
पिनाभिसंबोधिः पितात्वं सर्वदर्शिनां॥ संभूतांसंभ
विष्यन्ति त्वामासाद्य तथागता इति॥ बुद्धबोधिरिति॥
त्रयाणां श्रावकादि बुद्धानां बोधिः बुद्धबोधिः॥ तथाहि॥
निस्रो बोधयोयदुत बोधिः प्रत्येकबुद्धबोधिः सम्यक्सं
बुद्धबोधिश्चेति प्रकारोपि स एव भगवान्॥ अनुत्तरइति
॥ अतएव नविद्यते उत्तरमस्मादित्यनुत्तर अनक्षरइति
नविद्यते अक्षराणि वाच्यवाचकलक्षणानि॥ यस्मि
न्नासावनक्षरः॥ धर्मधातुस्वभावत्वात्॥ मंत्रयोनिरि

ति। लोकिकाशीर्वादमंत्राणामुत्पत्तिस्थानत्वात्। मंत्रयोनिरित्यार
णं। महामंत्रकुलत्रय इति। महांश्चासौ महामंत्रश्चेति महामंत्र
कुलानां शाश्वतानां भोगमितामाभांत्रयं कुलं कुलत्रयः। म
हामंत्रकुलत्रयं यस्य स महामंत्रकुलत्रयः। कायवाक्
चित्तस्थाकाशत्वात्। तथा चोक्तं श्रीसमाजतंत्रे। अथ
ते महायोगिनस्तत्वाः सर्वतथागतकायवाक्चित्तमाकाशम
रेणानिर्याप्य दशदानमुदानयामासुरिति॥ १॥

सर्वमंत्रार्थजनको महाविन्दुरनक्षरः।
पञ्चाक्षरो महाशून्योविन्दुशून्यः षडक्षरः॥ २॥

नवसर्वमंत्रार्थजनक इति। लोकिकलोकोत्तराणां सर्वमं
त्राणामर्थसत्यजनकत्वात्कोभगवान्। सत्यम
हाविन्दुरिति। अकारादिहकारांताः स्वरव्यंजनमहावि
न्दुरित्युच्यते। सत्यभगवानेव अनक्षर इति। परमार्थस
त्यत्वात्। पञ्चाक्षर इति। शाश्वतादानंत्र॥ आः ॐ
ह्रीं अः। इतिअक्षरात्मकत्वात्। पञ्चाक्षर इत्युच्यते। म
हाशून्य इति। सोऽयमाकारशून्यतास्वभावत्वात्। विन्दु
शून्य इति। विन्दुबीजाक्षरं। तस्यापि परमार्थतो मुप
लब्धिस्वभावत्वात्। षडक्षर इति। ॐ वागीश्वरि हूं ॐ ह्रीं आः

ति मेऽक्षरात्मकत्वात्॥ २॥

सर्वाकारनिराकारः सोऽयमार्हन्त्यविद्योधकः।
अकलोऽकलनातीत श्चतुर्थ ध्यानबोधकः॥३॥

तत्रसर्वाकारेति। सर्वाकारध्यानत् सन्नाहपुरुषलक्षणादयो धर्मा सैः सर्वाकारैर्निर्गतो रहितः। आकारो अवयवो यस्यासौ सनथोक्तः सन्तथोक्तमार्यशान्तिरूपां। तत्किंमन्यसेऽभूते लक्षणासम्पत्तेस्तथागतोऽस्य इति। सभूतिराह। नोहीदंभगवन् अलक्षणासंपत्तेस्तथागतोऽस्य इति। तत्कस्महेतोर्योसौ लक्षणासम्पत्तथागतेनभाषितासैवालक्षणासम्पत्। एवमुक्ते भगवानायुष्मन्तंसुभूतिमेतदवोचत्। यावत्सुभूतेलक्षणासम्पत्तावन्मृषा यावदलक्षणासंपत्तावत्सत्या इतिहि लक्षणालक्षणात्तथागतोऽस्य इति। तत्सर्वज्ञत्वे परमार्थस्वभावत्वात्॥ ॥सोऽयमार्हन्त्यविद्योधकः। अकलः कलनातीत श्चतुर्थध्यानबोधकः इति। अत्रषोडशगाथा। महायानसूत्रालंकारोऽस्मदुरुदत्तनात्। तथाह्यस्मदुरुभिर्यथावदहमभिहितः। मंत्रमुखचर्यचारिणां सर्वधर्म

प्रतिषेधिकया श्रद्धया समत्वागतानांस्वशिष्याणांचि
त्तराधनामाशयविशेषान्मायाजालाभिसम्बोधिक्रम
स्योत्तरोत्तरः कर्मपरंपरयोः प्रकाशयितव्यइति
॥अतस्तदज्ञालं घनभयादस्मांटीकायांविवंचि
तः॥ ३॥

सर्वध्यानकलाभिज्ञः समाधिकुलगोचरकः।
समाधिकायकायाग्रः सर्वसम्भोगकायवाक्॥ ४॥

तत्र सर्वध्यानकलाभिज्ञेति। वितर्कविचारप्रीतिसु
खास्मितानन्दसंज्ञानि तत्र सवितर्कं सविचारं विवेकजप्रीति
सुखं प्रथमध्यानं। वितर्कविचारवर्जितं द्वितीयंप्री
तिवर्जितमुपेकास्मृतिसंप्रजन्ययोगीस्तृतीयं। अ
दुःखासुखमुपेकास्मृतिपरिशुद्धं चतुर्थमिति। तदे
वंचतुर्णामानेञ्जांकलासर्वध्यानकलाअंशाः॥ तत्रा
भिज्ञःकुशलः तंध्यानं प्रतिभज्य संयोजनात्। तदधि
ष्ठितिकानांसत्वानामवजनार्थं॥ तथाचोक्तंबोधिस
त्वैः॥ प्रथमंहिध्यानेनाभिमुखीकुर्वन्तिनचतद्रशे
षायपर्यवस्यन्ति॥ सत्वार्थंविरहितातेनाचवश्यन्ति॥
नचदीर्घेषुक्लेशेषुदेवेषूपपद्यन्तइति॥ तेषामुपरि

वज्रिलाभात्॥ समाधिकुलगात्र धृतिति॥ समाध
यइति॥ तेन परसुभैक्षयतापभावितत्वात्॥ प्रथमादि
ध्यानत्रयाणां यथालब्धमार्गोत्तरोत्तरपरिमित्रभेदा॥
अतएवंकलगात्रंसमाधिकलगात्रोनियतं आरब्धादि। तस्मा
दयमीदृसमाधिकलमात्रदृक्॥ समाधिकायकायइति
समाधिकायो धर्मकायः। अतएवसर्वकायानांनिर्माणा
दीनां अग्रे श्रेष्ठत्वात्समाधिः कायकायः सर्वभग
वान्। सर्वसंभोगकायइति। सर्वसंभोगकायोभूत्वा
भगवान्मुक्तश्रीः सर्वपर्वतमध्येमहतीमालोविभूतिंसु
कृतशातफलां विचित्रामचिन्त्यांलोकानांच सर्वबोधिस
त्वानांप्रीतिहेतोःप्रकाशयति। ततश्चैतेनैवदर्शनाक्षेपेण
जनेदीप्यतइति। सर्वसंभोगकायइति। तत्रलोकां
तीतमचिन्त्यसुकृतशातफलामात्मनोयोविभूतिंपर्वतमध्येवि
चित्रांप्रथयतिमहतीधीमतांप्रीतिहेतोः। ओंनमः सर्वलोक
प्रभूतप्रभिलोपारंभकर्मघोषंवन्देसंभोगकायंतमह
मिहमहाधर्मराज्यप्रतिष्ठमिति॥ ४॥

निर्माणकायकायइति। ओंनमोनिर्माणवंशादृक्।

दशदिग्विश्वनिर्माणोयथावज्जगदर्थकृत्॥ ५॥

तत्रनिर्माणकायकायाश्रयति। निर्माणात्मकः कायो निर्माणकायः सचान्येषांलोकिकनिर्माणमध्येश्रेष्ठत्वादग्र्य इत्युच्यते॥ तथाचोक्तंगा सत्त्वानांशाकहेतोः क्वचिदनल्पबा भाजियोदीप्यमानं संबोधेधर्मचक्रे क्वचिदपिच पुनः दृश्यतेयत्प्रशान्तं नैकाकारंब्रह्मनं त्रिभवभयरं विश्वत्रयैकनाथे वन्देनिर्माणकार्यं दशादिगतगतं नमस्कार्यं मुनीनामिति। उक्तंनिर्माणवंशधीगति। अथवानिर्माणं उक्तानां निर्माणमेव। उक्तनिर्माणानि तेषां वंशोऽन्वयो उक्तनिर्माणवंश स्तंधारयतीति उक्तनिर्माणवंशधरः॥ सर्वतथागतवंशानुपच्छेदत्वात्। दशदिग्विश्वनिर्माणाइति। दशसुदिक्षुविश्वानिनानाप्रकाराणिनिर्माणानियस्यासौ दशदिग्विश्वनिर्माणः॥ यथावज्जगदर्थकृदिति। अतएवयथादित्यविपरीतधर्मदेशनासुखेनजगदर्थं करोतीति यथावज्जगदर्थकृत्॥ ५॥

देवातिदेवोदेवेन्द्रोऽसुरेन्द्रोदानवाधिपः।
अमरेन्द्रःसहस्रेन्द्रःप्रमथःप्रमथेश्वरः॥ ६॥

तत्रदेवातिदेवेति। प्रशस्यत्वात्। देवेन्द्रइति विश्व

स्वभावत्वात् । असुरेन्द्र इति वैरोचनबलिरूपत्वात् ।
दानवाधिप इति राहुस्वभावत्वात् । असुरेन्द्र इति प
रंदररूपत्वात् । सुरगुरु इति बृहस्पतिस्वभावत्वात्
प्रमथ इति गन[illegible] स्वभावत्वात् । प्रमथेश्व
रेति । त्र्यम्बकस्वभावत्वात् ॥ देवातिदेवेत्यादिभिस्त
एवभगवान् अभिधीयते ॥ ६ ॥

उत्तीर्णोभवकान्तार एकशास्ताजगद्गुरुः ।
प्रख्यातदशदिग्लोको धर्मदानपतिर्महान् ॥ ७ ॥

तत्रउत्तीर्णेति । भवसंसार एव कान्तारं अन
र्थत्वात् । भवकान्तारः । उत्तीर्णभवकान्तार येन
स उत्तीर्णभवकान्तारः । एकइत्यद्वितीयस्यस
दृशोऽभावात् । अतएव शास्तेति । शास्त्यायत्सर्वस
त्त्वानांकृत्यं करोतीति तद्दर्शयतिच । तत्रशास्तासर्व
सत्त्वानामित्यविशेषयात्सएव भगवान्बुद्धः ॥ स
र्वसत्त्वानांकृत्यं तद्शास्तत्वेन करोति । यथाहीतिनि
वारणी । नित्यानां समुच्छेदनत्वात् । सर्वकर्मावर
णानां समुच्छेदनी सर्वकर्मावरणसमुच्छेदनी
सर्वाकार[illegible] पो समुत्पादस्थानत्वादनकरी । सर्वा

क्षणाइति। क्षणाच्च कालः। अवसन्नस्त्यर्थान्तरं। अभि
समयइत्यनवकाशान्। अक्षणोत्युच्यते निरयो यतः॥
नरकोपपत्तिः तिर्यग्योनोपपत्तिः प्रेतोपपत्तिः। उत्पन्न
सेच्छोपपत्तिः। आदिमसंज्ञिकोपपत्तिः। अंधवधिर्मू
कादिभावः। मिथ्यादृष्टिकता। अकृत्रकल्पोपपत्तिश्च॥
अक्षणानां महाभयानां व्युपशमकरी। सर्वदुःखानां
निर्नाशनकरी। सर्वदुर्निमित्तानां व्यपोहनकरी। सर्वदु
र्निमित्तव्यपोहनकरी। सर्वदुःशकुनविघ्नानां व्युपशमनक
री। सर्वदुःशकुनविघ्नव्युपशमनकरी। सर्वमाणिक
र्मदूरीकरणी। सर्वक्लेशमूलप्रणाशोपचयकरी।
सर्वक्लेशमूलप्रणाशोपचयकरी। सर्वयोनिसो मन
स्कारस्य समाधिविपक्षभूतस्याऽत्यादनकरी। सर्व
योनिसोमनस्कारस्यात्यादनकरी। सर्वमदमानदर्प
हंकारनिर्णाटनकरी। नत्रमदइति। स्वलंपकोऽक
स्मोद्यवेष्टेनसः पर्यायः। मानइति ऽकृतिर्मोमः॥
दर्पइति। मेमनमानः। अहंकारइत्यहमस्मीति। ए
वांनिर्णाटनकरी। सानथोक्ता। सर्वदुःखदौर्मनस्यका
यमनोजातस्यात्यादनकरी। सर्वदुःखदौमनस्यात्

त्पादन करी। सर्वतथागतानां हृदय भूता तन्निर्यातनत्वात्
। सर्वतथागतौवांश्वभूतात्मोप्यत्वात्। सर्वश्रावकप्रत्येक
बुद्धानां रहस्यभूता। अप्रकाशत्वात्। सर्व मुद्राश्चतुर्मु
द्रा। सर्वमंत्राहृदयादयः तदात्मिकत्वात्। सर्वमुद्रामं
त्रभूता। सर्वमंत्राभिलाप्यवादिनां प्रतिसंक्षेपस्य
संजननी। सर्वधर्मोत्कन्धादयः तेषामभिलाप्यो
ऽवाच्यत्वं। तद्दिनुंशीर्ष एवामिति तेनतथा अरणयो
पपन्नानामपि च भवान्तथागतविग्रहसंदर्शनेनच
सादृश्यजनया बुद्धबोधिप्रतिलाभनं करोति। बुद्धोप
पन्नामपि केषांचिद्भव्यजातीयानां पूर्वोक्तविधा
नेना शयोपसंक्रान्तानां संसारस्रोतएवमार्गे दानादेश्व
रिकाफलं करोति। भव्यजातीयानां असिद्धिविधा
नयेनोपसंक्रान्तानां सर्वेषिनकुशलमूलानां कुश
लप्रवेषणी। अवरोपितकुशमूलानां कुशलपरिणा
चनं परिपक्वकुशलमूलानां कुशलमोक्षणी॥ य
थायोगंश्रावकादीन्प्रतिलाभंकरोतीति देवदुर्गतिदु
र्गतिपपन्नानां भव्याभव्यजातीयानांच क्लेशानुच्छे
दनात्। सर्वशास्त्रा सर्वसत्वानामित्युच्यते। जगद्गुरु

रिति॥ अतएवजगतांपतिर्जगद्गुरुः। प्रख्यातदशदिग्लोकधर्मदानपतिरिति। दशदिशांलोका दशदिग्लोकाः। प्रख्याताश्चतेदशदिग्लोकाश्चप्रख्यातदशदिग्लोकाः तेषुप्रख्यातदशदिग्लोकेषु धर्मदानपतयः सप्रख्यातदशदिग्लोकः धर्मदानपतिः। अतएवमहानिति। अपीसर्वस्थिरचरपदार्थानामकत्वात्। तथाचोक्तंश्रीसद्धर्मपुण्डरीके। सर्वत्रसर्वतःसर्वं सर्वथासर्वदास्त्वयं। सर्वज्ञाद्दृष्टिस्थिरचला सर्वभावेष्वसक्तेति॥ ७॥

मैत्रीसन्नाहसंनद्धः करुणावर्मवर्मितः।
प्रज्ञाखड्गधृतोवीरःक्लेशारीन्जेतुमुद्यतः॥

तत्रमैत्रीसन्नाहसन्नद्धेति। मैत्री मित्रस्नेहता एकपुत्रप्रेमता सर्वसत्वानुकंपी दया मैत्र्यसन्नाहो मैत्रीसन्नाहः। मैत्रीसन्नाहोयेनस मैत्रीसन्नाहसंनद्धः। करुणावर्मवर्मितेति। करुणोयथोक्तलक्षणा सैव वर्म करुणावर्मणे महाकरुणावर्मवर्मितो रक्षितोयः सकरुणावर्मवर्मितः। प्रज्ञाखड्गधृतोवीरइति। प्रज्ञेति प्रज्ञापारमिताप्रकरः। खड्ग इति प्रज्ञाखड्गः॥ धृतइति कथंधृतः। वीर इति सत्क्षत्रियबलात्मकः। ननुचविमुक्तंभव

ति। मैत्रीसन्नाह सन्नद्ध करुणाकवचवर्मवर्मितो रक्षितः प्रज्ञा
दिमुद्राशस्त्रश्च क्लेशाज्ञानरागादिमोहः॥ सत्त्वरणः
संग्रामं जनहीति त्यजति इति। सत्त्वभूतो भगवान्॥
क्लेशाज्ञानारणंजहोभवति॥ अयमाम्नायोरुकवर्णश्च उ
र्ध्वजेऽक्षरः॥ ८॥

मारारिर्मारजिद्वीरश्चतुर्मारभयान्तकृत्।
सर्वमारचमूजेता संवरो लोकनायकः॥ ९॥

तत्र मारारिरिति। मारगणविघ्नानांअरिर्मारा
.....
.....
वज्रासनस्थि
तेन मारसैन्यविपक्षंजयतीति मारजित् अतएववीरः
॥ परैर्विपक्षभूतैरनभिभवनीयत्वात्। चतुर्मारभया
न्तकृदिति। चत्वारोमारा चतुर्मारा तेभ्योभयं चतुर्मार
भयं तस्यान्तो विनाशस्तंकरोतीति चतुर्मारभयान्त
कृत्। सर्वमारचमूजेतेति। सर्वेमाराणांचमूः सर्वमा
चमूःसेना तांजेतुंशीलंयस्येति सर्वमारचमूजेता.
संवरइति। नाम्नाउपसंहारमाह। तद्यथाभग वान्
वः संवर इत्यारभ्य यावदेतत्सर्वंभ्रायेणाना
मस्संगीतिः कथिताः। लोकनायक इति। लोकानां

नायको लोकनाथकः सकलजगदभ्युद्धरणात्॥ ९॥

वन्द्यः पूज्योभिवाद्यश्च माननीयश्च नित्यशः।
अर्चनीयनमोमान्यो नमस्यः परमोत्कृष्टः॥ [illegible]

नत्ववन्दीति। सर्ववेदानांलोकानांवन्दनार्हत्वात् [illegible]
ति श्रुतस्तुतीनां पर्यन्तगतः पूज्यउत्कृष्टत्वेनः। भगवान्
मञ्जुश्रीः सर्वसिद्धान्तपरमत्वात् पूज्यइत्युच्यते। स्तुत्यर्ह
त्वात्। माननीयश्चनित्यशइति। सर्वदा श्रावकादीनां मा
ननीयत्वात्। अर्चनीय इति पापिपूर्णत्वात्। मंजुश्रीरिव
सर्वबोधिसत्त्वानां मान्य इति। सर्वतथागतानां माननीय
त्वात्। नमस्य इति मंत्रमुखचर्याचारिणां नमस्यत्वात्।
अतएव परमउत्कृष्टत्वात्। गुरुरिति सर्वेषां सर्वसत्त्वा
नां अनुशासनात्। सर्वतथागतज्ञानहृदयविहारित्वाच्च॥
सएवभगवान्॥ १०॥

त्रैलोक्यैकक्रमगतिर्लोकपर्यन्तविक्रमः।
त्रैविद्यःश्रोत्रियः पूतः षडभिज्ञःषडुत्क्षितिः॥ ११॥

तत्रत्रैलोक्यक्रमगतिरिति। त्रयाणांलोकानांसमाहारस्त्रि
लोकस्त्रिलोकमेवत्रैलोक्यं तस्मिंस्त्रैलोक्ये एकस्मैवक्र
मस्य पादस्य गतिर्गमनंयस्यसत्रैलोक्यैकक्रमगतिः

अनेनाहि माहात्म्यं तस्यभगवतःसंप्रदर्शितं। व्योमाप
र्यन्तविक्रम इति। व्योम आकाशं तस्यापर्यन्तः तस्मि
न्विक्रमः पराक्रमोयस्यस व्योमापर्यन्तविक्रमः। अनेन
पदेन तस्यभगवतः सत्तार्थक्रमोनिर्दिष्टः। त्रैविद्य
इति। वेदविदंदर्शनमाह। ऋग्यजुःसामलक्षण
स्त्रयोविद्या। त्रयीआन्वीक्षिकीवार्ता लक्षणानदण्डी
ते वेत्तीति त्रैविद्यस्तत्स्वभाव अतएव। ऋक्षिपरि
ज्ञाना अवक्षयोभिज्ञास्व भावं वेत्तीति त्रैविद्यः स
एवभगवान्। श्रोत्रिय इति। वेदविदमेवदर्शनं। छ
न्दोध्यायी श्रोत्रियउच्यते। भगवांश्च मनुश्रीः। अधी
मिनमहायान छन्दसोऽध्ययनात्श्रोत्रिय इत्युच्य
ते। पूत इति। ओनात्मनेनेति पूतः अभिहेतुना
त्॥ तदाचोक्तं महाभाष्ये। अथं पवित्रं प्रथमं प
थिव्यामेनं पवित्रं परमंचमंत्राः॥ तेषांचसा ऋ
ग्यजुषपवित्रं महर्षयो व्याकरणानि चाहुरिति। पवित्रवा
न्। सएवभगवान्पूत इत्युच्यते। षडभिज्ञ इति। दिव्य
चक्षुर्दिव्यश्रोत्र परचित्तज्ञान पूर्वनिवासानुस्मरणऋ
क्षिः सर्वावक्षयोभिज्ञाचेति॥ एताःषडभिज्ञा यस्मा

सौ षडभिज्ञः॥ षडनुस्मृतिरिति। षडनुस्मृतिर्ब
र्गानुस्मृति वज्रानुस्मृति कलानुस्मृति क्रोधानुस्मृ
समयानुस्मृतिश्चेति। अतस्ताः षडनुस्मृतयोय
स्यासौ सतथा॥ ११॥

बोधिसत्वो महासत्वो लोकानीतिं महर्द्धिकः।
प्रज्ञापारमितानिष्ठः प्रज्ञानत्वत्वमागतः॥ १२॥
तत्र बोधिसत्व इति। बोधिसर्वधर्मज्ञतायां स्वार्थ
संपदि सत्वमप्रायो यस्यस बोधिसत्वः। अव को
षिनहिस्यादित्याह। महासत्व इति महत्पां परमा
र्थसंपदि सत्वं यस्य महासत्वः। महत्वंचात्मथाभिनी
थिकसाधुजनवत्वस्यादिति। बोधिसत्व श्रवणाअत
एवाभ्यांपदाभ्यां उपलक्षितः। सर्वभगवान्। तत्रसो
कोनीत इति। संसारमहामर्घः प्रतिभोतो गामित्वात्
।महर्द्धिक इति। परिपूर्णज्ञानसम्भारत्वात्॥ प्रज्ञापा
रमितानिष्ठ इति। प्रज्ञाया धर्मप्रविचयलक्षणाया
पारमिताप्रज्ञापारमिता तस्यानिष्ठा वसानं गतोयः
सप्रज्ञापारमितानिष्ठः॥ प्रज्ञानत्वमिति। प्रज्ञायास्त
त्वं प्रज्ञानत्वं। अद्वयज्ञानं सर्वभगवान् त्वमाग

तइति। तदेवाह यज्ञानंजात्र आगतोयः सतथोक्तः॥
१२॥

आत्मवित्परवित्सर्वः सर्वोयोत्यद्भुतः।
सर्वोपमामतिक्रान्तो ज्ञेयोज्ञानाधिपः परः॥ १३॥

तत्रआत्मविदिति। आत्मानं वेत्तीति आत्मवित्। परवि
दिति। परं वेत्तीति परवित्। सर्वइति। अशेषभावस्य
भावसंदर्शनात्। सर्वोयि इति। सर्वेभ्योहितं सर्वोयं
सकलजगदेकबन्धुत्वेनत्वात्। अत्यद्भुतयशोलोभ
गवान्। सर्वोपमामतिक्रान्तइति। सर्वेषांपदार्थानामुप
म सर्वोपमो नास्तेतिसर्वोपमामतिक्रान्तः। क्रान्तोसंधि
तवान्। यः सर्वोपमामतिक्रान्तः। ज्ञेयइति। ज्ञातुमश
क्यत्वात्। ज्ञानाधिपइति। ज्ञानस्वभावत्वात्॥ परोऽत्यन्त
श्रेष्ठत्वात्॥ १३॥

धर्मदानपतिः श्रेष्ठश्चतुर्मुद्रार्थदेशकः।
पूर्त्युपास्यतमोजगर्तानिर्याणत्रययायिनौ॥१४॥

तत्रधर्मदानपतिरिति। योसत्यतयोविपरीतधर्मदा
नात्। अतएवश्रेष्ठोऽभिगमनीयानांमध्ये सएवभ
गवान्। चतुर्मुद्रार्थदेशक इति। चतस्रणांमहामु

ज्ञानीनां अर्थश्चतुर्वर्गार्थस्तस्य देशकः प्रकाशकः सर्वज्ञ
यागतज्ञानकायस्वभावत्वात्। पर्युपास्यतमइति। नि
र्याणत्रयं यः श्रावकादिनिर्याणं नेतुं यच्छीलंयेषां ते निर्याणत्रययायिनः॥ अतस्तेषां सर्वनिर्याण
यायिनांजगन्नाथसौभगवान् पर्युपास्यतमोभवति
।सर्वमोक्षस्वभावत्वात्॥ १४॥

परमार्थविशुद्धश्री स्त्रैलोक्यशुभगोमहान्।
सर्वसम्पत्करः श्रीमान्मञ्जुश्रीः श्रीमतांवरः॥१५॥
कल्पद्रुमानन्तनगाधापश्चदशः॥१५॥

तत्रपरमार्थविशुद्धश्रीरिति। परमार्थेनधर्मधातुनावि
शुद्धश्रीयस्यासौ परमार्थविशुद्धश्रीः प्रज्ञोपायात्म
कत्वात्। अतस्त्रैलोक्यशुभगइति। त्रैलोक्येस्व
कस्यशुभः सर्वसत्वार्थकरणात्। तथाचोक्तंश्रीस्व
यम्भुस्तुतौ। शुभगोभगवान्वज्री सर्वसत्वार्थकारणा
त्। दुर्भगाभावकासर्वअनुपरिनिर्वृताइति॥
महानिति। सर्वव्यापकत्वात्। सर्वसम्पत्करइ
ति। सर्वसंपदाधारभूतत्वात्। श्रीमानितिभाग्य
सम्पन्नत्वात्। मञ्जुश्रीरिति। ---श्रीम

तांवरशीत । तद्वतांश्रुतकृत्यर्थः॥ इदमिदानीं कृ
त्यानुष्ठानज्ञानत्वभावेन सर्वभगवान्मञ्जुश्री सर्व
तथागत सर्वमुद्रासमताधिगतविश्वकात्मकरुणा
दशोत्तरवशेन सर्वसत्त्वधातुः सर्वाशापरिपूरकः।
सर्वदशादिगतान्नाप्यर्यन्नलोकधातून्नात्वा नामसं
त्राक्षरपदानः पंचनवतीनांकुलभेदनपंचधाप्रविभ
क्तानः सर्वसत्त्वानांक्लेशीयमपनीयकुशलपक्षेषुसं
स्थाप्य स्वविमोक्षमुखेनतत्रभयाच्चसर्वतथागतपर्ष
दमवभास्यउत्तरांगत्यतानिचस्वकुलनामचर्यामंत्र
क्षरपदानिकृत्वा वज्रधातुमहामण्डलस्यवहिः पंचम
चक्रेयथोक्तक्रमतोव्यवस्थितः॥ उत्तरीपथोक्तक्रि
यत्रयमात्मानमवलम्ब्यमंत्रमुखचर्यांचारीकृत्व
उत्तीर्णाक्रमुद्राहितावा आर्य्यनामसंगीतिपठनपू
र्वंकाग्रराग्रगानवाद्योत्तीर्णाम्नायः॥ १५॥
आर्य्यनामसंगीतिर्नाम कायं नाममंत्रार्थावलो
किन्यां कृत्वाऽनुत्तरतन्त्राधिकारे दशमः॥
गाथापञ्चदशः॥ १५॥ नाममंत्रपदानिपंचन
वतिरंकुलेषि॥ २५॥

नमस्तेवरदवज्राय भूतकोटि नमोस्तुते ।
नमस्ते शून्यतागर्भ बुद्धबोधि नमोस्तुते ॥१॥
बुद्धरागनमस्तेस्तु बुद्धकाय नमोनमः॥
बुद्धप्रीतिनमस्तुभ्यं बुद्धबोद नमोनमः॥ २॥
बुद्धस्मितनमस्तुभ्यं बुद्धवसन नमोनमः
बुद्धवाचनमस्तुभ्यं बुद्धभावन नमोनमः॥ ३॥
अभवोद्भवनमस्तुभ्यं नमस्तेबुद्धसम्भवः।
गगनोद्भवनमस्तुभ्यं नमस्तेज्ञानसम्भवः॥४॥
मायाजालनमस्तेस्तु नमस्ते बुद्धनाटकः।
नमस्तेसर्वसत्वेभ्यो ज्ञान कायनमोस्तुते॥५॥
इतिपञ्चनथागतकुलनमस्कारगाथास्तवः॥ ॥

साधुनाम महायैरेचनाकयः पंचतथागताः पंचभिर्ज्ञा
नाभिकाभिःगाथाभिः भगवंतं ज्ञानमूर्त्ति वज्रधातुम
हामरास्त्वान वर्णिनं संस्तुवन्तिस्म॥ तद्यथा॥नम
स्तेवरदेत्यादिर्ईज्ञानप्रवेन बुद्धरागेत्यादि धर्मधा
तुज्ञानस्वभावेन। बुद्धस्मितेत्यादिप्रत्यवेक्षणाज्ञान
द्वारेण। अभवोद्भवेत्यादि। समताज्ञानात्मना। माया
जालेत्यादि कृत्यानुष्ठानज्ञानद्वारेण इति॥ ॥

आर्यनामसंगीतिटीकायां नाममंत्रार्थो वर्णोक्तिर्नाम
उपसंहारस्त्वधिकारः एकादशमः परिसमाप्तः॥
गाथापञ्च॥ ॥

अथेदानीं भगवान्वज्रधरो मंत्रेश्वरो मंत्रेनैव
धर्मिनत्वान्तस्यैव मंत्रनं कृत्वा स्वयं शंसानामसंगी
तिमधिकृत्याह॥ अद्भावनां प्रहर्षहेतोः॥ इयमसौव
ज्रपाणेर्वक्ष्यति। इयमसौनामसंगीतिः। ये वज्रपाणे
अयमभिषेकप्रकारेण। वज्रधरेतिज्ञानप्रकारेण। उभ
यगणत्वेनसंगीतिकारकत्वेन विकल्पनत्वात्॥ भगव
तोज्ञानमूर्तेः सर्वतथागतज्ञानकायस्य सर्व
ज्ञानसत्त्वस्य सर्वधर्मनामसंगीति॥ किंविशि
ष्टा आवेनिकपरिशुद्धाः। तत्रवेणिमिश्रीभावः लो
कैः सह। नवेणि अवेणि अद्वयस्वभावत्वात्तत्रभवआ
वेणिकमेतत्परिशुद्धार्यनामसंगीतिः सा मयादे
शितेति॥ वक्ष्यमाणेनसम्बन्धः॥ किमर्थमित्याह
नवोत्तरप्रीतिप्रसादमहोदित्यंजनार्थमिति
॥ तत्रोत्तरप्रीतिर्हर्षः प्रसादः श्रद्धा साचकर्म
फलसत्यलेस्तुभिसंप्रत्ययामहोदित्यं वार्यतत्व

अग्रालक्षैस्तुत्साह ॥ एवो वज्रधरो तवसंजननार्थं। व
वबाश्रनोगुप्तपरिश्रुद्धे कायवाङ्मनसास्त्यवेधि
चित्त वज्रस्वभावेनस्वपरिशुद्ध्यर्थं अपरिपूर्णपरिश्र
द्धभूमिपारमिताप्रत्यक्षज्ञानसंभार परिपूरिश्रुद्धे। अ
परिपूर्णभूमयः। अपरिशुद्धश्च पारमिता। अपरि
पूर्णापरिशुद्धाभूमिपारमिता। तासांप्रत्यक्षज्ञानस
भार स्यपरिपूरिश्रुद्धेश्रर्थं। अनधिगतोत्तरस्या
धिगमाय। अनधिगतश्चासावुत्तरश्च असारन
धिगतोत्तरार्थं स्यधिगमाय। अप्राप्तस्यप्रा
प्तये। अप्राप्तस्यबुद्धधर्मादेः प्राप्तयर्थं। यावत्सर्वेन
याप्राप्त सर्वधर्मेनत्रीसंसारणार्थं चेति। यावद्बुद्धः क्रमो
पक्षा॥ सर्वतथागतसर्वधर्मेनत्रीप्रज्ञा पारमितात्मकस्य
ज्ञानस्वभावेनरूपेणपाठनेरसम्बधारणार्थंच। मया
देशितेति। बोधिचित्तवज्रस्वभावेन संप्रकाशितेति। सुवि
शुद्धधर्मधातुमण्डलेन विहरतीति। आदर्शज्ञानशरीरमि
श्रजेति॥ समताज्ञानरूपेणाऽक्षोभ्यो हृतेति। प्रत्य
वेक्षणाज्ञानात्मना अधिष्ठितेचेति। रत्नत्रज्ञानज्ञा
नशरीरेण। इयंनामसंगीतिर्वज्रधरतवसंतानेचित्ते

सर्वमंत्रधर्मताधिष्ठानेनेति । सर्वमंत्राणां धर्मताभूयता
तस्याधिष्ठानं स्थिरीकरणाधिकतेनेति ॥ ॥
अथमत्रकस्यानुशंसार्थकादशपदानि अङ्कतोपि
॥ ११ ॥ अथाविनोत्यत्रकस्येयमनुशंसामधिकृ
त्याह ॥ उत्तरएतस्मियं वज्रपाणे वज्रधरनामसं
गीतिरिति ॥ सुपरिशुद्धपर्यवदातं ॥ सर्वज्ञज्ञानका
यवाङ्मनोगुणभूतेति ॥ सुष्ठुपरिशुद्धं सुपरिशुद्धं
परिसमन्तादवदातं पर्यवदातं ॥ सुपरिशुद्धपर्यवदा
तंतत्सर्वज्ञज्ञानं ॥ तस्यकायवाङ्मनांसि तेषांएतभू
ताअप्रकाशप्रभूतत्वात् ॥ सर्वतथागतानां उत्तरबोधि
रिति । उत्तरानां बोधिरुत्तरबोधिः ॥ श्रावकबोधिरित्य
र्थः ॥ सम्यक्सम्बुद्धानामभिसमयइति अभिसमयो
ज्ञानं । सर्वज्ञज्ञानं । सर्वतथागतानामजरइति न
विद्यते उत्तरमस्मादनुत्तरं धर्मधातुगतिमु
गतानामिति । मरणनास्तिभावत्वात् । सर्वमार प
रिजयो जिनानामिति ॥ चतुर्मारबलेरपराजितत्वा
त् । दशबलबलिनां सर्वदशबल बलानामिति ॥
दशबलानि उत्तमलक्षणानि यानिविद्यन्ते यस्या

नामसंगीतेः सादशवलबलिनी त स्वाभावो दशवलव
लिता॥ सर्वज्ञता सर्वज्ञज्ञानमिति। सर्वेज्ञानाग्रीति सर्व
ज्ञस्यभावः सर्वज्ञता॥ आगमः सर्वधर्माणामिति॥
परम्परागच्छतीत्यागमः॥ सचद्विप्रकारः। आगम
लक्षणाधिगमलक्षणश्च। तत्रागमः सर्वज्ञ
मिति। श्रावकादीनां सर्वज्ञानां श्रावकादिबोधि
सत्वरूपेणसाक्षात्करणात्। विमलश्चासौ शशी
ऊर्ध्वश्च विमलशशिऊर्ध्वः सचासौ पुण्यज्ञानसं
भारश्चेति विमलशशिऊर्ध्वपुण्यज्ञानसंभारः तस्य
परिपूर्यसा नामसंगीतौ सानथोक्तः॥ प्रकृतिसर्व
श्रावकप्रत्येकबुद्धानामिति। प्रकृतिरिति। तेषामु
त्पत्तिस्थानत्वात्। क्षेत्रेसर्वदेवमनुष्य सम्मतेरिति
। क्षेत्रमिति सर्वसंपदाकरणात्वात्। प्रतिष्ठामल
यानस्थिति ऊर्ध्वलक्षणस्य महायानस्यास्थितिकर
त्वात्। संभवोबोधिसत्वचर्यायामिति। संभवइति
उत्पत्तिस्थानत्वात्। निष्ठासम्यगार्यमार्गस्थितिनि
ष्ठाअवसानं निष्ठागतिमुक्तीनामिति। निकषः
परीक्षास्थानं। यथाहुवर्णो स्यनिकषोपलः॥

स्मिन् निर्वाणमार्गेस्मिन्। निर्वाणमार्थहेतुभूतत्वा
त्॥ अस्याः। अत्र छेदस्तथागतवंशस्येति। अत्र
छेद इत्यत्र वछिदः सर्वतथागतकुलकरणत
प्रकृतिमहाबोधिसत्वकुलगात्रस्येति॥ अतस्त्व
प्रकर्षणावछिर्भवति॥ निग्रहः सर्वपरप्रवादी
नामिति। निगृह्यतेऽनेनेति निग्रहः॥ तथाचोक्तं
श्रीसम्वरे। क्वचिच्च परतीर्थ्यानां सहधर्मेणनि
ग्रह इति॥ विध्वंसनं सर्वतीर्थिकानामिति। विध्वं
सनमिति। स्वमहात्म्यप्रदर्शनमुखेननिराकरणं
। यथादेव विनोरगपराजय असुमोर [illegible]
सेनायामिति। बलमिति चतुरंगबलः। चमू
मूहरचनासेनासमुदायः॥ तताभ्यामर्थोभवं
ति। चतुर्णां मारणांबलंचमूसेनायाः पराज
योनिराकरणं यतोनामसंगीति। संग्रहः सर्व
सत्वानामिति। संग्रहइति। सनप्रियवचनार्थ
चर्या समानार्थतालक्षणाः। तेनसंगृह्यतइति
संग्रहः। आर्यमार्गपरिपाकः। सर्वनिर्याणया
मिनामिति। आर्यमार्गपरिपाक इति॥ आर्या

शक्ति मार्गस्य परिपूरणता। समाधिश्चतुर्ब्रह्मविहारि
णामिति। समाधिरूपपरिक्षिप्ते वस्तुनि नैस्पृह्यता च मैत्री करुणा मुदितोपेक्षायां। ध्यानमेकाग्र
चित्तानामिति। ध्यानं चिन्ताविचारप्रीतिसुखात्मकं
योगः कायवाङ्मनोभिर्युक्तानामिति। योगइति
ज्ञानमात्रसमापत्तिविसंयोगः सर्वसंयोजनाना
मिति। रहितता नवभ्यः संयोगेभ्यः। नवसंयो
जनानि। अनुनयसंयोजनं प्रतिघसंयोजनं मा
नसंयोजनं अविद्यासंयोजनं दृष्टिसंयोजनं प
रामर्शसंयोजनं विचिकित्सासंयोजनं ईर्ष्यासंयोज
नं मात्सर्यसंयोजनमिति। प्रहाणं सर्वज्ञेयावर
णानामिति। प्रहाणमिति परित्यागः। रागादी नां
क्रोधादीनांच उपशमसर्वावरणानामिति। ज्ञेय
क्लेशकर्मविपाकावरणानामत्यन्ताभावः। विमु
क्तिः सर्वबन्धनानामिति। रागद्वेषमोहबन्धनानांवि
मुक्तिहेतुत्वात्। मोक्षसर्वोपधीनामिति। सोपधि
निरुपधिशेषलक्षणानां तत्स्वभावत्वात्। शान्तिः
सर्वक्लेशोपक्लेशानामिति। शमनं शान्तिः ज्ञानता

विहारत्वात् ॥ आकरः सर्वसम्पत्तीनामिति । सर्वलोक
कलोकोत्तरसम्पत्तीनामाकरभूतत्वात् । परिहानिः स
र्वसम्पत्तीनामिति । सर्वदोषाणां परिहानिरूपत्वात्
पिथनं सर्वापायद्वाराणामिति ॥ नरकप्रेततिर्य्यग
पायद्वाराणामेकां तत्वात् ॥ सन्पथोविमुक्तिउ
रस्यं । सन्नासौपथसत्पथः ॥ अप्रवृत्तिसंसारस्येति
प्रवर्त्तनंप्रवृत्तिर्नप्रवृत्तिरप्रवृत्तिः ॥ प्रवर्त्तनं धर्म्म
चक्रस्येति ॥ यथाभव्यतया धर्म्मचक्रप्रवर्त्तनत्वात्
॥ उच्छ्रितछत्रध्वजपताकातथागतशासनस्येति ॥
बहुश्रावकादीनां पुरःसमभिभूय उत्क्रान्ते छत्रध्वज
पताकेवनामसंगीतिं ॥ अधिष्ठानं सर्वधर्म्मदेशना
यामिति ॥ अधिष्ठानमिति । स्थिरीकरणं । क्षिप्रा
भिज्ञमंत्रमुखचर्य्याचारिणां बोधिसत्वानामिति ॥ क्षिप्र
सिद्धेरिति परश्चरणनिरपेक्षतयाशीघ्रसिद्धिः ॥
भावनाधिगमप्रज्ञापारमितासमुक्तानामिति ॥ भाव
नायां पुनः पुनरभ्यासस्याधिगमसाक्षात्करणं ॥
शून्यताप्रतिवेधोऽयप्रतिवेधश्च भावनासमुक्तानां
मिति ॥ प्रतिप्रतिवेधः शून्यतायाप्रतिवेधः शून्यता

प्रतिवेधः॥ निष्पत्तिः सर्वपारमिता संभारस्येति॥ निष्पत्ति
रिति। संपादनं परिपूरिः सर्वभूमिपरिपूर्यर्थं परिसम
माप्तिः परिपूरिः प्रतिवेधः॥ सम्यक्कृत्वनुरार्यस
त्यानामिति। प्रतिवेधइतिपूर्ववत्॥ सर्वधर्मेकक्षिप्त
विक्षेपक्षयानुत्पादप्रस्थानानामिति॥ सर्वधर्मा इति
पञ्चोपादानस्कन्धास्तेषामेकचित्तक्षणे कालम्बनतया
नस्यप्रतिवेध इतिगतार्थः॥ यावच्छब्दश्च परिसमा
प्तिः सर्वेऽक्षरासानामियं नामसंगीतिरिति॥ ॥
द्वितीयचक्रस्यवैरोचनचक्रस्येयं अनुशंसापदार्थ
प्रकाशनात्॥ अंकतोपि॥ ५२॥ ॥
अनुशंसानीयचक्रस्यानुशंसा— कृत्याह॥
पुनरपरं वज्रपाणे वज्रधरेति इयंनामसंगीतिः॥ सर्व
सत्वानामशेषकायवाङ्मनःसमुदाचारपापप्रश
मनीति॥ अशेषेषु निरवशेषेषु कायवाङ्मनःक
र्मक्लेशपापानस्यप्रशमनी॥ सर्वपापानांविशोधनी॥
सर्वदुर्गतिनिस्सरणनिवारणी सर्वदुर्गतिनिवारणी
निरयानांसमुच्छेदनत्वात्। सर्वकर्मावरणानांसमुच्छे
दनि· सर्वकर्मावरणसमुच्छेदनी। सर्वाक्षरासमु

त्पादनकरी। सर्वाशक्षणाऽइति। क्षणावकाशः। अवस
रइत्यर्थान्तरं। अभिसमयंप्रत्यन्तकाशात् अक्षणोत्
च्यते॥ तेजाशेयऽतः। नरकोपपत्तिः। तिर्यग्योपपत्तिः
प्रेतोपपत्तिः। प्रत्यन्तम्लेक्षोपपत्तिः। आदित्यदर्शि
कोपपत्तिः। अन्धबधिरमूकादिभावः। मिथ्यादृष्टि
कता। अङ्गवैकल्योपपत्तिश्च। अक्षणानां महाभयानां
व्युपशमनकरी। सर्वदुःखज्ञानां नाशनकरी। सर्वक्लि
ष्टज्ञप्तिनाशनकरी। सर्वदुर्निमित्तानां व्यपोहनकरी।
सर्वदुर्निमित्तव्यपोहनकरी। सर्वदुःखमूलसंरोहो
पच्चयकरी। सर्वायोनिसोमनस्कारस्यानुत्पादनक
री। सर्वायोनिसोमनस्कारस्याऽनुत्पादनकरी। सर्वमद
मानदर्पाहंकारनिर्घोटनकरी। तत्रमदऽइति स्वस
म्पत्तोरुऽसोऽहर्षश्चेतसः पर्यादानं। मानऽइति उद्ध
तिर्मतिः। दर्पऽइति ममतामानः। अहङ्कारऽइत्यह
मस्मीति। एषांनिर्घोटनकरी। सानथोक्तो सर्वदुः
खदौर्मनस्यस्यकायमनोजातस्यानुत्पादनकरी। सर्व
दुःखदौर्मनस्यानुत्पादनकरी। सर्वतथागतानां हृद
यभूता नंनिर्यातनत्वात्। सर्वतथागतांश्च भूता

गोप्यत्वात्। सर्वभावकर्मयेकज्ञानां रहस्यभूता अप्र
काश्यत्वात्। सर्वमुद्राचतुर्थी। सर्वमंत्राहृदयोदयः।
तदात्मिकत्वात्। सर्वमुद्रामंत्रभूता। सर्वमंत्रानभिलाप्य
वादिनां स्मृतिसंप्रजन्यसंजनी। सर्वधर्मास्कंधादयस्ते
षामनभिलाप्योऽवाच्यत्वं। नहीदृशं शीलमेषामितिते
नोच्यते॥ अतस्तेषां स्मृतिः संस्तवनिमित्तस्य
संप्रमोषोऽभिलापनासंप्रजन्यंकामवाचा स्वयंभू
नविहारी नचोसंजनी। प्रज्ञाच्च मेधाच्च प्रज्ञामेधे। अ
नुत्तरप्रज्ञामेधे कर्तुं शीलं यस्यासावनुत्तरमेधाकारी
। आरोग्यं निरोग्यता। बलं कायिकांसामर्थ्यं। ऐश्व
र्यं स्वत्यभावाद्। सम्यक्त्वनधार्म्यं। सर्वमेतत्कर्तुं शी
लमस्यासानुत्तरा। आरोग्यबलमैश्वर्य्यसम्यक्की
॥ श्रीरितिलक्ष्मी। शुभमितिकुशलं। शान्तिरितित्वस्य
यनं। कल्याणमितिमङ्गलं॥ अतएवेषांप्रवर्द्धन
करी। यशइत्यभिषदानेन। कीर्तिरितिधर्मदानेन।
श्लोकइतिभयदानेनस्तुतिरित्यशोकदानेन॥ तत्रश्रे
षांचतुर्णांदानानांप्रकाशनकरी। सर्वव्याधयएव
भयानिसर्वव्याधिभयानितेषांप्रशमनकरी।

सर्वव्याधिमहाभयप्रशमनकरी। भूतनरभूतनरेभ्यापि
त्रतरणपवित्रतरणामिति॥ तरत्नमयष्ठारिणा। धर्म
वता धर्मयानार्तासर्वसत्त्वानां मा मंगलमन्नेति
॥ तमप्रत्ययस्वभावेनार्थप्रदर्शितः॥ शरणार्थिनां शरण
मं शरणार्थिनां। लयनमवस्थाद्वांलयनार्थिनां॥
त्राणं पालनंत्राणार्थिनां। परायणं तत्परनापर
यणानां। द्वीपभूतेतिद्विधाभूता अपीयस्मिन्सती
पः॥ तद्भूता द्वीपार्थिनां। अगतिकानां गतिभू
भूता। अनुत्तरगतिस्वभावत्वात्। यान पात्रभूताभ
वसागरपारगामिवाभिति॥ धर्मयानपात्रभूतत्वात्।
महाभैषज्यराजभूता। सर्वव्याधिनिर्घातनतया। प्रज्ञाभू
तो हेयोपादेयानां भावानां विभावनहेयोपादेयभाव
विभावना। तयाहेतुहेतुभूतया। ज्ञानालोकभूतासर्वज्ञ
त्वकारकज्ञेयानामपनयनात्। ततयोक्तः॥ चिन्तामणिभू
तासर्वसत्त्वयथाशयाभिप्रायपरिपूरणायेति॥ सर्वसत्त्व
मनोरथपरिपूरणात्। सर्वज्ञज्ञानभूता मंजुश्रीज्ञानकाय
स्यप्रतिलंभायेति। तज्ज्ञानसमन्वागमात्। परिशुद्धा
नादर्शभूता प्रज्ञायां चक्षुषां प्रतिलंभाय। तच्चक्षुस मन्वाग

मात्। षट्पारमिताप्रतिपूरिभूता। आनिमाभयधर्मदात्स
जनतयेति। दानपारमिताद्दीनां निष्ठागमनात्। दशभूमि
प्रतिलंभूतापुण्यज्ञानसमाधिपरिपूरणतयेति। पुण्या
दीनांपर्यन्तगमनात्। अक्षयधर्म्मताक्षयधर्मविगमा
त्। ग्राह्यग्राहकाभावात्। तथताभूतताअनन्यधर्मता
अथवा सेवविगमलक्षणेति। समारोपावादीनाभावात्
। भूतकोटिरूपता। परिकल्पितयथागतज्ञानकायलाभा
दतयेति। धर्म्मधातुस्वभावत्वात्॥ सर्वाकारसहाभ्यता
। रूपताअशोकाक्षिग्रहनगतिनिर्घाटनतया॥ सर्वध
र्मानभिलाप्यैर्व नामसंगीतिः॥ यदुताक्षयधर्म्मता भूतता
त्वाव धारणार्थं। नाम्ना संधारणंनस्यप्रकाशनतया
हेमभूतनयेति॥ ॥तृतीयचक्रसेयमर्क्ष
णा तत्सपानिमा पश्चात्॥ अंकतोपि॥ पत्र॥ ॥
वज्रधर्मचक्रस्यजसंसासक्रुद्धाह॥ पुनरपरंवज्रपाणो
वज्रधरेत्यादि॥ कसिताथांसंवर्ध्य सति लीयतइतिकरं
। क्षेत्रियादिनत्रुणाति पवित्रीकरोतिनिर्वाणार्थेन संसारा
दितिपत्रः॥ कलपत्रः जलपत्रः॥ यः कश्चिज्जलप
त्रोवा कुलदुहिता वा मंत्रमुखचर्यांचारी ॥इमांभगव

तो मंजुश्रीज्ञानसत्त्वस्य सर्वतथागतज्ञानकायस्य ज्ञानमु
द्रैरहस्यपरमार्थनामसंगीतिनाम्नाकल्पं मणिं सकल्प
रिसमाप्तमूलमहायानमिति॥ अनन्तोऽक्षैरवगाह्य
व्यञ्जनैः अत्यद्भुतमिति। प्रतिदिनं त्रिकालं धारयिष्यति
अर्थतो धारयिष्यति वाचयिष्यति पुस्तकलिखनात्
पर्यवास्यतीति चिन्तनः। योनिशश्च भावनातो मनसि
करिष्यति। परेभ्यश्च विनयेभ्यो यथाकालं यथावदेव
परीतसंग्रहं संग्रहयिष्यति। प्रत्येकं चात्यन्तमात्मतंत्रा
स्वार्थनाम्नार्थं मंजुश्रीज्ञानकायमात्मनीकृत्य एकाग्र
मानसः समाधिमनाभोगविष्यति॥ अधिमुक्तिरूपेणैवम
वधारणं॥ नत्वेवमपरीतं। अनन्ताभ्यां मनस्काराभ्यां
समन्वागतविहरणं। सर्वधर्मप्रतिवेधेयेति। सर्वधर्मा
स्कन्धाद्यैस्तीक्ष्णतिवधातिकया अक्ष्यादिविशिष्ट
या परमया उत्कृष्टया अनवद्यतया निरोषया प्रज्ञानु
द्रया अक्षया॥ तथाचोक्तं॥ अक्षयत्वाज्जनेधर्मप्रज्ञ
त्वादिति तत्त्वतः। प्रज्ञाप्रधानत्वनयोः श्रद्धापूर्वगमास्य
तीति। समन्वागतसन्। तत्समन्वागतत्वयोश्चारिणोः। वि
योः ध्यानस्य ध्यानेषु आवहः वहनकारणः सम्

गिनः संगताः सर्वज्ञबोधिसत्त्वाः [illegible]संदर्शयिष्यन्ति। आत्म
भावंचोपदर्शयिष्यन्ति। ईदृशंतद्यथाकाश्यमहाक्रोधराजानोम
हावज्रधराजानस्तिरोगूढा नानानिर्माणाकाये रोजोव
लिनः संगम्य समासंभोगमेष्यन्ति। संगम्य मीनथित्वाच स
र्वेषांसत्त्वानां श्रुत्वातानिमिजाश्रिणिहृदयविनोदक्षुरत्नु
पसंदर्शयिष्यन्ति। आत्मभावंचोपदर्शयिष्यन्ति। ईदृशंतद्य
काश्यमहाक्रोधराजानो महावज्रधराजानस्तिरोगूढा ना
नानिर्माणाकाये रोजोवलमिति॥ ओजोबलं सामर्थ्यंते
जसिरुपध्यानमिति॥ तेनसजप्रधृष्यता मनसिभवी
यतां॥ सर्वेमंत्राभद्राणामधिस्मरणंकलानिवृद्धात्वा
दीमितानुपदर्शयिष्यन्ति॥ अशेषाश्चेतिनिरवशेषाश्चमंत्र
विद्याराजाः सर्वविघ्नविनायकमारगणमित्यंगिरम
हाभरजिताः। ताः सर्वाः समेत्यविदर्शन्तिरक्षामिति।
सहाजमलनेतशीता सर्वत्रिदिवप्रतिदक्षणामिति। क्षपा
क्षणं प्रतिप्रतिदक्षणा सर्वेषांपथेषुचचतुर्षुचरक्षावरणं
भ्रिमिति॥ रक्षांश्चआवरणानि रक्षावरणानितेषांगुप्तिः
रक्षावरणगुप्तिंकरिष्यन्ति॥ सर्वेचबोधिसत्त्वाधिष्ठा
नंचसर्वकायवाङ्मनोभिलस्यसंनाहेभिन्तेसम्यगधि

ष्टास्यंति। सर्वेऽद्भर्बोधसत्वाउग्रहेणाचतुर्महाव्याहिना सर्वेष
र्मार्णवेशारदं तस्यप्रतिभानं सर्वधर्मवैशारद्यप्रतिभानं
तथोपसंक्रमिष्यंति। सर्वाहतआर्यकप्रत्येकबुद्धाश्च। आर्यवर्णो
धर्मो आर्यधर्मो बुद्धधर्मो लेभुप्रज्ञा लेहनं आशयतयाअ
भिप्रायतया आत्मभावं सदर्शनतो पदर्शयिष्यंति॥ येचत्र
लेऽद्रोपेन्द्ररुद्रनारायणासनत्कुमारमहेश्वरकार्त्तिकेयम
हाकालनन्दिकेश्वरयमवरुणकुबेरहारीतीदशादिलोक
पालाश्चसतत समितंप्रीतिसर्वदा॥ सराजादिदंगच्छतीति
ष्ठतः सयानस्यनिमंत्रणस्य स्वपतोजाग्रतः समाहितस्या स
माहितस्यच। एकाकिनो बहुजनमध्येगतस्य। यावद्ग्रामन
गरनिगमइति॥ नगरादृद्धिः सन्निवेशः। जनपदराष्ट्र इ
ति। विषयोराजधानीगतस्य। इंद्रकीलस्थप्रतोलीन
गरक्षावीथीराजमार्गः॥ चतुष्पथश्चतुष्पथः शृंगाटकंत्रि
पथः। नगरस्यानगरस्यापराकं। परानीयमगं नस्य
शाला तत्रमध्येगतस्यावाबहुजनतागारंगिरिकंदरोगर्त
नदी। वनस्यग्रहणं वनगहनंतत्रोपगतस्य। उच्छिष्ट
स्याउच्छिष्टस्यामत्तस्येति। मदविकारात्। प्रथमस्येति
ऐश्वर्यविकारात्। सर्वतथापरंरक्षावरणगुप्तिंकरि

व्यंति॥ एवंविधं च परं स्वस्थं न करिष्यंति॥ येचान्येदेव
नागयक्षगंधर्वासुरगरुडकिन्नरमहोरगाश्च महोरगा
अमोनामकुलानि मनुष्यामनुष्याश्च इति। प्रेताश्च॥ येच
ग्रहनक्षत्रगणपतयो याश्च सप्तमातरो याश्च यक्षिणी
राक्षसीपिशाचास्त्राः सर्माः साहसाः सोहिताः समग्राप
रिवारिणीः ससेनाश्चतुरंगबलाः सपरिवाराः साश्चरः
सर्वे रक्षावरणगुप्तिं करिष्यंति॥ परंच तस्य कायेओजो
बलं न संहरिष्यंति॥ आरोग्यमस्य शरीरं नोपसंहरिष्यंति॥ उ
पद्रवान्न करिष्यंति॥ ॥ चतुर्थं चक्रमेतन्मनुशंसान
स्यदानिस्कोनविंशतिः॥ ५॥ ॥ ॥
अथानाथमचक्रस्यानुसंसानधिकृत्याह॥ पुनरपरं
वज्रधरं वज्रधरेत्यादि॥ यः इमांनामसंगीतिनामकूटाम
रिणं प्रत्यहं प्रतिदिनमन्यराऽसमाधानमस्थिकृत्वा चित्त
रीकृत्य कंठगतामावर्जयिष्यति॥ उत्कंठगतांवा पठ
मानइति॥ उत्कंठगतप्रवर्जयिष्यति॥ भगवतोमंजुश्री
ज्ञानकायस्य रूपमानयन्॥ नरूपमनुविचिन्तयन्न
रूपमनुध्यास्यन्निति॥ पूर्वोक्तकोणत्रिधारूपमनुविचिं
तयन्नमेवभगवान्निर्माणरूपकायेन नचिरादे

व श्रीपुंमदविजये वंशस्थपार्श्वयेति। मनोगयइत्यु
क्तेति। गगनतलगताश्च सर्वउद्वोधि सत्वा नानानिमो
क्षकाये: सहगमत्रक्षति॥ तस्यमहासत्वस्यजा
क्षचित्रूपमपि दुर्गन्धकायपतनंच न भविष्यति॥नी
चकुलोपपत्तिर्न भविष्यति॥ तत्रनीचकुलचाण्डाल्या
दि प्रत्यग्रजंन पुक्कसेच्छादि यत्रउद्वोधिसत्वा
यते नीचोपपत्तिर्न भविष्यति॥ हीनेन्द्रियइति। अन्ध
मूक वधिरादिभावोन भविष्यति। मिथ्याडिहकुलमि
ति। मिथ्याडिहनाम नालिकइहकः सर्वदर्शनो मू
लिकानस्या: कुलामिथ्याडिहकुलं नीचोपपत्तिर्न
विष्यति॥ अकुशलेकुशलक्षेत्रेषु नोपपत्स्यते उद्वो
त्यादनदेशितधर्मविनयेपरीक्षनाचेति॥ उद्वोत्पाद
विनयेता नदेशितधर्मेपरीक्षनाचन भविष्यति॥ षो
ढशवर्षेक्षारूप्यासंज्ञिकभवेषु नोपपत्स्यते॥ दुर्भिक्ष
रोग शस्त्रान्तरकल्पास्त्रय:॥ तथाचोक्तमभिधर्मे॥
कल्पस्यशस्त्ररोगार्भा दुर्भिक्षेरोगाच्चनिर्गम:। दिवसा
सप्तमासाश्च वर्षाणिच यथाक्रमं इति॥ नेषुचनो
पपत्स्यते॥ पंचमकर्मणा: सत्वदृष्टिकमायु:परि

व्याख्यानम्। कर्मनिष्कर्षइत्यस्यधातोः कर्षकःशास
नाच्चकारादाकश्चेत्युच्यते। तेषुकालेषुनोपपत्स्यते। रा
जराजश्चौरभयंनचभविष्यति। सर्वोपकरणानां
वस्त्रादीनां वैकल्याद्यदारिद्र्यभयंतच्चनभवति॥
अश्लोकाभाक्योनिन्दायशोऽकीर्त्तिभयंच।
श्लोकाकीर्त्तनागतार्थः॥ नच्चकन्यसहस्रंयोन्यतद्भयंन
विष्यति॥ कुजातिकुलगोत्राभ्यांसम्पन्नश्चभविष्यति
। समन्तात्सर्वतः प्रासादिकरूपवर्णाद्यैः समन्वागतो
भविष्यति॥ प्रियइति मधुरभाषितत्वात्। मनआ
पइति सर्वसत्वमनोव्यापकत्वात्। सुखसंवासइ
ति। उद्वेगाभावात्। प्रियदर्शनश्चआह्लादकरू
पत्वात्। लोकानांसत्वानांभविष्यति। शुभसौभाग्य
मादेयवाक्यश्चलोकस्यभविष्यति॥ यत्रयत्रोपपत्स्य
ते। तत्रतत्रजातिस्मरोभविष्यति। महाभोगाइति।
धनधान्यैर्महापरिवारइति। बहुभृत्यपाञ्जनसं
पत्याअक्षयभोगाअक्षयपरिवारश्चेति॥ याव
ज्जीवमेवउत्तरूचेरौवभविष्यति। अग्रणीरि
ति वरः सरसर्वसत्वानांअग्रणीरोः समन्वागतो

लोभविष्यति। अकृत्वाच स्वभावेनैव सदाचारिता गुणैः समन्वागतो भविष्यति॥ चतुर्ब्रह्मविहारैर्विहरो भविष्यति॥ स्मृतिसंप्रजन्यो पायसंग्रहणोधिज्ञान समन्वागतश्च भविष्यति॥ सर्वशास्त्रेषु विशारदोनि र्भयो वाग्मीत्व भविष्यति॥ सप्तवाक्स्पथाभिधायी अजड इति प्रज्ञामेधाभ्यां समन्वागतत्वात्। प्रतिभानसम्पन्नो भविष्यति। दक्ष इति उत्साहयुक्तत्वात्। अनलस इति कुशलपक्षेषु को शीघ्रभावात्। संतुष्ट इति। अल्पेच्छाविहारीत्वात्। महार्घ इति। सर्वसत्वार्थकरणात् विपुलो भविष्यति। सर्वविषयपराङ्मुखत्वात्। परमतिभाषी सर्वसत्वानां भविष्यति। अविसंवादकत्वात्। आचार्यगुरूणांच संमतोभिज्ञेतो भविष्यति। अमृतप्रतिभाणित्वतस्य सर्वशिल्यकलाभिज्ञज्ञानशास्त्राणां चार्थतो ग्रंथतश्च प्रतिभास मागमिष्यति॥ सुकुमाल हस्तपादो यस्माजीवति स्मयो समुदाचारेण व्यवहरति नचीर्यं शीलं यस्य स अपरिभूतशीलाजीवनसमुदाचारो भविष्यति॥ मिथ्याजीवरहित

त्वात्॥ सुप्रवर्तितः अविरतशीलत्वात्। सुपसन्नश्च भविष्यति। अछिद्रशीलत्वात्। अप्रमितसर्वज्ञताबोधिचित्तं यस्मात्। अप्रमितसर्वज्ञताबोधिचित्तश्च सभविष्यति॥ आवक्रार्हप्रत्येकबुद्धानां न्यामावक्रान्तिगतश्च तद्बोधिप्रभावतः कदाचिदपि न भविष्यति॥ स्वं वज्रपाणो वज्रधरस्य संहारेण गुणानामानन्त्यमाह॥ अप्रमेयगुणसमन्वागतोऽसौ मंजुस्वरब्रह्मचारी भविष्यति॥ अन्येभ्यः प्रमेयैरेवंप्रकारैरेवंजातिभिर्यैर्गुणागरैः समन्वागतो भविष्यति॥ अचिरादेव वज्रपाणो वज्रधरपरमार्थनामसंगीतिसंधारकः पुरुषपुङ्गल इति॥ प्रधान इत्यर्थः। अतस्त्वं सुसंभृतपुण्यज्ञानसम्भार क्षिप्रतरं शीघ्रतरं बुद्धगुणान् समुदानीनोऽनुत्तरां सम्यक्सम्बोधिं समभिसंपत्स्यसे॥ अवल्पकल्याणपोरनिर्वाणा धर्मा सर्वसत्त्वानामनुत्तरो धर्मदेशको अधिष्ठिता दशदिग्धर्मधातुभिर्धर्मराज इति॥ ॥ पञ्चमञ्चकस्येयमनुसंधानस्फुटीकरणश्लोकाः॥ ५७॥ अंकेतापि॥ ॥ इयमसौ वज्रपाणो वज्रधरेत्यादारभ्य यावद्धर्मराज इत्येनाः पञ्चानुशंसा एकीकृत्य॥ ॥ आर्यनामसंगीतिटीका

यां मंत्रार्थावशोकिन्यां अनुज्ञासाधिकारो द्वादशमः॥ गा
थाश्च॥ ५ ॥

ॐ सर्वधर्मा भावस्वभावविशुद्ध वज्र अआ अं
अः प्रकृतिपरिशुद्धाः सर्वधर्मा यदुत सर्व तथा
गतज्ञानकाय मञ्जुश्रीपरिशोधना मुपादायेति
अआः ॐ सर्वतथागत हृदय हर हर ॐ हुँ हूँ
भगवान्ज्ञानमूर्त्ति वागीश्वर मुखावाच सर्व
धर्म्म गगना मल मुखार अर्थ धर्मधातु ज्ञानग
र्भआः॥ ॥ मंत्रविन्यासः॥ ॥

इयमिति नीलवस्त्रस्यवा धौतेन वज्रस्य यस्त्रात्कृ मादि
ष्वस्य हृदये परिभावितेनस्पमंत्रविन्यास मधिकृत्याह॥ ॥
ॐ सर्वधर्मा भावस्वभावविशुद्ध वज्र अआ अं अः॥ अस्या
नामसङ्गीतेमूलमंत्रप्रकृतिपरिशुद्धाः सर्वधर्मा इति॥ प्र
कृत्या नाभोगेनैवपरिशुद्धाः प्रकृतिपरिशुद्धाः नसर्वधर्माः
स्वभावाः॥ यदुतसर्वतथागतज्ञानकाय मञ्जुश्रीः ये
परिशुद्धतां धर्मधातुस्वभावना मुपादायोगा हृ
यावत्॥ अआः सर्वतथागत हृदय हर हर ॐ हूँ

ह्रीं भगवान् ज्ञानमूर्त्ते वागीश्वर महावाक्सर्वधर्म्मगगनाम
लपरिशुद्ध धर्मधातुज्ञानगर्भआः॥ ॥ आर्य्यनामसं
गीतिपीठकथा नाममंत्रार्थावलोकिन्यां प्रज्ञाचक्रे मंत्रविन्या
सविधिकारत्रयोदशमः॥ ॥

अथवज्रधरः श्रीमान् हृष्टतुष्टः कृताञ्जलिः।
प्रणम्यनाथं सम्बुद्धं भगवन्तं तथागतम् ॥१॥
अन्येश्चबहुविधैर्नाथैर्गणेन्द्रैर्वज्रपाणिभिः।
संसार्द्धकोधराजान्यैः प्रोवाचेदंवचः॥ २॥

अथेदानीं मुपसंक्रमणेन भगवान् वज्रधरो बहुविधै
र्वज्रपाणिभिः सार्द्धं नाथमार्य्यज्ञानात्मकं। संबुद्ध इ-
ति समन्ताज्ज्ञानरूपं. भगवन्तमिति प्रत्यवेक्षणाज्ज्ञानत्व
भावं तथागतमिति कृत्याष्ठज्ञानज्ञानस्वरूपमेवंचतु
र्ज्ञानात्मकं शाक्यमुनिं प्रणम्योच्चैरिदंवचः। प्रोवाचे
तिसम्बन्धः॥ १ ॥ २ ॥

अनुमोदामहेनाथ साधुसाधुशुभाशिनः।
कृतोस्माकं महानाथ सम्यक्सम्बोधिज्ञापकः॥३॥

तत्रअनुमोदामहेति॥ तत्रहेनाथ साधुअनुमोदामहे

साधुसुभाषितं ॥ अस्माकं महानर्थकृतः । किंविशिष्टो
र्थ इत्यत आह ॥ सम्यक्सम्बोधिप्रापकः इति ॥ उक्तञ्चार्या
हकः ॥ ३ ॥

जगतश्चास्यनाथस्य विमुक्तिफलकांक्षिणः ।
श्रेयोमार्गोविभक्तायं मायाजालनयादितः ॥ ४ ॥

जगतेत्यादि । तत्रजगत्केवलमत्रार्कः । जगदर्थस्यापिज
गतोविमुक्तिफलकांक्षिणश्च । अयंमायाजालनयो
दितोर्थोमहान् । किंविशिष्टो विभक्तो धर्म्मधातुत्व
भावत्वात् । श्रेयोमार्गइति निर्वाणहेतुभावत्वात् ॥
४ ॥

गंभीरोदारदेशत्वो महार्थोजगदर्थकृत् ।
बुद्धानांविषयोयंवः सम्यक्संबुद्धभाषितः ॥ ५ ॥

इतिउपसंहारगाथापञ्च ॥ ॥

गम्भीरेत्यादि ॥ तत्रएषोर्थोहियस्मात् । गंभीरोदारदेश
त्वत्तस्माबुद्धानामविषयोगोचरोनान्येषां श्रावका
दीनां जगदर्थकृदिति । महाकरुणापरिग्रहीतत्वा
त् । सर्वबुद्धैरेकाल्पवहिभिर्देशितः सर्वसम्बुद्धदेशि
त इति ॥ ॥ आर्य्यनामसंगीतिर्विकार्यो नाममंत्रा

र्थावलोकिन्यांउपसंहाराधिकारः चतुर्दशः समाप्तः॥ ॥

गाथापञ्च॥ ५ ॥

आर्यमायाजालयोऽशसाहस्रिकाम्रहायोग
तंत्रात्मातिसमाधिजालपटलाङ्गवतं तथा
गतश्रीशाक्यमुनिनामभिताभगवतो मंजु
श्रीज्ञानसत्वस्य परमार्थनामसङ्गीतिपरि
समाप्ता ॥ शुभम्॥